ॐ

गङ्गाधरसूरिविरचिता

काणादसिद्धान्तचन्द्रिका

हरि-हरप्रियव्याख्यया समलङ्कृता

व्याख्यातारौ

पण्डितराज: के. गोविन्दन् नम्प्यार्

शास्त्रचूडामणि: जि. विश्वनाथशर्मा

सम्पादिका

श्रीमती ललिताचन्द्रन्

शोधसहायिका

केन्द्रीय-संस्कृतविद्यापीठम्

13049
625/54

प्रकाशक:

प्राचार्य:

...ायूर्-केन्द्रीय-संस्कृतविद्यापीठम्

पुरनाट्टुकरा, तृशिवपुरम्, केरलदेश

१९८९

13049
न्याय

KANADA SIDHANTA CHANDRIKA

OF

GANGADHARA SURI

WITH

THE COMMENTARY - HARI - HARA PRIYA

Commentators :

Panditaraja K. Govindan Nambiar

Sastrachoodamani G. Viswanatha Sarma.

Editor :

Smt. Lalitha Chandran,

Research Assistant,

Guruvayoor Kendriya Sanskrit Vidyapeetha,

…ipal,

Guruvayoor Kendriya Sanskrit Vidyapeetha,

Puranattukara, Thrissur, Kerala.

1998

Available at
Guruvayoor Kendriya Sanskrit Vidyapeetha,
P. O. Puranattukara,
Thrissur, Kerala - 680551

Copy right with
The Principal,
Guruvayoor Kendriya Sanskrit Vidyapeetha

First Edition 300 Copies

Printed at: Kairali Press, Thrissur.

Price: Rs. 100.

ॐ

गङ्गाधरसूरिविरचिता

काणादसिद्धान्तचन्द्रिका

(हरि-हरप्रियव्याख्यया समलङ्कृता)

व्याख्यातारौ

पण्डितराजः के. गोविन्दन् नम्ब्यार्

शास्त्रचूडामणिः जि. विश्वनाथशर्मा ।

सम्पादिका

श्रीमती ललिताचन्द्रन्

शोधसहायिका

गुरुवायूर्–केन्द्रीय–संस्कृतविद्यापीठम्

प्रकाशकः

प्राचार्यः

गुरुवायूर् – केन्द्रीय – संस्कृत – विद्यापीठम्

पुरनाट्टुकरा, तृशिवपुरम्, केरलदेशः

१९९८

अनुक्रमणिका

1 आत्मसमर्पणम्

2 नान्दीमुखम्

3 नैवेद्यम्

4 विषयसूची

5 सव्याख्यकाणादसिद्धान्तचन्द्रिका

6 शुद्धिपत्रम्

विषयसूची

		पृष्ठसंख्या
1	उद्देशग्रन्थः	1 — 13
2	साधर्म्यवैधर्म्यप्रक्रिया	14 — 25
3	द्रव्यनिरूपणम्	26 — 46
4	गुणनिरूपणम्	47 — 78
5	अनुमानखण्डः	79 — 87
6	उपमानखण्डः	88
7	शब्दखण्डः	89 — 96
8	प्रामाण्यवादः	97 — 103
9	गुणपदार्थनिरूपणम्	104 — 112
10	कर्मपदार्थनिरूपणम्	113 — 115
11	सामान्यनिरूपणम्	116

आत्मसमर्पणम्

"अनन्तशास्त्रं बहुलाश्च विद्याः
अल्पश्च कालो बहुविघ्नितश्च ।"

इति सत्यामुक्तौ काणाद-पाणिनीययोस्सर्वशास्त्रोपकारकत्वमभ्युपगतम् । तत्र कणादस्येदं काणादमिति व्युत्पत्या काणादशब्देन वैशेषिकं यद्यपि प्रतीयते तथापि समानतन्त्रो न्यायोऽपि संगृह्यते । अत एव वैशेषिकशास्त्रे पञ्चषाण्येव ग्रन्थरत्नान्युपलभ्यन्ते, गौतमीयन्यायेऽनन्तानि च । प्रस्तुतं काणादसिद्धान्तचन्द्रिकाख्यं पुस्तकमपि काणादगौतमीयद्वयमनुसरति । यतो हि वैशेषिकाः प्रत्यक्षानुमानभेदेन मानद्वयमेवाङ्गीकुर्वन्ति । तथा हि श्रूयते —

"शब्दोपमानयोर्नैव पृथक्प्रामाण्यमिष्यते ।
अनुमानगतार्थत्वादिति वैशेषिकं मतम् ॥ इति ।

किन्तु चन्द्रिकायां नैयायिकैरङ्गीकृतानि चत्वार्यङ्गीकृत्य प्रत्यक्ष-अनुमान-उपमान-शब्दखण्डाः वर्तन्ते । काणादसिद्धान्तानां चन्द्रिकेति व्युत्पत्या चन्द्रिकासादृश्यं पुस्तकस्य प्रतीयते । चन्द्रिका हि तमो निरस्याखिलं वस्तुजालं प्रकाशयतीदं पुस्तकमपि काणादसिद्धान्तानखिलानर्थान् प्रकाशयति ।

गुरुवायूर्—केन्द्रीयसंस्कृतविद्यापीठे शोधसहायिकाभिः (Research Assistants) तिसृभिः बहूनि पुस्तकानि प्रकाशनार्थं सज्जीकृतानि, तेषु त्रीणि राष्ट्रिय-संस्कृत-संस्थानेन प्रकाशनायाङ्गीकृतानि । तत्रेदं लघुकायमखिलानां व्युत्पत्सूनां छात्राणामुपकारि च भवेत् काणादसिद्धान्तचन्द्रिकेति पुस्तकमिति धिया विद्यापीठप्रकाशनसमितिरस्यादौ प्रकाशनं निर्वाह्यमिति निर्दिदेश । निमित्तरूपोऽयं जनः प्राचार्यपीठमध्यासमानस्तस्याः निर्देशं केवलं पूरयितुकामोऽभवत् ।

काणादसिद्धान्तचन्द्रिका द्रविडदेशीयेन विद्वत्तल्लजेन गङ्गाधरसूरिणा रचिता । व्याख्यानतो विशेषप्रतिपत्तिरिति धिया तत्र

व्याख्यामकार्षुः दिवंगताः पण्डितराजगोविन्दन् नम्प्यार्महाभागाः अतीतचतुरशीतिवयस्का इदानीमपि कर्मनिरताः शास्त्रचूडामणयः विश्वनाथशर्माणः। तत्राऽऽद्यानां व्याख्या हरिप्रियाऽन्त्यानां हरप्रियेति नाम्ना वर्तते। प्रस्तुतं व्याख्यानमपेक्षितं मूलमेवानुसरति तथातीव ललितञ्चेति सर्वात्मना काणादसिद्धान्तचन्द्रिकाऽत्यन्तमुपकरोति।

एतस्याः काणादसिद्धान्तचन्द्रिकायाः प्रकाशने सम्पादिकाऽस्माकं विद्यापीठस्य व्याकरणे शोधसहायिका श्रीमती ललिताचन्द्रः, संशोधकः डॉ. राजन्, साहित्यव्याख्याता च मे नितरां वत्सलौ, तथा समयेन मुद्रणं निर्व्यूढवन्तः, तृशिवपुरस्थ (Trissur) कैरलीमुद्रणालयाधिकारिणश्च धन्यवादार्हाः। संस्कृतपोषणे दत्तश्रद्धास्तथा राष्ट्रियसंस्कृत-संस्थानस्य निदेशकवर्याः डॉ. कमलाकान्तमिश्राः अस्माकमुत्साहदायकाः वर्तन्ते, तेभ्यस्सादरं सविनयञ्च सन्तु नोऽनन्ताः प्रणामाः।

दोषगुणविवेकेन दोषेषु मर्षणस्वभावानां मेधाविनां काणादं पिपठिषूणां बालानाञ्चोपकारायेयं सव्याख्या काणादसिद्धान्तचन्द्रिका भूयादित्याशास्महे।

इति

डॉ. रामनारायणदासः
प्रभारिप्राचार्यः
गुरुवायूर् केन्द्रीयसंस्कृतविद्यापीठम्
तृशिवपुरम्, केरलादेशः

पुरनाट्टुकरा
27 – 1 – '98

नान्दीमुखम्

सूत्रसूनैर्हारमिव विशेषपरमाणुभिः ।
विश्वङ्कुर्वाणमात्मानमीश्वरं परमं नुमः ।।

युक्तिविचिन्तनमेव मानवमहत्त्वस्य पुरोगतिनिदानमिति शास्त्रज्ञाः कलयन्ति । अभिमतप्रमेयसमर्थनाय प्रमाणमाश्रयन्ते विद्वज्जनाः । शास्त्रान्तराणामिव निश्रेयसो मोक्षस्याधिगमः न्यायशास्त्रस्य परमं लक्ष्यम् । स च प्रमाणादिपदार्थतत्त्वज्ञानाद्भवतीति प्रथममुद्दिष्टम्प्रमाणं वैशेषिकसूत्रे । यतो हि समस्तं प्रपञ्चजातज्ञानं प्रमायाः यथार्थज्ञानस्य करणं प्रमाणमपेक्षत इति प्रमाणस्यापि प्राधान्यम् । तच्चतुर्विधम्-प्रत्यक्षानुमानोपमानशब्दभेदात् । तत्र परमात्मन ईश्वरस्य साधक-मनुमानमित्येतद्युक्त्यात्मकं प्रधानतममित्याह पक्षतायां जगदीश-भट्टाचार्यो यथा — "प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिका" इति । अत एव न्याय इत्यस्य शास्त्रस्य नामान्तरम् । न्यायो नामानुमितेः प्रयोजका प्रतिज्ञादिपञ्चावयवास्सन्ति । इत्थं दीपः प्रभयेव समस्तं प्रपञ्चं प्रमाणेन प्रकाशयत् न्यायशास्त्रं सर्वविद्यानां दीप इत्युच्यते ।

भगवानक्षपादः किल न्यायशास्त्रं प्रणिनाय । वैशेषिकदर्शनञ्च निर्ममे कणादमुनिः । अनयोः शास्त्रयोः भूयसीं सदृशतामालोक्य तर्कशास्त्रमिति सामान्यतो व्यवहारः जागर्ति । मुक्तावल्यां द्रव्यं गुणस्तथा कर्म........इत्यादिकारिकायाः वृत्तिग्रन्थो यथा — "एते च पदार्थाः वैशेषिके प्रसिद्धाः नैयायिकानामप्यविरुद्धाः" इति । सुगतस्यावतारात् पूर्वमेव मिथिलायां तर्कशास्त्रपठनं प्रवृत्तमिति ज्ञायते। अचिरेण एषु शास्त्रेषु नितरां निष्णाताः बभूवुः आन्ध्रदेशीयपण्डिताः । वङ्गेष्वपि .शास्त्रस्यास्य महानासीत् प्रचारः । तत्र नवद्वीपं नाम ग्रामः नवीनन्यायनिकेतनमिति लोके प्रथां प्राप ।

तर्कशास्त्रपठने प्रारम्भग्रन्थः तर्कसंग्रहः सर्वत्र प्रचारं लभते । संग्रहस्य कर्ता अन्नम्भट्टः आन्ध्रदेशीय इति जानीमः । तेनैव स्वग्रन्थस्य

दीपिकानामकं व्याख्यानमपि समारचितम् । न्यायचन्द्रिका नामापरा कृतिः केनापि केशवभट्टेन आरचिता दृश्यते, या सरलतया बालानां सुतरामुपकरोति ।

अत्र काणादसिद्धान्तचन्द्रिका नामापरोऽयं ग्रन्थः विषयाणां विन्यसनेन प्रतिपादनेन च पूर्वोक्तान् ग्रन्थान् अतिशयत इति वक्तव्यमस्ति । न्यायशास्त्रेषु प्रेक्षावतां प्रवीणः कोऽपि गङ्गाधरसूरिः ग्रन्थमिमं जग्रन्थ । ग्रन्थकर्तुः देशकालमधिकृत्य सूचनां प्रारम्भमङ्गलपद्यमेव ददाति । तञ्जावूर् समीपे तिरुविदैमरुदूर् क्षेत्रस्थं मध्यार्जुनं स्तुवन्नयं द्रविडदेशीय इत्यत्र न संशयः । अनेनैव सूरिणा स्वस्य ग्रन्थस्य प्रसादाख्या व्याख्यापि निरमायीति श्रूयते । कुवलयानन्दस्य या रसिकरञ्जिनी व्याख्या तस्य प्रणेता गङ्गाधराध्वरीन्द्रः एष गङ्गाधरसूरिरेवेति निश्चीयते ।

अस्मत्पितामहसहोदरदेशिकेन्द्र —
मप्पय्यदीक्षितमहं प्रणमामि मूर्ध्ना ॥

इति रसिकरञ्जिन्यां दृश्यते पद्यम् । स्वपितामहसहोदरस्य देशिकम् अप्पय्यदीक्षितं वन्दमानः सूरिः स्वस्य दीक्षितसमकालिकतां सूचयति । अप्पय्यस्य पौत्रशिष्यः गङ्गाधरसूरि, अप्पय्यस्य भ्रातृपौत्रः नीलकण्ठदीक्षितश्च समकालिकाविति च सम्भाव्यते ।

यत्पादपङ्कजरजः कणिकानुषङ्ग—
मासाद्य देवगुरुमप्यधरीकरोति ।
मूकोऽपि तं पशुपतेरपरावतारं
तं विश्वरूपयमिनं पुनरानतोऽस्मि ॥

इति रसिकरञ्जिनीपद्यात् विश्वरूपयमी सूरिगुरुरिति च जानीमः ।

कणान् अत्तीति कणादपदस्य निरुक्तिः आचार्यस्य कणादस्य परमाणुवादे प्रतिपत्तिं द्योतयति । पञ्चभूतेषु आकाशं विहाय भूमि-जल--तेजो-वायूनां चतुर्णां कार्यभूतानां मूलकारणं तत्तत्परमाणुसमुदाय इति कणादमतं नवीनशास्त्रज्ञानां कौतुकमावहति । परमाणोः द्व्यणुकः ततस्त्र्यणुकमित्येवङ्क्रमेणात्र पृथिव्यादिचतुर्णां भूतानां

सृष्टिरुपवर्ण्यते। अस्य परमाणुवादस्यैवापरा संज्ञा आरम्भवाद इति। निरवयवानाम् अतीन्द्रियणां नित्यानाम् अनन्तकोटिपरमाणूनां कथं साध्यते परस्परं भेदः? तदर्थं प्रत्येकस्मिन् परमाणावेकैको विशेषः स्वीक्रियते। एवं नित्यपरमाणुवृत्तयो विशेषा अपि नित्या अनन्ताश्च भवन्ति। इमं सिद्धान्तमवलम्ब्य किल कणादमतस्य वैशेषिकदर्शन-मिति संज्ञा समजनि। प्रपञ्चवस्तूनां विशकलनं भवति नवीनशास्त्रस्य स्वभावः। पदार्थानामपग्रथनं वैशेषिक इव शास्त्रान्तरेषु सम्यक्तया न दृश्यते। अत एवाऽऽधुनिकशास्त्रज्ञानां काणादमते अधिकाऽऽदरो भवितुमर्हति। प्रतिजीवं विद्यमानं मनोऽपि परमाणुरूपमिति काणादाः मन्यन्ते। एवं यदिदं मौलिकं तत्त्वं पञ्चपरमाणुपुञ्जरूपं प्रपञ्चितं कणादेन तदतितरां समुल्लासयति सूक्ष्मेक्षिकां शास्त्रकुशलेषु।

अत्र निबन्धे गङ्गाधरसूरिणा प्रथमतः भावोऽभाव इति रूपेण पदार्थद्वयमुद्दिष्टम्। द्रव्यादीनां सप्तपदार्थानां तत्त्वतो निरूपणं स्वल्प-बुद्धेरपि सुग्राह्यतामातनोति। बालमनोविज्ञानीये सूरिणानेन प्रदर्शि-ताऽसुलभभावना ग्रन्थस्यास्य प्रचारे सुतरामुपकरोति। विषयप्रति-पादनेऽवलम्बिता सरला सरणिरपि काणाददर्शने विशदं निरवद्यञ्च विज्ञानं शास्त्रविद्यार्थिषु समर्पयितुं समीचीना प्रतिभासते। न्यायशास्त्रे बालानां सुगमप्रवेशाय सुगृहीतनामधेयः अन्नम्भट्टः तर्कसंग्रहाख्यं ग्रन्थं निर्माय स्वेनैव रचितया दीपिकाख्यव्याख्यया भूषयति स्म। अस्य तर्कसंग्रहस्य भारते सर्वत्रेदानीमपि दृश्यतेऽविकलः प्रचारः। द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां भावपदार्थानां निरूपण-मादावेव संग्रहे समार्चितम्। सप्तमपदार्थस्य अभावस्य विचारः तदनन्तरं स्वीकृतः। प्रत्यक्षपरिच्छेदः अनुमानपरिच्छेदः उपमान-परिच्छेदः शब्दपरिच्छेद इति चतुर्धा विभज्य सर्वेषां पदार्थानां संग्रहः शास्त्रविद्यार्थिनां सुगमावबोधाय कल्पत एव।

काणादसिद्धान्तचन्द्रिकायां तु उद्देश्यम् आदावेव निरूप्यते। अत्र भावोऽभावश्चेति पदार्थस्य द्वेधा विभागः प्रथमतः समर्पितः विषयग्रहणे क्लिष्टतां परिहरति। तदनन्तरं निरुपिता भवति साधर्म्यवैधर्म्यप्रक्रिया। पुनः द्रव्यनिरूपणं गुणनिरूपणञ्च विधाय

प्रत्यक्षखण्डः प्रसाधितः। ततः अनुमान – उपमान – शब्दखण्डाः निरूपिताः। अनन्तरं गुणरूपणे ज्ञानस्य वैविध्यं प्रस्तूय प्रामाण्यवादं प्रपञ्चयति ग्रन्थकारः। गुणकर्मसामान्यपदार्थानां प्रसाधनेन चन्द्रिका परिसमाप्यते।

अन्नम्भट्टेन समवलम्बितां सरणिमपहाय नूतनाम् अयत्नललितां कामपि विचाररीतिमाविष्करोति गङ्गाधरसूरिरित्युपरिप्रदर्शितात् विषयक्रमात् सम्यग्ज्ञायत एव। शास्त्रविचिन्तने नूतनः कश्चन पन्थाः शास्त्रपिपठिषूणां परमानन्दमावहेदिति एष एव चन्द्रिकाया आकर्षकः परिवेषः। अत्र किञ्चिदिव मुक्तावलिं चन्द्रिकां चावलम्ब्य विषय-प्रतिपादने तारतम्यं निरूपयामः। मुक्तावल्यां तु —

"*न चादृश्येन द्व्यणुकेन कथं दृश्यत्रसरेणोरुत्पत्तिरिति वाच्यम्। यतो दृश्यत्वमदृश्यत्वं वा न कस्यचित् स्वभावादाचक्ष्महे। त्रसरेणोः महत्वात् प्रत्यक्षत्वं, न तु द्व्यणुकादेः, तदभावात्। न हि त्वन्मतेऽपि सम्भवतीदं परमाणौ महत्त्वाभावात्। इत्थञ्चावयवसिद्धौ तेषामुत्पा-दविनाशयोः प्रत्यक्षसिद्धत्वादनित्यत्वम्। तेषाञ्चावयवधाराया अनन्तत्वे मेरुसर्षपयोरपि साम्यप्रसङ्गः अतः क्वचिद्विश्रामो वाच्यः। महत्प-रिमाणस्य गगनादौ विश्रान्तत्वमिव अणुपरिमाणतारतम्यस्यापि क्वचिद्विश्रान्तत्वमस्तीति तस्य परिमाणत्वसिद्धिः"। इदानीं काणाद-चन्द्रिकाभागमुद्धरिष्यामः।

"सा पृथिवी नित्यानित्यत्वभेदात् द्विविधा। नित्या परमाणुरूपा। न च तस्य मानाभावः। यथा हि महत्परिमाणतारतम्यं गगनादौ विश्रान्तं तथाऽणुपरिमाणतारतम्यस्यापि क्वचिद्विश्रान्तिर्वक्तव्या। यत्र च विश्रामस्तस्यानित्यत्वेऽनन्तावयवारब्धत्वाविशेषेण मेरुसर्षपयोः तुल्यपरिमाणत्वप्रसङ्गान्नित्यत्वं वाच्यम्। स एव परमाणुः। यत्र तु अणुपरिमाणतारतम्यं विश्रान्तं तन्नित्यमित्युक्तम्। न च त्रुटेः नित्यत्वं सम्भवति। स हि चक्षुषा गृह्यते। अतः घटादि-वच्चाक्षुषद्रव्यत्वादयमपि सावयवः। एवं त्रुटेः सावयवत्वे सिद्धे तदवयववानां द्व्यणुकादीनामपि सावयवत्वम्। द्व्यणुकस्यावयवास्तु

* प्रत्यक्षखण्डे द्रव्यनिरूपणम्, Page 152 155

न सावयवाः, मानाभावादनवस्थापत्तेश्चेति न्यायवैशेषिकवृद्धाः। नवीनाः पुनः त्रुटेरेव नित्यतां स्वीकृत्य परमाणुं प्रत्याचक्षुः"।

एवञ्च मुक्तावल्यपेक्षया हृद्या सरला च शोभा चन्द्रिकाया एवेत्यत्र शास्त्रकुशला प्रमाणम्।

चन्द्रिकाव्याख्यातॄनधिकृत्यापि किञ्चिद्वक्तव्यं भाति। व्याकरणे काणादे च निपुणमतयः 'पण्डितराजाः' के. गोविन्दन् नम्ब्यार् महाभागाः 1984 तमे वर्षे गुणेष्वपरत्वपर्यन्तां व्याख्यामकुर्वन्। पालक्काड्जिल्लायां लक्कडीदेशे लब्धजन्मा एष अष्टमूर्तिनम्पूतिरि-महाभागस्य अम्मूनङ्ङ्यारम्मायाश्च प्रथमपुत्रः। एतेषां व्यक्ति-परिचयः इदानीं प्रसिद्धीकरणार्थं सज्जीकृतस्य महिषमङ्गलभाण-स्याऽऽमुखे दत्तः। कोमलां व्याख्यातुः शैलीं प्रकाशयितुं किञ्चि-दिवोद्धरिष्यामः।

"प्रसङ्गसङ्गत्या द्रव्यं विभजते। प्रसङ्गो नाम स्मृतस्योपेक्षा-नर्हत्वम्। भागविभागे कृते शिष्टस्य द्रव्यजिज्ञासायां तन्निरूप्यते। ननु विशेषजिज्ञासायाः सामान्यज्ञानाधीनतया सामान्यलक्षणानुक्तौ सामान्य-ज्ञानानुदयात् प्रकृते विशेषजिज्ञासाया अपि अनुत्पत्त्या विभागोऽनुचित इति चेन्न, द्रव्यत्वजातिमत्त्वरूपसामान्यलक्षणस्य स्फुटत्वात्। द्रव्य-त्वजातिस्तु कार्यसमवायिकारणतावच्छेदकतया सिध्यति। न च परिगणनैव नवत्वसङ्ख्याधिगमे विभाजकवाक्ये नवत्वग्रहणं निष्प्र-योजनमिति वाच्यम्, नवैव न तु ततोऽधिकं न्यूनं वेति संख्याव-धारणार्थत्वात्। द्रव्यत्वं पृथिव्यादिनवान्यतमत्वव्याप्यमिति व्याप्ति-लाभेनोक्तावधारणसिद्धिः"।

अवशिष्टभागस्य व्याख्या श्रीमद्भिः शास्त्रचूडामणिभिः जि. विश्व-नाथशर्ममहाभागैः कृता। संस्कृतपठनं सुगमं कर्तुमुपकारक एवमाधि-कारिकश्च "संस्कृताध्यापनम्" तथा केरलसाहित्य-अक्कादम्या पुरस्कृतः "भारतीयशास्त्रदर्शनम्" एवं "वेदशास्त्रसरणिः" इत्यादयः प्रमुखाः ग्रन्थाः रचिताः। सहस्रं पूर्णचन्द्रानालोक्यावाप्तचतुरशीति-वयस्का इमेऽधुना पूर्णवेदपुरीनगरे (तृप्पूणित्तुरा) स्वधर्मनिरताः कालं यापयन्ति।

काणादसिद्धान्तचन्द्रिकायाः संशोधनाधारभूतग्रन्थस्तु संस्कृतग्रन्थ-प्रकाशनकार्याध्यक्षेण टि. गणपतिशास्त्रिणा संशोधितः अनन्तशयने महामहिमश्रीमूलरामवर्मकुलशेखरमहाराजशासनेन राजकीयमुद्रणा-लये १९१३ तमे क्रुस्त्वब्दे मुद्रयित्वा प्रकाशिता च काणादसिद्धान्त-चन्द्रिका। अस्याः मलयाललिपिनिबद्धा मातृका गुरुवायूर् केन्द्रीय-संस्कृत-विद्यापीठस्य पुस्तकालयाद् गृहीता। अस्याः देवनागराक्षरेषु रूपान्तरीकरणं सम्पादनं पाठभेददर्शनञ्चात्र कृतम्।

ग्रन्थेऽत्र येषां महानुभावानां साहाय्येन मया किमपि कर्तुं पारितं तेषां कृतज्ञतानिवेदनेन कृतकृत्यतां मन्यमानयेदानीं किमप्यावेद्यते। पूर्वं तावद् राष्ट्रिय-संस्कृत-संस्थानस्य निदेशकान् सहृदयधुरन्धरान् डॉ. कमलाकान्तमिश्रमहोदयान् सादरं प्रणमामि, येषामनुग्रहेणैवाद्य-मिदं प्रकाशनं निर्व्यूढम्। अनन्तरमस्माकं गुरुवायूर्-केन्द्रीय-संस्कृत-विद्यापीठस्य प्रभारिप्राचार्याणां डॉ. रामनारयणदासमहोदयानां कृते प्रणतिपुरस्सरं कृतज्ञतां निवेदयामि, येषां प्रसादाद्दशसंवत्स-रेभ्यः पूर्वमेव मया सज्जीकृतग्रन्थद्वारा विद्यापीठस्य प्रथम-प्रकाशन कर्म प्रारब्धम्। गुरुवायूर्विद्यापीठस्यानुसन्धानविभागाध्यक्षैः डॉ. राजन् महाभागैरपि ग्रन्थस्यास्य प्रकाशनकर्मणि बह्वी सहायता अनुष्ठिता। तेषां कृते हार्दिकं धन्यवादं वितनोमि। डॉ. चक्रधर-बिजल्वान्महोदयान् अस्माकं प्राक्तनप्राचार्यवर्यानिदानीं सविनयं नमस्करोमि, यैः विद्यापीठेऽस्मिन् प्रकाशनविभागस्य प्रारम्भः कृतः। दिवंगताः पण्डितराजा के. गोविन्दन् नम्ब्यार्महाभागाः, अतीतचतुरशीतिवयस्काः ज्ञानवृद्धाः प्रोफसर्. विश्वनाथशर्ममहाशयाश्च न विस्मर्तव्याः यतो ह्येते काणादसिद्धान्तचन्द्रिकां स्वीयव्याख्य-मालयाऽलंचक्रुः। अतस्तेभ्योपि पुत्रीकृता वाङ्मनःकायैर्नैकानि नमांसि वितनुते। ग्रन्थस्यास्यास्मन्निर्दिष्टकालेन मुद्रणं विदधते कैरली-मुद्रणालयाधिकारिणेऽपि धन्यवादो वितीर्यते। अन्ते स्वकर्मणि साह्य-ङ्कुर्वद्भ्यः नामतो निर्देष्टुं गौरवभियाऽशक्ता प्रसङ्गसङ्गत्याकृतज्ञतां दत्वाऽऽत्मानं कृतकृत्यं मनुतेऽयञ्जनः।

ईदृश्या सरलया व्याख्ययोपेता एषा काणादसिद्धान्तचन्द्रिका विद्यासमृद्धये नियतं प्रयतमानानां छात्राणां विद्वज्जनानाञ्च हृदय-कुमुदविकासाय भूयादित्याशास्महे ।

श्रीमती ललिताचन्द्रन्
शोधसहायिका
गुरुवायूर् विद्यापीठम्

पुरनाट्टुकरा,
27-1-'98

नैवेद्यम्

'ठ्वम् अमृतात्मना नैवेद्यं कल्पयामी'ति मानसपूजायां यजमान-स्सुरभिमुद्रां विधाय मन्त्रयति। अस्माभिः यत्किमपि निवेद्यते तदमृतं भवत्वित्यत्र सङ्कल्पः। गुरुवायूर् केन्द्रीयसंस्कृतविद्यापीठेनेयं काणाद-सिद्धान्तचन्द्रिका न्याये व्युत्पत्सूनां कृते निवेद्यते सा तेषाममृताय-मानाऽस्तु।

प्राचीननवीनन्याये बहवः प्रौढाः सरलाश्च प्रकरणग्रन्थास्सन्ति। तेष्वन्यतमस्सरलश्चायं काणादसिद्धान्तचन्द्रिकाग्रन्थः। यथाश्रुतार्थ-स्वीकारेऽस्य वैशेषिकपरत्वमाशङ्केत इति मत्वा ग्रन्थकारः गङ्गाधरसूरिः तत्र तत्रास्य न्यायानुकूलतां प्रदर्शयति। तथा चाऽन्ते स एवं वदति —

'अनया विशदीभूते न्यायवैशेषिकाध्वनि।
निर्विशङ्कं सञ्चरन्तु बाला व्युत्पत्तिकांक्षिणः'॥ इति।

सरभसं प्रवर्तितमिदं प्रकाशकर्मास्माभिरिति क्वचित् स्खलितम-भूत्तदपि शुद्धिपत्ररचनया यथाशक्ति परिहृतम्। तथापि-

"गुणदोषौ सुधी ज्ञात्वा इन्दुक्ष्वेडाविवेश्वरः।
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति"॥

इति न्यायोऽवलम्ब्यतामिति सुधियः प्रार्थ्यन्ते॥

प्रस्तुतं काणादसिद्धान्तचन्द्रिकाख्यं पुस्तकमस्य विद्यापीठस्य प्रथममत एव देवानामाद्यं लाजनैवेद्यमिवेदमपि लघु स्वादु समाह्लाद-करञ्च भवेदिति नो विश्वास इतीदं जिज्ञासुभ्यो निवेद्यते॥

इति
डॉ. राजन् इ. एम्.
साहित्ये व्याख्याता शोधविभागाध्यक्षश्च
गुरुवायूर् विद्यापीठम्

पुरनाट्टुकरा
27–1–'98

उद्देशग्रन्थः ।

नत्वा विशुद्धविज्ञानं दक्षिणामूर्तिमीश्वरम् ।
कुर्वे काणादसिद्धान्तचन्द्रिकां बुधतुष्टये ॥

नत्वा गुरुपदाम्भोजे स्मृत्वा तद्भारतीर्भृशम् ।
कुर्वे काणादसिद्धान्तचन्द्रिकां व्याख्ययान्विताम् ॥

चिकीर्षितप्रबन्धस्य निर्विघ्नपरिसमाप्त्यर्थं कृतं इष्टदेवतानमस्कारात्मकं मङ्गलं शिष्यशिक्षायै ग्रन्थादौ निबध्नन् चिकीर्षितं प्रतिजानीते नत्वेत्यादिना ।

विशुद्धविज्ञानमिति विशेषणेन ज्ञानस्वरूपत्वोक्त्या मायासम्बन्धाभावो द्योत्यते । ईश्वरविधिसर्वशक्तत्वं तेन सर्वाभीष्टप्रदत्वञ्च सूच्यते । दक्षिणामूर्तित्वापन्नस्य भगवतः विद्याप्रदायित्वं प्रसिद्धमेव । तेन तत्प्रमाणस्य स्वाभीप्सितसाधकत्वं व्यज्यते । अत्र पूर्वार्द्धेन मङ्गलाचरणमुत्तरार्द्धेनानुबन्धचतुष्टयञ्च निबध्यते । तत्र काणादसिद्धान्तचन्द्रिकामिति विषयनिर्देशः । कणादस्येमे काणादाः । कणादोक्ता इति यावत् । "वा नाम्न" इति वृद्धसंज्ञाविकल्पात् न छप्रत्ययः । इदमित्थमिति निश्चितोऽर्थः सिद्धान्तः । कणादप्रोक्तानां सिद्धान्तानां चन्द्रिका चन्द्रिकेव प्रकाशयत इत्यर्थः । एवञ्च वैशेषिकसिद्धान्तोऽत्र विषय इति सिद्धम् । यद्यपि एतद्विषयप्रतिपादकानि सूत्रभाष्यादीनि बहूनि विद्यन्तेऽथापि सुखेन बोधकत्वं अस्यैवेति चन्द्रिकापदेन द्योत्यते । सिद्धान्तपरिज्ञानं प्रयोजनमिति स्पष्टम् । काणादसिद्धान्ताविजिगमिषवोऽधिकारिणः । प्रयोजनान्तरमाह—बुधतुष्टय इति । बुधानामधीतशास्त्रग्रन्थानां तुष्टये आनन्दायेत्यर्थः । कुर्वे इति उत्तमपुरुषैकवचनस्याऽऽश्रयत्वमर्थः । यद्यपि लकारसामान्यस्य कृतिवाचकत्वं स्वमते सिद्धान्तितं तथापि कृतिवाचकतया कृञ्धातोरपि सत्त्वादत्र लकारस्याऽऽश्रयत्वे लक्षणा वक्तव्या । यथा जानातीत्यत्र । कृञ्धातोः कृतिरर्थः ।

इह हि पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानमपवर्ग-हेतुरिति पदार्थतत्त्वं निरूप्यते। प्रमाविषयः पदार्थः। स च द्विविधः, भावोऽभावश्चेति। तत्र भावो द्रव्यगुणकर्मसामान्य-

---

काणादसिद्धान्तचन्द्रिकामिति द्वितीयायाः कर्मत्वमर्थः। तच्चात्र विषयत्वस्वरूपम्। बुधतुष्टय इति चतुर्थ्या उद्देश्यत्वमर्थः। तस्य धात्वर्थे कृतावन्वयः। तथा च बुधतुष्ट्युद्देश्यककाणादसिद्धान्तचन्द्रिका-विषयककृत्याश्रयोऽहमित्युत्तरार्द्धशाब्दबोधः। नत्वेति क्त्वप्रत्ययस्यो-त्तरकालिकत्वमर्थः। तच्च प्रधानक्रियायां कृतावन्वेति। दक्षिणा-मूर्तिमिति द्वितीयायाः कर्मत्वमर्थः। तच्च क्त्वाप्रकृतिभूतनम्धात्वर्थ-निरूपितमिति नत्वेत्यत्रान्वेति। विशुद्धविज्ञानमीश्वरमित्युभयमपि दक्षिणामूर्त्तिमित्यस्याभेदेन विशेषणम्। तथा चायं बोधप्रकारः—ईश्वराभिन्नविशुद्धविज्ञानाभिन्नदक्षिणामूर्त्तिकर्मकनमनोत्तरकालिकी बुध-तुष्टयुद्देशिका काणादसिद्धान्तचन्द्रिकाविषयिणी वर्तमानकालिकी या कृतिः तदाऽऽश्रयोऽहं (ग्रन्थकर्त्ता) इति शाब्दबोधः।

यद्यपि ग्रन्थादिनिबद्धपद्येनैव साम्प्रदायिकरीत्या विषयप्रयोज-नादिकमुपनिबद्धमथापि स्पष्टप्रतिपत्तये विषयादिप्रदर्शनपूर्वकं स्वग्रन्थ-मवतारयति — इह हीत्यादिना। इह संसार इत्यर्थः। साधर्म्यं समानो धर्मः। वैधर्म्यं विरुद्धो धर्मः। पदार्थानां साधर्म्यज्ञानेन वैधर्म्यज्ञानेन च तत्त्वं निश्चिनुमः। तत्वज्ञानेन मुक्तिरिति दार्शनिकानां सिद्धान्तः। अतः पदार्थतत्त्वं निरूप्यत इति भावः। अत्र पदार्थ-स्वरूपमाह – प्रमेति। पदस्यार्थः पदार्थ इति विग्रहः। ऋधातोः कर्मणि थप् प्रत्यये अर्थशब्दो निष्पन्नः। गत्यर्थानां ज्ञानार्थकत्वमिति सिद्धान्तः। एवञ्च ज्ञानविषय इत्यर्थः सुलभः। ज्ञानञ्च प्रमैव गृह्यते न त्वितरत्। तथा च पदजन्यप्रतीतिविषय इति पदार्थशब्दस्य यौगिकोऽर्थः। तदनुसारेणैव प्रमाविषयः पदार्थ इत्यभिगतः। सामान्यज्ञानस्य विशेषजिज्ञासोत्पादकतया तज्जिज्ञासानिवृत्यर्थं पदार्थं विभजते — स च द्विविध इति। द्विविधः प्रकारद्वयवानित्यर्थः। कौ तौ प्रकारावित्याशङ्कायामाह — भावोऽभावश्चेति। भावत्वा-

विशेषसमवायभेदात् षड्विधः। तत्र द्रव्याणि पृथिव्यप्तेजो-वाय्वाकाशकालदिगात्ममनोभेदेन नव।

भावत्वाभिन्नप्रकारद्वयवान् पदार्थं इति भावः। विभागो नाम उद्देश्य-तावच्छेदकव्याप्यपरस्परासङ्कीर्णयावद्धर्मपुरस्कारेण धर्मिप्रतिपादनम्। प्रकृते च उद्देश्यतावच्छेदकं पदार्थत्वम्। तद्व्याप्ये भावत्वाभावत्वे। ते च परस्परासमानाधिकरणे। एतद्व्यतिरिक्तं पदार्थत्वव्याप्यं धर्मान्तरं नास्ति। अतो लक्षणसमन्वयः। प्रथमदलानुपादाने गौस्त्रि-विधः स्वदेशीयो विदेशीयः महिषश्चेत्यस्य विभागत्वाऽऽपत्तिः। द्वितीयदलानुपादाने गौस्त्रिविधः स्वदेशीयो विदेशीयः कृष्णश्चेत्यस्यापि विभागत्वाऽऽपत्तिः। यावत्पदानुपादाने गौ गौः द्विविधः कृष्णः शुक्ल-श्चेति वाक्यस्य विभागत्वाऽऽपत्तिः। एवञ्च सम्पूर्णमावश्यकं त्रिविधम्। प्रकृते भावत्वाभावत्वाभ्यां पदार्थविभागे सर्वेषामप्यन्तर्भावान्न कापि हानिः।

तत्र भावं विभजते द्रव्येत्यादिना। भावाभावयोरनन्तर्भूततया शक्तिरूपोऽतिरिक्तपदार्थः प्राभाकरैरङ्गीकृतः। नैयायिकास्तु तन्नानु-मन्वते। शक्तिवादिनामयमाशयः—ओषधिविशेषरूषितं हस्तं ज्वलनो न दहति। ओषधिविशेषासन्निधाने तु दहत्येव। तेनौषधिविशेषस्य दाहं प्रति प्रतिबन्धकत्वं वक्तव्यम्। तच्च कार्यानुकूलधर्मविघटकत्वम्। दाहरूपकार्यानुकूला वह्निनिष्ठा शक्तिरोषधिविशेषेणोपहन्यत इत्यत ओषधेः कार्यानुकूलशक्तिरूपधर्मविनाशकत्वं लब्धमेव। सा च शक्तिः गुणादावपि वर्तत इत्यतस्तस्याः न षट् भावेष्वन्तर्भावः। तस्या अत्रानुक्तेरप्रकृतविभागस्य यावद्धर्मपुरस्कारकत्वाभावाद्विभागत्वा-नुपपत्तिरिति। वस्तुतस्तु नेदं समीचीनम्। न हि प्रतिबन्धकत्वं कार्यानुकूलधर्मविघटकत्वमिति वयं ब्रूमः। अपि तु कारणीभूताभाव-प्रतियोगित्वमेव तत्। एवञ्च प्रकृते दाहं प्रत्योषधिविशेषाद्यभावस्यापि कारणत्वाङ्गीकारात् तदभावादेव तत्समवधाने दाहानुत्पत्तेरुपपादनी-यतया शक्तितदभावादिकल्पनं व्यर्थमेव। ओषधिविशेषस्य कारणी-भूताभावप्रतियोगित्वात् प्रतिबन्धकताप्युपपन्ना। विस्तरस्तु मुक्ता-वल्यादौ द्रष्टव्यः।

सुवर्णस्य तेजस्यन्तर्भावो वक्ष्यते। अन्धकारस्तु न द्रव्यम्, तत्प्रतीतेः तप्तालोकाभावेनैवोपपत्तेः। रूपवत्त्वप्रतीतिश्च तस्मिन् भ्रम एव। चलनादिप्रतीतिरपि तस्मिन्नालोकगमनाद्यौपाधिकी भ्रान्तिरेव। विस्तरस्त्वाकरे। नातो विभागव्याघातः। द्रव्यलक्षणन्तु भावकार्यसमवायिकारणत्वं द्रव्यत्वजातिमत्त्वं वा। गुणास्तु रूपरसगन्धस्पर्शसंख्यापरि-

---

प्रसङ्गसङ्गत्या द्रव्यं विभजते। प्रसङ्गो नाम स्मृतस्योपेक्षानर्हत्वम्। भावविभागे कृते शिष्टस्य द्रव्यजिज्ञासायां तन्निरूप्यते। ननु विशेषजिज्ञासायाः सामान्यज्ञानाधीनतया सामान्यलक्षणानुक्तौ सामान्यज्ञानानुदयात् प्रकृते विशेषजिज्ञासाया अप्यनुत्पत्या विभागोऽनुचित इति चेन्न। द्रव्यत्वजातिमत्त्वरूपसामान्यलक्षणस्य स्फुटत्वात्। द्रव्यत्वजातिस्तु कार्यसमवायिकारणावच्छेदकतया सिध्यति। न च परिगणनैव नवत्वसङ्ख्याधिगमे विभाजकवाक्ये नवग्रहणं निष्प्रयोजनमिति वाच्यम्। नवैव न तु ततोऽधिकं न्यूनं वेति संख्यावधारणार्थत्वात्। द्रव्यत्वं पृथिव्यादिनवान्यतमत्वव्याप्यमिति व्याप्तिलाभेनोक्तावधारणसिद्धिः। ननु सुवर्णरूपं दशमद्रव्यं विद्यत इत्युक्तव्याप्तेः व्यभिचार आपद्यते। तथा हि सुवर्णं न वाय्वादिषट्कान्तर्भूतम्, रूपवत्त्वात्। नापि पृथिव्यामन्तर्भवति, गन्धाभावात्। नापि जले नैमित्तिकद्रवत्वाश्रयत्वात्। तथा च दशमद्रव्यत्वं सिद्धमिति चेत्तत्राऽऽह —सुवर्णस्येति। सुवर्णस्य तेजस्यन्तर्भावो वक्ष्यत इति। तेजोनिरूपणावसर इति शेषः।

अथ तमोरूपं पृथिव्याद्यनन्तर्भूतं द्रव्यान्तरमनुभवसिद्धं वर्तते। नीलं तमश्चलतीति प्रतीत्या तस्य नीलरूपाश्रयत्वात् चलनक्रियाश्रयत्वाच्च द्रव्यत्वं निर्विवादम्। नाप्युक्तेषु नवसु तस्यान्तर्भावः। तथा हि तमो न पृथिव्यादिचतुष्टयान्तर्भूतं त्वगिन्द्रियाग्राह्यत्वात्। यदि तु वायोरतीन्द्रियत्वं मन्यते तदा रूपवत्त्वं हेतौ घटनीयम्। तथा च त्वगिन्द्रियाग्राह्यत्वविशिष्टरूपवत्त्वं पृथिव्यादिचतुष्टयानन्तर्भावसाधने

माणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाश्चतुर्विंशतिरिति कणादगौतममुनिमतानुसारिणः प्राञ्चः। परत्वापरत्वपृथक्त्वगुरुत्वानां निरासिष्यमाणतया विंशतिरेव गुणा इति नव्याः। विभागस्यापि निरासादेकोनविंशतिरिति नव्यतराः। संख्याया अपि व्युदासादष्टादशेति नव्यतमाः। संस्कारपरिमाणयोरपि तिर–

हेतुर्भवत्येनेति चेन्न। तमसः तेजोऽभावरूपत्वेनैवोपपत्तावतिरिक्तद्रव्यत्वकल्पने मानाभावत्। न च रूपवत्ताप्रतीतिः कर्मवत्ताप्रतीतिश्च द्रव्यत्वसाधिकेति वाच्यम्। उभयोरप्यौपाधिकत्वेन भ्रमत्वात्। प्रौढप्रकाशकतेजोऽभावः तमः। यत्किञ्चित् तेजःकणविशिष्टप्रदेश उपलभ्यमानेऽन्धकारेऽव्याप्तिवारणाय प्रकाशकपदम्। तदेतत्सर्वं प्रतिनिधायाह—अन्धकारस्त्वित्यादि। तत्प्रतीतेरन्धकारप्रतीतेरित्यर्थः।

ननु विभागस्य विशेषजिज्ञासाधीनत्वाद्विशेषजिज्ञासायाश्च सामान्यज्ञानाधीनत्वात्तदुपयोगि लक्षणकथनमन्तरेण विभागोऽयं नोपपद्यत इति चेत्तत्राह—द्रव्यलक्षणमिति। समवायिकारणत्वं हि द्रव्यस्यैव नेतरेषामिति नातिव्याप्तिः। अत्र लक्षणे भावकार्यपदे स्वभावनिरूपणपरे न तु लक्षणकोटिप्रविष्टे। तदभावेऽपि दोषाभावात्। समवायिकारणलक्षणं त्वग्रे वक्ष्यते। तस्येदानीमनुक्तत्वात् स्पष्टप्रतिपत्त्यर्थं लक्षणान्तरमाह द्रव्यत्वजातिमत्त्वमिति। एतेनोत्पन्नं द्रव्यं क्षणमगुणं निष्क्रियञ्च तिष्ठतीति न्यायेनोत्पत्तिक्षणावच्छिन्ने घटे यत्किञ्चिन्निरूपितसमवायिकारणत्वस्यासम्भवात् तत्राव्याप्तिरपि परास्ता। द्रव्यत्वं यथा जातिः तथाऽग्रे वक्ष्यते।

अथ गुणत्वजातिमत्त्वं गुणलक्षणं स्पष्टमिति कृत्वा गुणविभागप्रकारमाह—गुणास्त्विति। चतुर्विंशतिर्गुणा इति कणादगौतमादीनामृषीणां मतम्। अपरे केचित् तन्न सहन्ते। तत्सर्वं गुणनिरूपणावसरे वक्ष्यमाणमत्रैव द्योतयति परापरत्व इत्यारभ्य निरूपयिष्यन्त इत्यन्तेन भागेन।

स्कारात् षोडशैव गुणा इति स्वतन्त्राः। धर्माधर्मयोरपि प्रतिक्षेपाच्चतुर्दशेत्यतिस्वतन्त्राः। सर्वञ्चेदं गुणनिरूपणावसरे निरूपयिष्यते।

उत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमनभेदात् पञ्च कर्माणि। भ्रमणरेचनस्यन्दनोर्ध्वज्वलनतिर्यग्गमनादिकं गमनविशेष एवेति न तेषां पार्थक्यमिति सिद्धान्तः। उत्क्षेपणादेरपि गमनविशेषतया पृथग्भावाभावाद् गमनमेवैकं कर्मेति स्वतन्त्राः। सामान्यं द्विविधं, जातिरुपाधिश्चेति। जातिरपि द्विविधा, परापरभेदात्। तत्र सर्वजात्यपेक्षयाऽधिकदेशवृत्तिः परा यथा सत्ता। सा हि द्रव्यत्वाद्यपेक्षयाऽधिकदेशवृत्तिः। द्रव्य-

---

कर्माणि विभजते—उत्क्षेपणेत्यादिना। भ्रमणादीनां गमनेऽन्तर्भावान्न विभागव्याघातः। ननु उत्क्षेपणादीनामपि गमनविशेषरूपत्वादुत्क्षेपणत्वगमनत्वयोः सङ्कीर्णतयाऽस्य विभागत्वानुपपत्तिः। परस्परासङ्कीर्णयावद्धर्मपुरस्कारेण धर्मिप्रतिपादनं हि विभाग इति चेन्न। उत्क्षेपणाद्यतिरिक्तगमनस्यैव तत्रोपादानात्। नन्वेवं भ्रमणरेचनाद्यसंग्रहाद् यावद्धर्मपुरस्कारो नास्तीतीदानीमपि विभागव्याघात इति चेन्न। भ्रमणादीनां गमनेऽन्तर्भावात्। उत्क्षेपणादीनामनन्तर्भावे किं मानमिति चेदृषीणामुक्तिरेव। अत एव स्वतन्त्रेच्छस्य मुनेर्नियोगपर्यनुयोगानर्हत्वमित्युच्यते।

सामान्यं निरूपयति, सामान्यमिति। कर्मनिरूपणानन्तरं सामान्यनिरूपणेऽवसरः सङ्गतिः। प्रतिबन्धकीभूतशिष्यजिज्ञासानिवृत्ताववश्यवक्तव्यत्वमवसरः। प्रकृते च कर्मणि निरूपिते सामान्यं नाम किमिति छात्राणां जिज्ञासा समुदेत्येवेति सामान्यस्यावश्यवक्तव्यत्वमिति तत्समन्वयः। द्विविधमिति। प्रकारद्वयवदित्यर्थः। तौ प्रकारौ निर्दिशति जातिरुपाधिश्चेति। तथा च जातित्वोपाधित्वात्मकप्रकारद्वयवत्सामान्यमिति समुदितोऽर्थः। जातिरपि प्रथमं विभजते—जातिरपीति। तत्र परत्वमधिकदेशवृत्तित्वम्। तच्च सत्ताया

त्वगुणत्वादिकं हि द्रव्यगुणादिमात्रवृत्ति। सत्ता तु द्रव्यगुण–कर्मसु त्रिष्वपि वर्तत इति सा परा। द्रव्यत्वादिकं त्वपरा जातिः, सत्तापेक्षया अल्पदेशवृत्तित्वात्।

उपाधिरपि द्वेधा–सखण्डकोऽखण्डकश्च। तत्र नाना-पदार्थघटितधर्मस्सखण्डः। यथा – इन्द्रियत्वादयः। तदघटि-तोऽखण्डः। यथा – अभावत्वादयः। अन्त्यो नित्यद्रव्यवृत्ति-

---

एव। तस्याः द्रव्यादित्रिकवृत्तित्वात्। तदपेक्षया परं जात्यन्तरं नास्त्येव। शिष्टाः सर्वा अपि जातयोऽपरा एव। सर्वासामपि सत्तापेक्षया न्यूनदेशवृत्तित्वात्। वस्तुतस्तु परमपरं परापरञ्चेति त्रैविध्यं वक्तुमुचितम्। तत्र घटत्वादिजातयोऽपराः। सत्ता तु परा। द्रव्यत्वपृथिवीत्वादयस्तु घटत्वापेक्षयाऽधिकदेशवृत्तित्वात् सत्तापेक्षया न्यूनदेशवृत्तित्वाच्च परापरेति वक्तव्यम्।

उपाधिं विभजते — उपाधिरपि द्वेधा इति। सखण्डाखण्डक भेदेनोपाधेर्द्वैविध्यमिति भावः। सखण्डं लक्षयति नानेति। नानापदा–र्थघटितधर्मस्सखण्डः। उदाहरति इन्द्रियत्वमिति। इन्द्रियत्वमिति शब्देतरोद्भूतविशेषगुणानाश्रयत्वविशिष्टज्ञानकारणमनस्संयोगाश्रयत्वम्। यथा चक्षुषि शब्देतर उद्भूतविशेषगुणो नास्ति। चाक्षुषप्रत्यक्षजनक मनस्संयोगो विद्यत इति लक्षणसमन्वयः। अत्र प्रथमदलानुपादाने आत्मन्यतिव्याप्तिः। ज्ञानाद्युद्भूतविशेषगुणाश्रयत्वात्तन्निवारणम्। विशे-ष्यदलानुपादाने दिक्कालयोरतिव्याप्तिः। अतः तद्वारणाय विशेष्यदलम्। विशेषणदले शब्देतरेत्यस्यानुपादाने श्रोत्रेन्द्रियेऽव्याप्तिः। तस्य शब्द–रूपविशेषगुणाश्रयत्वात्। तन्निरासाय शब्देतरेति। चक्षुरादीनामनु-द्भूतरूपाद्याश्रयत्वात्। तेष्वव्याप्तिवारणायोद्भूतेति। चक्षुरादीनां संयोगविभागाद्याश्रयत्वात् तत्राव्याप्तिवारणाय विशेषेति। द्वितीयदले ज्ञानकारणेत्यस्यानुपादाने दिक्कालयोरपि मनस्संयोगाश्रयत्वादति–व्याप्तिः। दिङ्मनस्संयोगस्य कालमनस्संयोगस्य वा ज्ञानहेतुत्वा–भावात् तन्निवारणम्। अत्रेन्द्रियत्वशरीरे नानापदार्थघटितत्वात्

विशेषः। नित्यद्रव्येषु पार्थिवादिषु परमाणुषु, विभुषु च गगनादिषु, मनसि च व्यापकः[1] स्वस्मिन् व्यावर्तकधर्मान्तरशून्यः

सखण्डत्वम्। तदघटित इति। नानापदार्थाघटित इत्यर्थः। उदाहरति अभावत्वमिति। अत्रेदं चिन्त्यं विभागवाक्यघटकसामान्यशब्देनेन्द्रियत्वादीनां ग्रहणे 'सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः' इति कारिकाया असाङ्गत्यापत्तिः। सामान्यविशेषादीनामपि तत्तदुपाधिमत्त्वात्। अतः सामान्यशब्देन जातिरेव केवलं गृह्यते न तूपाधय इति वक्तुमुचितम्। यद्येवं भावत्वादीनामुपाधीनां विभागवाक्यानन्तर्भूनत्वाद्विभागस्य न्यूनता स्यादिति चेत् तेषां तत्तदाश्रयरूपत्वस्यैव प्राग्भिरङ्गीकारान्न दोषः। यथा घटत्वत्वं घटवृत्तित्वविशिष्टघटेतरावृत्तित्वरूपं घटत्वात्मकमेव। नव्यास्तु विषयत्वादीनां स्वरूपसम्बन्धविशेषरूपत्वमनङ्गीकृत्य पदार्थान्तरत्वमाहुः। मोक्षोपयोगिपदार्था एव निरूपिता इति न पदार्थविभागव्याघातः।

सामान्यस्य सामान्यलक्षणन्तु नित्यत्वे सत्यनेकानुगतत्वम्। अनेकानुगतत्वञ्च समवायेनैव विवक्षणीयम्। तेन घटपटान्यतरत्वादेरनेकवृत्तित्वेऽपि न दोषः। जलपरमाणुगतरूपाणां नित्यानामनेकपरमाणुवृत्तित्वेऽप्येकत्वाभावान्न दोषः। घटपटसंयोगस्यैकस्यानेकसमवेतत्वेऽपि नित्यत्वाभावान्न दोष इत्यन्यत्र विस्तरः।

क्रमप्राप्तं विशेषं निरूपयति — अन्त्य इति। अन्ते भवोऽन्त्यः। यदुत्तरं व्यावर्तकान्तरं नास्ति स इत्यर्थः। स्वतो व्यावर्तक इति यावत्। तथा हि घटयोर्भेदसाधने तत्तत्कपालसंयोगत्वं हेतुः। यथायं घटस्तस्माद्घटाद्भिद्यत एतत्कपालसमवेतत्वादिति। अयं कपालस्तस्मात्कपालाद्भिद्यत एतत्कापालिकासमवेतत्वात्। अयं द्वयणुकः तस्मात् द्वयणुकाद्भिद्यत एतत् परमाणुसमवेतत्वादिति द्वयणुकस्यापीतरभेदेऽनुमिते परमाणोरितरभेदः विशेषेणानुमीयते। नास्ति तत्रावयवान्तरकल्पना, अनवस्थापत्तेः। विशेष इतरभेदानुमितौ विशेषे एव लिङ्गम्। अयं

---

१ व्यावर्तकः

कश्चिद्धर्मोऽभ्युपेयः। अन्यथा तेषां परस्परव्यावृत्तेरसिद्धेरिति सिद्धान्तः। अतिरिक्तविशेषाभ्युपगमे तेषां परस्परव्यावर्त्तक-धर्मान्तराभ्युपगमेऽनवस्थापत्तेः स्वत एव तस्य व्यावृत्ति-र्वक्तव्या। तथा च नित्यद्रव्याणामेव स्वतो व्यावृत्तिसम्भ-वादतिरिक्तविशेषाङ्गीकारो मुधेति नव्याः। नित्यस्सम्बन्धः

विशेषः तस्माद्विशेषाद्भिद्यत एतद्विशेषात् इत्येवानुमानप्रकारः। अत एवान्त्यत्वम्। तच्च स्वतो व्यावृत्तत्वम्। विशेषस्याधारं निर्दिशति— **नित्यद्रव्यवृत्तिरिति। व्यापक इति।** उक्तेषु परमाणुप्रभृतिषु अभिव्याप्य स्थित इत्यर्थः। वस्तुतस्तु परमाण्वादीनां निरवयवत्वेन तद्वृत्तीनां अव्याप्यवृत्तित्वासम्भवात् तत्परिहारार्थं नीयमानमिदं विशेषणं चिन्त्य-प्रयोजनम्। **व्यावर्तकधर्मान्तरशून्य इति।** स्वनिष्ठेतरभेदानुमिति-जनकधर्मान्तरशून्य इत्यर्थः. तथा सति तद्धर्मेऽपीतरभेदानुमापकं धर्मान्तरं स्वीकरणीयं स्यात्। एवं क्रमेणानवस्थाऽऽपत्तिः। तदेतदाह— **अतिरिक्तेत्यादिना।**

नव्यास्तु विशेषाणामिव नित्यद्रव्याणामेव स्वतो व्यावृत्तत्व-मङ्गीकृत्य विशेषरूपं पञ्चमं पदार्थं निरास्तन्।

समवायं लक्षयति **नित्य इति** नित्यत्वे सति सम्बन्धत्वं समवायस्य लक्षणमिति भावः। अवयवावयविनोः सम्बन्धः समवायः। यथा पटस्य तदवयवतन्तूनाञ्च परस्परसम्बन्धः समवायः। एवं गुणगुणिनोस्सम्बन्धस्समवायः। तथा क्रियाक्रियावतोः (कर्मद्रव्ययोः) जातिव्यक्त्योर्नित्यद्रव्यविशेषयोश्च सम्बन्धः समवाय एव। एतेन समवायसत्वे प्रमाणमपि सूचितम्। तथा हि यथा दण्डी पुरुष इति प्रतीतिः दण्डं पुरुषं तयोः सम्बन्धञ्च विषयीकरोति। तथा शुक्लः पटः, घटश्चलति, अयं घट इति गुणक्रियाजातिविशिष्टबुद्धयोऽपि यं

*2

समवायः। स चावयवावयविनोर्गुणगुणिनोः क्रियाक्रियावतो-र्जातिव्यक्त्योर्विशेषनित्यद्रव्ययोश्च सम्बन्धः। स च सर्वत्रैक एवेति प्राञ्चः। प्रतिद्रव्यं तत्तद्रव्यसमवेताना'मनेक इति' नव्याः। संयोगवदयमप्यनित्य इति प्राभाकराः। अभावो द्विविधः, संसर्गाभावोऽन्योन्याभावश्चेति। तत्र संसर्गाभाव-स्त्रिविधः, प्रागभावप्रध्वंसाभावात्यन्ताभावभेदात्। संसर्गा-भावत्वञ्च तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वम्।

कश्चित् सम्बन्धं विषयीकुर्वन्त्येव। स सम्बन्धः समवाय इत्युच्यते। अनुमानप्रकारस्तु गुणक्रियादिविशिष्टबुद्धिः विशेषणविशेष्यसम्बन्ध-विषया विशिष्टबुद्धित्वात् दण्डी पुरुष इति विशिष्टबुद्धिवदिति। अयञ्च एक एवेति नित्यः। नव्यास्तु प्रतिद्रव्यं तत्तद् द्रव्यसमवेतानां भिन्न एव सम्बन्धः यथा घटस्य कपाले, पटस्य तन्तुषु, रक्तरूपस्य जपाकुसुमे, गमनक्रियायाः चैत्रे, घटत्वस्य घटे च सम्बन्धः भिन्न भिन्न एव। अथापि सजातीयः। यथा घटपटसंयोगस्य कपिवृक्षसंयोगस्य च भेदः। एवञ्चाऽऽश्रयभेदात् समवायभेदे सिद्धे संयोगस्येव तस्यापि ध्वंसप्रागभावावङ्गीकार्याविर्याहुः।

अभावं निरूपयति—अभवो द्विविध इति। तल्लक्षणन्तु भाव-भिन्नत्वम्। यद्येवं भेदस्याभावघटितत्वादभावस्य च भेदघटितत्वा-दन्योन्याश्रय इति चेत् सत्यम्। अभावत्वमखण्डोपाधिरिति जाति-समानः। एवञ्च नात्र दोषः। द्विविधः प्रकारद्वयवान्। प्रकार-द्वयमाह-**संसर्गाभावान्योन्याभावश्चेति**। संसर्गाभावं विभजते प्रागभाव इत्यादिना। संसर्गाभावलक्षणन्तु अन्योन्याभावभिन्नाभावत्वम्। अन्योन्याभावत्वञ्च तादात्म्यसम्बन्धावच्छिन्नाभावत्वम्। अन्योन्या-भावत्वञ्च तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वम्। यथा घटो न पट इत्यत्र तादात्म्यसम्बन्धेन घटे पटो नास्तीति प्रतीयते। येन सम्बन्धेन यदभावः प्रतीयते सः प्रतियोगिताकावच्छेदकसम्बन्धः।

तत्र घटो भविष्यतीति प्रतीतिसाक्षिको विनाशी अभावः प्रागभाव इति प्राञ्चः। नास्त्येव प्रागभाव इति नव्या वेदान्तिनश्च। घटो नश्यतीति प्रतीतिसाक्षिक उत्पत्तिमानभावः प्रध्वंसाभावः। वेदान्तिनस्तु सर्वकार्यस्य चरमक्षणसम्बन्ध एव ध्वंस इति प्राहुः। विस्तरस्तु मीमांसासाम्राज्ये गुरुचरणैः कृतस्तत्रैव द्रष्टव्यः। अनादिरनन्त इदमिह नास्तीति प्रतीतिसाक्षिकस्संसर्गाभावोऽत्यन्ताभावः। इदमिदन्नेति प्रतीतिसाक्षिकोऽन्योन्या–

यस्याभावः प्रतीयते सः प्रतियोगी। प्रकृते च तादात्म्येन पटस्याभावः घटे प्रतीयत इत्यतः तादात्म्यं प्रतियोगिताकावच्छेदकसम्बन्धः पटे च प्रतियोगिता। तथा च तादात्म्यसम्बन्धावच्छिन्नपटनिष्ठप्रतियोगिताकाभावः घटे प्रतीयत इति तत्राभावे तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वं सूपपादमेवेति लक्षणसमन्वयः। संसर्गाभावत्वञ्च यत्किञ्चित्सम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वं सूपपादमेवेति लक्षणसमन्वयः। अन्योन्याभावेऽतिव्याप्तिवारणाय सम्बन्धे तादात्म्यभिन्नत्वं विशेषणं देयम्। तादात्म्येतरसम्बन्धावच्छिन्नप्रतियोगिताकभावत्वं संसर्गाभावलक्षणम्। यथा भूतले घटो नास्तीत्यत्र संयोगसम्बन्धेन घटो न विद्यत इति प्रतीतेः संयोगसम्बन्धावच्छिन्नघटनिष्ठप्रतियोगिताकाभावस्य प्रतीयमानत्वाल्लक्षणसमन्वयो भवति। ध्वंसप्रागभावयोरपि तत्तत्प्रतियोगिसमवायिकारणवृत्तित्वात् समवायसम्बन्धावच्छिन्नप्रतियोगिताकत्वमङ्गीकरणीयमिति नातिव्याप्तिः।

प्रागभावं लक्षयति — तत्रेत्यादिना। विनाश्यभावत्वं प्रागभावस्य लक्षणमिति भावः। कार्ये जाते प्रागभावो विनश्यतीति सिद्धान्तः। उत्पत्तेः पूर्वं तादृशाभावसत्वे किं प्रमाणमिति चेत् तत्राह घटो भविष्यतीति प्रतीतिसाक्षिक इति। वेदान्तिनो नव्यनैयायिकाश्च प्रागभावं नाङ्गीकुर्वन्ति।

भावः। अत्र हि तादात्म्यसम्बन्धः प्रतियोगितावच्छेदक इति व्यवहरति। तथा हि घटः पटो न भवतीति घटे पटतादात्म्यं प्रसज्य पश्चात्पटो निषिध्यते। येन सम्बन्धेन प्रतियोगी निषिध्यते, स सम्बन्धः प्रतियोगितावच्छेदकसम्बन्धः। अत एव

प्रध्वंसाभावं निरूपयति—**घटो नश्यतीत्यादिना**। घटो नश्यती-त्यनेन तत्सत्वे मानं दर्शितम्। उत्पत्तिमानभाव इति लक्षणसमर्पकम्। उत्पत्तिमत्त्वे सत्यभावत्वं प्रध्वंसाभावस्य लक्षणम्। घटो नष्ट इति प्रतीतिः घटनाशानन्तरमेव जायत इति घटनाशस्य उत्पत्तिमत्त्वं अभावत्वञ्चेति लक्षणसमन्वयः।

अत्यन्ताभावं निरूपयति—**अनादिरनन्तेति**। अत्यन्ताभावो हि नित्यः। अतोऽनादिरनन्तश्च। तत्सत्वे इदमिह नास्तीति प्रतीतिरेव प्रमाणम्।

अत्र प्राभाकराः ध्वंसाधिकरणे प्रागभावाधिकरणे चात्यन्ताभावो न वर्तते। श्यामे घटे पाकेन रक्ते घटे न श्याम इति प्रतीतिः श्याम-रूपध्वंसमेवावगाहते। श्यामतादशायां न रक्तमिति प्रतीतिस्तु रक्तरूपप्रागभावमवगाहते। न तूभयत्राप्यत्यन्ताभावमिति वदन्ति। वस्तुनस्तु ध्वंसप्रागभावाधिकरणे अत्यन्ताभावस्य वृत्तित्वे न कमपि विरोधं पश्यामः। तत्र रक्ततायां श्यामो नास्तीति प्रतीतिः श्यामतायां रक्तो नास्तीति प्रतीतिश्च अत्यन्ताभावमेव विषयीकुरुतः न तु ध्वंस-प्रागभावौ। अन्यथा कश्चिद् घटः प्रथमं श्यामस्ततः पाकेन रक्तः पुनरपि श्यामः पुनरपि रक्तश्च पुनरपि श्यामः सञ्जात इति चेत्तत्र मध्यश्यामतादशायां पूर्वश्यामध्वंसस्य भाविश्यामप्रागभावस्य च विद्यमानत्वात् प्रागभावं ध्वंसं वा पिषयीकुर्वाणा श्यामो नास्तीति प्रतीतिरापद्यमाना कथं वार्येत। एवञ्च श्यामो नास्ति रक्तो नास्तीति प्रतीतेरत्यन्ताभावविषयकत्वमेव वक्तुं युक्तमिति पूर्वोक्तविरोधः दुरुपपादः। मीमांसकास्तु अभावानामधिकरणात्मकत्वं ब्रुवन्ति। तन्मते

भूतले घटो नास्तीत्यादौ संयोगसम्बन्धेन भूतले घटो निषिध्यत इति भूतलवृत्तिघटात्यन्ताभावप्रतियोगितावच्छेदकसम्बन्धस्सं- योगः ।

॥ इत्युद्देशग्रन्थः ॥

भूतले घटाभावः भूतलस्वरूप एव। एवं सति वायौ रूपाभावस्य वायुरुपतया वायोः चाक्षुषत्वाऽऽपत्तिः। यो गुणो यदिन्द्रियग्राह्यः तन्निष्ठा जातिः तदभावश्च तेनैव गृह्यत॰ इति न्यायेन रूपानुरोधेन रूपाभावस्य चाक्षुषत्वात्। अतोऽभावः पदार्थान्तरमेवेति वक्तव्यम्।

इत्युद्देशग्रन्थस्य व्याख्या समाप्ता।

अथ साधर्म्यवैधर्म्यप्रक्रिया ॥

सप्तानामपि पदार्थानां साधर्म्यं ज्ञानविषयत्ववस्तुत्वादि । द्रव्यादीनां पञ्चानां भावत्वे सत्यनेकत्वम् । समवायस्य भावत्वेऽपि नानेकत्वम् । अभावस्यानेकत्वेऽपि न भावत्वम् । सामान्यादीनाञ्चतुर्णां जातिशून्यत्वम् । द्रव्यादीनां त्रयाणां सत्तावत्त्वजातिमत्त्वे । गुणादीनां षण्णां निर्गुणत्वं द्रव्यान्य-

---

एवं पदार्थान् नामतो निरूप्य साधर्म्यं वक्तुमारभते—सप्ताना-मिति । समानो धर्मो येषां ते सधर्माः । तेषां भावः साधर्म्यम् । स च समानधर्म एव । विशिष्टाद् भावप्रत्ययो विशेषणमभिसंधत्त इति न्यायात् । ज्ञानविषयवस्तुत्वं सप्तस्वपि पदार्थेषु वर्तत इति लक्षण-समन्वयः । ज्ञानविषयत्वमात्रस्य लक्षणत्वे दोषाभावाद् वस्तुपद-मनर्थकम् । अत एव कारिकावल्यां 'सप्तानामपि साधर्म्यं ज्ञेयत्वादिक-मुच्यत' इति ।

द्रव्यादीनां षण्णां भावत्वं साधर्म्यं स्पष्टमिति कृत्वा पञ्चानामाह—द्रव्यादीनामिति । भावत्वमात्रोक्तौ समवायेऽतिव्याप्तिः । अतः दलद्वयमप्यावश्यकमेव । यद्यप्याकाशकालदिक्ष्वनेकत्वं नास्तीति तत्राव्याप्तिः तथाप्यनेकभाववृत्तिपदार्थविभाजकोपाधिमत्त्वं इत्येता-वत्पर्यन्तं विवक्षणेनोक्तदोषपरिहारः । एवं समवायित्वमपि साधर्म्या-न्तरं वक्तुं शक्यम् । समवायसम्बन्धेन वृत्तिमत्त्वं तदर्थः । गुण-कर्मसामान्यविशेषः समवायसम्बन्धेनैव द्रव्यादिषु वर्तन्त इति लक्षण-समन्वयः । द्रव्येऽप्यवयवेषु समवायसम्बधेनावयविनामुत्पत्तेरङ्गी-करणान्नाव्याप्तिः । ननु द्रव्यपरमाणूनामाकाशकालदिगात्मनाञ्च कुत्रापि समवायेन वृत्तित्वं न सम्भवति । एवञ्च तत्राव्याप्ति स्यादिति चेन्न । समवायिवृत्तिपदार्थविभाजकोपाधिमत्त्वस्य विवक्षितत्वात् । अत एव 'द्रव्यादयः पञ्चभावा अनेके समवायिन' इति विश्वनाथ-

त्वञ्च। समवायिकारणत्वं द्रव्याणाम्। गुणकर्मणोरेवा-समवायिकारणत्वम्। ननु किमिदं कारणत्वम्। उच्यते। अन्यथासिद्धिशून्यत्वे सति नियतपूर्ववर्तित्वम्। यथा पटं प्रति

पञ्चाननोक्तं सङ्गच्छते। द्रव्यादीनाञ्चतुर्णां साधर्म्यं तु कपालसमवेतवृत्ति पदार्थविभाजकोपाधिमत्त्वम्। कपालसमवेतः घटः रूपं चलनादिक्रिया जातिः। तद्वृत्तयः द्रव्यत्वगुणत्वकर्मत्वसामान्यत्वरूपाः पदार्थविभाजकोपाधयः क्रमेण द्रव्यादिषु चतुर्षु विद्यन्त इति लक्षण-समन्वयः। कपालसमवेतेत्युक्त्या विशेषव्यावृत्तिः।

द्रव्यादीनां त्रयाणान्तु सत्तावत्त्वम्। द्रव्यगुणयोस्तु नित्यानित्योभयभाववृत्तिपदार्थविभाजकोपाधिमत्त्वम्। द्रव्यत्वं हि नित्येष्वाकाशादिषु अनित्येषु घटादिषु च वर्तत इति नित्यानित्योभय-भाववृत्तिः पदार्थविभाजकोपाधिः। तद्वत्त्वञ्च सर्वेष्वपि द्रव्येषु। एवं गुणत्वमपि नित्येषु ईश्वरज्ञानादिष्वनित्येषु रूपादिषु च वर्तत इति नित्यानित्योभयभाववृत्तिपदार्थविभाजकोपाधिः। तद्वत्त्वं सर्वेष्वपि गुणेष्विति तत्रापि लक्षणसमन्वयः। कर्मत्वस्यानित्यमात्रवृत्तित्वात् सामान्यत्वविशेषत्वसमवायत्वानां नित्यमात्रवृत्तित्वादभावस्य भावावृत्तित्वात् तेषां नित्यानित्योभयभाववृत्तिपदार्थविभाजकोपाधित्वं नास्तीति न तेष्वतिव्याप्तिः। द्रव्यमात्रस्य तु साधर्म्यमग्रे वक्ष्यते। गुणादीनां षण्णां निर्गुणत्वं निष्क्रियत्वं वा साधर्म्यम्। द्रव्यस्यैव गुणाश्रयत्वं क्रियाश्रयत्वञ्चेति गुणादीनां गुणाभावत्वं क्रियाभावत्वञ्च सिद्धमेव।

कर्मादीनां पञ्चानां तु नित्यानित्योभयभावावृत्तिपदार्थविभाजको-पाधिमत्त्वम्। विशेषादीनां त्रयाणान्तु कपालसमवेतावृत्तिपदार्थ-विभाजकोपाधिमत्त्वम्। समवायाभावयोस्तु समवायरहितत्वम्। तदेतत्सर्वं स्पष्टमिति कृत्वा द्रव्यमात्रस्य लक्षणं वक्तुमुपक्रमते—समवायिकारणत्वमिति। समवायिकारणत्वं द्रव्याणां लक्षणमिति भावः। किमिदं समवायिकारणत्वमिति चेदग्रे वक्ष्यते। गुणकर्मणोरेव असम-

तन्त्वादेः । नियतपूर्ववर्तित्वमात्रं तत्पटव्यक्तिं प्रति रासभादेरप्यस्ति यद्यपि, तथापि तस्यान्यथासिद्धत्वान्न तत्पटव्यक्तिं प्रति कारणत्वम् । अन्यथासिद्धिस्तु अवश्यकल्प्यनियतपूर्ववर्तिन एव 'कार्य[१]स्य सम्भ'वे तत्सहभूतत्वम् । यथा पटं प्रति रासभादेः । पटान्तरेऽवश्यकल्प्यनियतपूर्ववर्तिताकैस्तन्त्वादिभिरेव तत्पटव्यक्तेरपि सम्भवे रासभो न कारणमिति । तच्च कारणं त्रिविधं, समवायिकारणत्वासमवायिकारणत्वनिमित्तकारणत्व-

---

वायिकारणत्वम् । तत्र कारणत्वं निरूपयति—**अन्यथासिद्धिरित्यादिना।** अन्यथासिद्धिशून्यत्वे सति नियतपूर्ववर्तित्वं कारणत्वमिति भावः। लक्षणसमन्वयं करोति—**यथा पटं प्रतीति** । पटं प्रति तन्त्वादेः नियतपूर्ववर्तित्वं वर्तते । अन्यथासिद्धिशून्यत्वञ्च । अतो लक्षणसमन्वयः। यद्यपि कश्चन पटः रासभानीततुरीतन्त्वादिना निर्मितस्तत्र तत्पटव्यक्तिं प्रति रासभस्यापि नियतपूर्ववर्तित्वं वर्तत इति तस्य कारणत्वापत्तिः। तथापि रासभं विनापि तत्पटोत्पादसम्भवात् रासभस्यान्यथासिद्धत्वात् नोक्तदोष । अत एवान्यथासिद्धिशून्यत्वं कारणत्वशरीरे निवेशितम् । अथ का नाम अन्यथासिद्धिरिति चेदाह—**अन्यथासिद्धिस्त्विति** । अवश्यक्लृप्तनियतपूर्ववर्तिना एव कार्यसंभवे तत्सहभूतत्वमन्यथासिद्धत्वम् । तच्च रासभादौ विवृणोति — **यथा पटम्प्रतीत्यादिना।**

कारणं विभजते—**तच्च कारणमिति**। समवायिकारणमसमवायिकारणं निमित्तकारणमिति त्रिविधमिति भावः। तत्र प्रथमं लक्षयति - **समवायेन कार्याधारत्वमिति** । आद्यं समवायिकारणत्वम् । **अयम्भावः** — यत्र कार्यं समवायेनोत्पाद्यते तत् तत्कार्यम्प्रति समवायिकारणमिति । यथा पटम्प्रति तन्तोः समवायिकारणत्वमिति शेषः। **अयमत्र निष्कर्षः**। समवायसम्बन्धेन कार्यम्प्रति तादात्म्येन द्रव्यं कारणमिति । एवञ्च समवायसम्बन्धावच्छिन्नकार्यत्वावच्छिन्नकार्यता-

---

१ 'र्यंसम्भ'

भेदात्। तत्र समवायेन कार्याधारत्वमाद्यम्। यथा पटम्प्रति तन्तोः। तन्तौ हि पटः समवायसम्बन्धेन वर्तते, न वेमादिषु। अतो भवति पटं प्रति तन्तुः समवायिकारणम्। कार्यैकार्थ-कारणैकार्थान्यतरप्रत्यासत्या कार्यजनकत्वं द्वितीयम्। यथा पटम्प्रति तन्तुसंयोगस्य। तस्य हि कार्येण पटेन सहैकस्मि-

---

निरूपिततादात्म्यसम्बन्धावच्छिन्नकारणता समवायिकारणता। सा च द्रव्येष्वेव। उक्तकार्यकारणभावात्। तदनङ्गीकारे तु नीलरूपे नीलरूपापत्तिः कथं वार्यताम्। ननु समवायेन नीलरूपं प्रति स्वसमवायिसमवेतत्वसम्बन्धेन नीलरूपं कारणमिति कार्यकारणभावाङ्गीकारेणैव नीले नीलोत्पत्तिर्वार्यत इति चेत्सत्यम्। समवायेन घटम्प्रति तादात्म्येन कपालस्य समवायेन पटम्प्रति तन्तूनाञ्च कारणत्वमभ्युपेयमेव। एवं रूपरसादीन् प्रति तदाश्रयस्य कारणत्वं वक्तव्यम्। क्रियां प्रति च तदाश्रयद्रव्यस्य कारणता दुर्निवारा। तथा च यद्विशेषयोः कार्यकारणभावोऽसति बाधके तत्सामान्ययोरपीति न्यायेन कारणसामान्यस्य कार्यस्य च मिथः कार्यकारणभावो लब्ध इति। एवञ्च समवायसम्बन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकारणत्वं द्रव्यस्यैवेति पुर्वोक्तं सङ्गच्छते। तादृशकारणतावच्छेदकतया द्रव्यत्वजातिसिद्धिः। यथा समवायसम्बन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकारणता यत्किञ्चिद्धर्मावच्छिन्ना कारणतात्वात् घटनिरूपितदण्डनिष्ठकारणतावदिति।

असमवायिकारणं लक्षयति–कार्यैकार्थेत्यादिना। कार्यैकार्थकारणैकार्थान्यतरप्रत्यासत्या कार्यजनकत्वं द्वितीयमसमवायिकारणत्वमिति भावः। अयमभावः—समवायसम्बन्धेन कार्यं प्रति समवायस्वसमवायिसमवेतत्वान्यतरसम्बन्धेन गुणकर्मणीकारणे। यथा घटं प्रति कपालद्वयसंयोगः कारणम्। घटः कपालयोः संयोगेन जायते। तत्र संयोगोऽपि समवायेन वर्तत इति कार्यकारणभावसमन्वयः। एव घटरूपं प्रति कपालरूपमसमवायिकारणं भवति। घटरूपं

स्तन्तुरूपेऽर्थे प्रत्यासत्तिर्विद्यते। अतः कार्यैकार्थप्रत्यासत्या पट-जनकत्वात्पटं प्रत्यसमवायिकारणं तन्तुसंयोगः। यथा वा पटरूपं प्रति तन्तुरूपस्य। तस्य हि पटरूपकारणेन पटेन सहैकस्मिंस्तन्तुरूपेऽर्थे प्रत्यासत्तिरस्ति। अतस्तया प्रत्यासत्या पटरूपजनकत्वात् तन्तुरूपं पटगतरूपं प्रत्यसमवायिकारणम्। एतदुभयभिन्नत्वे सति कारणत्वं निमित्तम्। यथा पटं

घटे समवायसम्बन्धेन जायते। कपालरूपस्य समवायी कपालः। तत्तत्समवेतो घट इति स्वसमवायिसमवेतत्वसम्बन्धेन घटम्प्रति कारणत्वात् समवायसम्बन्धावच्छिन्नघटत्वावच्छिन्नकार्यतानिरूपित-समवायसम्बन्धावच्छिन्नकारणता सम्भवतीति तस्यापि घटनिरूपिता-समवायिकारणत्वापत्तिः। न चेष्टापत्तिः। असमवायिकारणनाशे द्रव्यनाशाङ्गीकारेण दण्डकपालसंयोगनाशे घटनाशापत्तेरिति चेन्न। तत्तन्निरूपितासमवायिकारणलक्षणस्य पृथक् पृथक् वक्तव्यतया घटा-समवायिकारणलक्षणे दण्डकपालसंयोगाभिन्नत्वस्यापि निवेशनीयत्वात्। न च सामान्यलक्षण एव निमित्तकारणसमवायिकारणसंयोगभिन्नत्वं दीयतामिति वाच्यम्। तथा सति दण्डघटसंयोगम्प्रति दण्डकपाल-संयोगस्यासमवायिकारणत्वानापत्तेरिति दिक्।

अथ निमित्तकारणं लक्षयति—**एतदित्यादिना**। एतदुभयभिन्नत्वे सति कारणत्वं निमित्तत्वम्। समवायिकारणासमवायिकारणभिन्नं कारणं निमित्तकारणमिति भावः। उदाहरति यथा—**पटं प्रतीति**। सर्वेषामपि भावानां उक्तत्रिविधकारणजन्यत्वं नियतमेव। अभावस्य तु निमित्तकारणमात्रजन्यत्वम्। तस्य क्वचिदपि समवायेनावृत्तेः। एतत्सर्वं भावकार्ये एवेत्यादिना प्राञ्च इत्यन्तेन ग्रन्थेन। **नव्यास्त्विति। क्वचिदिति**। परमाणुद्वयसंयोगस्य भावकार्यस्यासमवायिकारणजन्यत्वं दुरुपपादमिति नव्यानामाशयः।

एवं कारणत्वं निरूप्य प्रक्रान्तं साधर्म्यं निरूपयति—**अणुपरिमाणभिन्नानामिति**। अणुपरिमाणव्यतिरिक्तानां सर्वेषामपि

प्रति तुरीवेमादेः। भावकार्य एवास्य त्रिविधकारणस्यापेक्षा। अभावस्य तु निमित्तमात्रापेक्षैव। तस्य क्वचिदप्यसमवायेनाद्यद्वयासम्भवादिति प्राञ्चः। नव्यास्तु भावकार्येऽपि न त्रिविधकारणापेक्षानियमः क्वचिदसमवायिकारणाभावेऽपि कार्योत्पत्तिसम्भवादित्याहुः। अणुपरिमाणभिन्नानां कारणत्वम्।

कारणत्वं लक्षणमिति भावः। अणुपरिमाणं तु कस्यापि न कारणम्। न च घटगतपरिमाणं प्रति यथा कपालपरिमाणस्यासमवायिकारणत्वं तथा द्व्यणुकपरिमाणस्य त्र्यणुकपरिमाणं प्रति परमाणुपरिमाणस्य द्व्यणुकपरिमाणं प्रति चासमवायिकारणत्वं सुवचमिति वाच्यम्। तथा सति त्रसरेणोः अप्रत्यक्षत्वाऽऽपत्तेः। प्रत्यक्षं प्रति महत्वस्य कारणत्वात्। परिमाणञ्च स्वसजातीय स्वोत्कृष्टपरिमाणजनकमिति नियमः। यथा कपालपरिमाणं महत्वं घटे स्वसजातीयं स्वोत्कृष्टञ्च महत्वमुत्पादयतीति। द्व्यणुकपरिमाणस्य त्रसरेणुपरिमाणम्प्रति असमवायिकारणत्वे त्र्यणुकपरिमाणस्याणोः अणुतरमुत्कृष्टमिति न्यायेनाणुतरत्वाऽऽपत्तिः। अत एव परमाणुपरिमाणस्य द्व्यणुकपरिमाणं प्रत्यपि न कारणत्वम्। न चाऽऽकाशकालदिग्गतस्य परममहत्वस्य न किञ्चित्प्रत्यपि कारणत्वमिति तत्राव्याप्तिरिति वाच्यम्। अणुपरिमाणभिन्नमित्यत्र परममहत्वस्यापि लक्षणया अलक्ष्यकोटौ ग्रहणात्। न च परमाणुगतसामान्यस्यापि कारणत्वं दुर्वचमिति तत्राव्याप्तिरिति वाच्यम्। पूर्ववत्तस्यापि अलक्ष्यकोटावन्तर्भावात्। न च द्व्यणुकोऽप्रत्यक्षोऽणुत्वादित्यनुमानेन द्व्यणुकेऽप्रत्यक्षत्वसाधनेऽणुत्वस्य कारणत्वादणुपरिमाणेऽतिव्याप्तिरिति वाच्यम्। अनुमितौ लिङ्गज्ञानस्यैव कारणत्वं न तु ज्ञायमानलिङ्गस्येति व्यवस्थापयिष्यमाणत्वात्। एवञ्च प्रकृते अणुत्वज्ञानस्यैवानुमापकत्वं न त्वणुत्वस्येति न दोषः। एवमेव योगिप्रत्यक्षे विषयस्य न कारणत्वं सामान्यलक्षणयाऽलौकिकप्रत्यक्षे ज्ञायमानसामान्यस्य न प्रत्यासत्तित्वमित्येतन्मतानुसारेणैव एतल्लक्षणनिरूपणमिति दिक्।

नवानामपि द्रव्याणां गुणाश्रयत्वम्। नित्यद्रव्यभिन्नानां वृत्तिमत्त्वम्। गगनादीनां पञ्चानां द्रव्यानारम्भकद्रव्यत्वं स्पर्शशून्यत्वञ्च। पृथिव्यादीनाञ्चतुर्णां स्पर्शवत्त्वद्रव्यारम्भकत्वे।

इदन्तु बोध्यम्। घटात्प्रभृति त्र्यणुकपर्यन्तं तत्तत्परिमाणं प्रति तत्तत्समवायिकारणगतपरिमाणमसमवायिकारणमिति वक्तुं शक्यम्। त्र्यणुकपरिमाणस्य तु उक्तरीत्या त्र्यणुकपरिमाणजन्यत्वं दुर्वचमेव। तर्हि तस्यासमवायिकारणत्वन्न स्यादिति चेत् द्व्यणुकसंख्यायाः त्र्यणुकपरिमाणं प्रति परमाणुसंख्यायाः द्व्यणुकपरिमाणं प्रति चासमवायिकारणत्वमिति गृहाण।

अथ द्रव्यमात्रस्य साधर्म्यं निरूपयितुं प्रारभते—**नवानामिति**। गुणाश्रयत्वं द्रव्यमात्रस्य साधर्म्यम्। सर्वेष्वपि द्रव्येषु वर्तत इति लक्षणसमन्वयः। ननु उत्पन्नं द्रव्यं क्षणमगुणं निष्क्रियञ्च तिष्ठतीति सर्वनैयायिकसम्मतम्। एवञ्चोत्पत्तिकालावच्छिन्ने घटे गुणाभावात् तत्राव्याप्तिः। न च द्वितीयक्षणे तत्र गुणोत्पत्त्या गुणाश्रयत्वं प्रथमक्षणेऽपि वर्तत इति वाच्यम्। उत्पन्नविनष्टे घटे तस्य दुरुपपादत्वात्। एवञ्च गुणाश्रयत्वलक्षणमव्याप्तिग्रस्तमिति चेन्न। गुणसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। गुणसमानाधिकरणेति स्वरूपकथनमात्रम्। सत्तामादाय गुणादावतिव्याप्तिवारणाय द्रव्यत्वव्याप्य इति। नव्यास्तु उत्पन्नविनष्टघटस्य तुरगशृङ्गायमानत्वाद् गुणाश्रयत्वमात्रं लक्षणमस्तु इत्याहुः। युक्तञ्चैतत्। असमवायिकारणनाशात् द्रव्यनाश इति असमवायिकारणस्य च कार्यकालोक्त्या कारणत्वम्। तथा च कपालद्वयसंयोगनाशाद् घटनाशोऽभ्युपेयः। कपालद्वयसंयोगस्तु घटोत्पत्तिक्षणेऽपि वर्तत इति तन्नाशरूपकारणाभावात् द्वितीयक्षणे कथं घटो नश्येदिति।

नित्येति। आकाशकालदिगात्ममनांसि परमाणवश्च नित्यद्रव्याणि। तद्भिन्नानां वृत्तिमत्त्वं साधर्म्यम्। ननु किमिदं वृत्तिमत्त्वन्नाम। यत्किञ्चित्सम्बन्धावच्छिन्नाधेयतेति चेत् तत्परमाणुत्वादिष्वपि सम्भवतीति तत्रातिव्याप्तिरिति चेदत्रोच्यते।

पृथिव्यादिगगनान्तानां भूतत्वम्। तच्च बहिरिन्द्रियग्राह्य-विशेषगुणवत्त्वम्। रूपरसगन्धस्पर्शशब्दा हि पृथिव्यादीनां विशेषगुणाः। ते च चक्षुरादिभिर्बहिरिन्द्रियैर्ग्रहीतुं योग्याः।

वृत्तिनियामकसम्बन्धावच्छिन्नाधेयतैव वृत्तिमत्त्वम्। येन सम्बन्धेन तद्वानिति प्रतीतिर्जायते स सम्बन्धो वृत्तिनियामकसम्बन्धः। न केनचित् सम्बन्धेन परमाणुस्तत्रास्तीति प्रतीतिरनुभवसिद्धा। अतः परमाणुगताऽऽधेयता न वृत्तिनियामकसम्बन्धावच्छिन्ना। रूपसमवायवान् घटः घटाभाववद्भूतलमित्यादिप्रतीतीनां सर्वानुभवसिद्धतया समवायाभावादिप्रतियोगिकस्वरूपसम्बन्धस्य वृत्तिनियामकत्वं स्वीकर्तव्यमेव। एवञ्च समवायसंयोगादिरूपवृत्तिनियामकसम्बन्धावच्छिन्नाऽऽधेयता वृत्तिमत्त्वमिति निष्कृष्टतया वक्तुं शक्यते। तच्च आकाशपरमाण्वादिषु नित्यद्रव्येषु नास्तीति न तत्रातिव्याप्तिः। तद्भिन्नेषु सर्वत्र विद्यत एवेति नाव्याप्तिरिति संक्षेपः।

गगनादीनामिति। आकाशकालदिगात्ममनसामित्यर्थः। द्रव्यानारम्भकत्वे सति द्रव्यत्वं तेषां साधर्म्यम्। द्रव्यानारम्भकत्वं नाम द्रव्यनिरूपितसमवायिकारणत्वाभावः। न ह्याकाशादिषु यत्किञ्चित् द्रव्यनिरूपितसमवायिकारणत्वं सम्भवति। अतो लक्षणसमन्वयः। अत्र द्वितीयदलानुपादाने गुणादावतिव्याप्तिः। प्रथमदलानुपादाने पृथिव्यादावतिव्याप्तिः।

ननु अन्त्यावयविनो घटस्य यत्किञ्चित् द्रव्यनिरूपितसमवायिकारणत्वं नास्ति द्रव्यत्वञ्चास्तीति तत्रातिव्याप्तिरिति चेन्न। द्रव्यनिरूपितसमवायिकारणतानवच्छेदकद्रव्यविभाजकोपाधिमत्त्वस्य विवक्षितत्वात्।

साधर्म्यान्तरमाचष्टे—**स्पर्शशून्यत्वमिति**। स्पर्शो हि पृथिव्यादिचतुष्टयस्यासाधारणो गुण इति लक्षणसमन्वयः। एतेन पृथिव्यादीनां चतुर्णां स्पर्शवत्त्वं द्रव्यारम्भकत्वञ्च साधर्म्यमिति लब्धम्। तदेतदाह —**पृथिव्यादीनामिति**।

गगनपरित्यागेन मनस्सहितानामेषां मूर्तत्वक्रियावत्त्ववेगवत्त्वानि। मूर्तत्वञ्चापकृष्टपरिमाणत्त्वम्। गगनादीनामात्मान्तानां सर्वमूर्तद्रव्यसंयोगित्वपरममहत्वे । आकाशाऽऽत्मनोरव्याप्य

पृथिव्यादिगगनान्तानां भूतत्वं साधर्म्यम्। तच्चेति भूतत्वञ्चेत्यर्थः। रूपं चक्षुषा। रसो रसनया। गन्धो घ्राणेन। स्पर्शः त्वचा। शब्दः श्रवणेन चेष्यन्त इति। रूपरसगन्धस्पर्शाः बहिरिन्द्रियग्राह्याः विशेषगुणाः। तद्वत्त्वञ्च पृथिव्यादिपञ्चक इति लक्षणसमन्वयः। संयोगस्य बहिरिन्द्रियग्राह्यस्य गगनादावपि विद्यमानत्वात् तत्रातिव्याप्तिवारणाय विशेषगुणेति। संयोगो न विशेषगुणः।

गगनेति। गगनपरित्यागेन मनःसहितानामेषां पृथिव्यप्तेजोवायुमनसामित्यर्थः। मूर्तत्वं क्रियावत्त्वं वेगवत्त्वञ्च। मूर्तत्त्वन्नाम अपकृष्टपरिमाणवत्त्वम्। गगनादीनाञ्चतुर्णां परिमाणस्य सर्वोत्कृष्टत्वेन तदपेक्षयापकृष्टपरिमाणवत्त्वं इतरेषां द्रव्याणां स्पष्टमेव। एतेन गगनादीनाञ्चतुर्णामुत्कृष्टपरिमाणवत्त्वं साधर्म्यमित्युक्तप्रायम्। तदेव विभुत्वन्नाम। अथवा सर्वमूर्तद्रव्यसंयोगित्वं क्रियारहितत्वं वा विभुत्वमिति वक्तुं शक्यम्। न केवलं क्रियारहितत्वं लक्षणं भवति विभूनाम्। गुणादिष्वतिव्याप्तेः। अपि तु द्रव्यत्वमपि लक्षणकोटौ निवेशनीयम्। तथा च क्रियारहितत्वे सति द्रव्यत्वं आकाशकालदिगात्मनां साधर्म्यमिति स्पष्टमेव।

अथ विभुषु आकाशाऽऽत्मनोः साधर्म्यं विविनक्ति। अव्याप्यवृत्तिविशेषगुणवत्त्वम्। अव्याप्यवृत्तिः यो विशेषगुणः तद्वत्त्वमित्यर्थः। अव्याप्यवृत्तित्वञ्च स्वाभावसामानाधिकरण्यम्। यथा वृक्षे मूलावच्छेदेन कपिसंयोगाभावः। शाखावच्छेदेन कपिसंयोगो वर्तत इति कपिसंयोगाभावसामानाधिकरण्यं कपिसंयोगे सूपपादमिति संयोगस्याव्याप्यवृत्तित्वं स्पष्टमेव। एवमेव मठावच्छिन्नाकाशे शब्दे जायमाने इतरगृहावच्छिन्ने गगने तदभावोऽप्युपलभ्यत इति शब्दस्य तदभावसामानाधिकरण्याद् अव्याप्यवृत्तित्वं स्पष्टमेव। एवमात्मन्यपि शरीरावच्छिन्ने ज्ञानादिकं जायते। इतरावच्छिन्ने तु नोत्पद्यत इति

वृत्तिविशेषगुणवत्त्वम्। आकाशस्य विशेषगुणश्शब्दः। स च विभौ तस्मिन्न[1]सर्वप्रदेशे जायते। भेरीमृदङ्गादिप्रदेशं विहायान्यत्रानुपलम्भात्। एवमात्मन्यपि विभौ ज्ञानादिर्विशेषगुणो न सर्वत्रोत्पद्यते, किन्तु शरीराद्यवच्छेदेनेति भवति ज्ञानादि-

---

ज्ञानादीनां स्वभावसामानाधिकरण्यात् अव्याप्यवृत्तित्वाद् विशेषगुणत्वाच्चाऽऽत्मनि तादृशबुद्ध्यादिमत्त्वात् लक्षणसमन्वयः। संयोगविभागयोरव्याप्यवृत्तित्वेऽपि विशेषगुणत्वाभावात् पृथिव्यादीनां तद्वत्त्वेऽपि नातिव्याप्तिः।

विश्वनाथपञ्चाननस्तु क्षणिकविशेषगुणवत्त्वमपि आकाशाऽऽत्मनोः साधर्म्यं ब्रूते। क्षणिकत्वञ्च तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम्। शब्दो हि क्षणिकः। भेरीदण्डसंयोगेन भेर्यवच्छिन्ने आकाशे प्रथममेकः शब्दो जायते। तदुत्तरक्षणे तत्सजातीयोऽपरः शब्दः जायते। एवं क्रमेण वीचीतरङ्गन्यायेन कदम्बमुकुलन्यायेन वा शब्दात् शब्दान्तरोत्पत्तिर्भवतीति सिद्धान्तः। तत्र प्रथमशब्दस्य द्वितीयशब्देन तृतीयक्षणे नाशो भवति। एवञ्च तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वं शब्दस्य सिद्धमिति तद्वत्त्वादाकाशे लक्षणसमन्वयः। एवमात्मन्यपि। एवं ज्ञानस्यापि तदुत्तरक्षणजायमानगुणनाश्यत्वात् तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वं तस्य विद्यत इति क्षणिकत्वं तद्वत्त्वादात्मनि लक्षणसमन्वयश्च।

अथ ज्ञानादीनां तृतीयक्षणे नाशे किं गमकमिति चेदत्र ब्रूमः। प्रतियोगितासम्बन्धेन योग्यविभुविशेषगुणनाशं प्रति स्वाव्यवहितपूर्वत्वस्वसामानाधिकरण्योभयसम्बन्धेन योग्यविभुविशेषगुणः कारणम्। यथा प्रथमशब्दोत्पत्त्यनन्तरं द्वितीयशब्दे उत्पन्ने प्रथमशब्दो नश्यति। तथा च प्रथमशब्दे प्रतियोगितासम्बन्धेन शब्दध्वंसो भवति। तत्र द्वितीयशब्दः स्वसामानाधिकरण्यस्वाव्यवहितपूर्वत्वोभयसम्बन्धेन वर्तत इति प्रथमशब्दस्य द्वितीयशब्दनाश्यत्वं लब्धमेव। एवं ज्ञानादिष्वपि द्रष्टव्यमित्यन्यत्र विस्तरः।

---

१ 'न सर्वं'

रव्याप्यवृत्तिः। दिक्कालमनसां विशेषगुणानाश्रयद्रव्यत्वम्। दिक्कालयोस्सर्वोत्पत्तिमन्निमित्तद्रव्यत्वम्। पृथिवीजलयोर्गुरुत्वरसवत्त्वे। पृथिवीतेजसोर्नैमित्तिकद्रवत्वम्। महीपवनयो-

---

दिक्कालमनसामिति। विशेषगुणानाश्रयत्वम्। दिशि काले मनसि च विशेषगुणाः न सन्ति। विशेषगुणानाश्रयत्वं द्रव्यत्वञ्च तत्रेति लक्षणसमन्वयः। द्रव्यत्वोक्तेः गुणादिव्यावृत्तिः। विशेषेत्युक्त्या असम्भववारणम्। एतेनेतरेषां द्रव्याणां विशेषगुणाश्रयत्वं साधर्म्यमिति व्यज्यते। उक्तञ्चाऽऽत्मनो भूतवर्गश्च विशेषगुणयोगिन इति। दिक्कालयोरिति। कालः सर्वाऽऽधार इत्युपगमादिति भावः।

गुरुत्ववत्त्वं रसवत्त्वञ्च पृथिवीजलयोः साधर्म्यम्। आद्यपतनासमवायिकारणं हि गुरुत्वम्। पतनञ्च पृथिवीजलयोरेव सम्बध्यत इति तत्र लक्षणसमन्वयः। पृथिव्यां षड्विधरसवत्त्वात् जले मधुररसस्य सत्त्वात् च लक्षणसङ्गतिः। ननु सुरभ्यसुरभ्यवयवारब्धघट इव नानारसवदवयवारब्धायां पृथिव्यां रसाभावात् तत्राव्याप्तिः। न च नानावर्णाश्रयतन्त्वारब्धपटे चित्ररूपमिव नानारसाश्रयारब्धायां पृथिव्यां चित्ररसोऽङ्गीक्रियतामिति वाच्यम्। दृष्टान्तवैषम्यात्। पटे रूपानङ्गीकारे तस्याप्रत्यक्षत्वाऽऽपत्तिः। चाक्षुषप्रत्यक्षं प्रति उद्भूतरूपस्य कारणत्वात्। अत एव चित्ररूपमङ्गीक्रियते। व्यञ्जनोपदंशादौ तु अवयवरसैनैवोपपत्त्या समुदाये चित्ररसाङ्गीकारे प्रमाणाभावात् इति चेन्न। रससमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य लक्षणत्वेन विवक्षितत्वात्। रससमानाधिकरणे द्रव्यत्वव्याप्यजाती पृथिवीत्वजलत्वे सर्वास्वपि पृथिवीषु पृथिवीत्वं वर्तत इति नोक्ताव्याप्तिः। जले तु मधुररस एवेति व्यवस्थापयिष्यते।

नैमित्तिकद्रवत्वं पृथिवीतेजसोः साधर्म्यम्। घृतजतुप्रभृतिषु सुवर्णादिषु च अग्निसंयोगे सति द्रवत्वोपलम्भात् लक्षणसमन्वयः। यद्यपि घटपटादौ पृथिव्यां वह्नौ च तेजसि द्रवत्वं नास्ति तथापि नैमित्तिकद्रवत्ववद्वृत्तिजलावृत्तिजातिमत्त्वस्य विवक्षितत्वेन नाव्याप्तिः। द्रव्यत्वसत्तादिकमादाय जलादावतिव्याप्तिवारणाय जलावृत्तीति।

रनुष्णाशीतस्पर्शवत्त्वमित्यादि। केवलान्वयिधर्मं विहाय यस्य यत्साधर्म्यं, तत् तदितरस्य वैधर्म्यम्। केवलान्वयिधर्मस्य तु न वैधर्म्यं, प्रपञ्चमात्रस्यैव प्रमेयत्वाद्वस्तुत्वाच्च।

॥ इति साधर्म्यवैधर्म्यप्रक्रिया ॥

सुवर्णपवनान्यतरत्वमादाय पवनेऽतिव्याप्तिवारणाय जातिमत्त्वमिति। वाय्वादावतिव्याप्तिवारणाय नैमित्तिकद्रवत्ववद्वृत्तीति। वस्तुतस्तु नैमित्तिकेति मास्तु। द्रवत्ववद्वृत्ति — जलावृत्ति — जातिमत्त्वमित्येतावन्मात्रोक्तावपि न कोपि दोषः।

पृथिवीपवनयोः अनुष्णाशीतस्पर्शवत्त्वं साधर्म्यम्। पृथिव्यादीनाञ्चतुर्णां स्पर्शवत्त्वं साधर्म्यम्। अधिकं स्वयमेवानुसन्धेयम्।

यस्य यत् साधर्म्यमभिहितं तत् इतरेषां वैधर्म्यमित्यवगन्तव्यम्। यथा पृथिवीजलयोः रसवत्त्वं साधर्म्यमुक्तं तत् पृथिवीजलभिन्नानां सर्वेषां वैधर्म्यम्। केवलान्वयित्वं नाम अत्यन्ताभावाप्रतियोगित्वम्। यथा प्रमेयत्वाभावः ज्ञेयत्वाभावो वाऽप्रसिद्धः। अतः प्रमेयत्वमत्यन्ताभावाप्रतियोगीति लक्षणसमन्वयः। अभावश्चात्र स्वविरोधित्वेन वृत्तिमत्त्वेन च विशेषणीयः। तेन संयोगाभावाकाशाभावयोरपि केवलान्वयित्वमुपपन्नं भवति। एवञ्च स्वविरोधिवृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वमिति फलितम्।

॥ इति साधर्म्यवैधर्म्यप्रक्रिया समाप्ता ॥

अथ द्रव्यनिरूपणम्

अथेदानीं क्षित्यादीनि द्रव्याणि प्रत्येकं निरूप्यन्ते । तत्र गन्धवती पृथिवी । शुक्लनीललोहितहरितपीतादिभेदेन नानारूपं पृथिव्यामेव । मधुरतिक्तकटुकषायाम्ललवणभेदेन षड्विधो रसस्तस्यामेव । स्पर्शो ह्यस्यामनुष्णाशीतः । सर्वे चैते रूपादयोऽस्यां पाकजाः । सा च नित्यानित्यभेदाद्द्विविधा ।

अथ द्रव्यनिरूपणं प्रतिजानीते — **अथेत्यादिवाक्येन** । पृथिवीं लक्षयति — **तत्रेति** । पृथिव्यादिनवकघटकपृथिवी गन्धवतीत्यर्थः । तथा च गन्धवत्त्वं पृथिव्याः लक्षणम् । न च सुरभ्यसुरभ्यवयवारब्धे पटे परस्परप्रतिबन्धादुभयोरपि गन्धयोरनुत्पत्त्या तत्राव्याप्तीति वाच्यम् । गन्धसमानाधिकरणजलावृत्तिजातिमत्त्वस्य विवक्षितत्वात् शुक्लादिभेदेन सप्तविधं रूपं पृथिव्यामेव । अतः नानारूपवत्त्वमपि पृथिव्याः लक्षणमित्यभिप्रायेनाह — **शुक्लेत्यादि** । यद्यपि रक्तघटे नानारूपं नास्ति तथापि नानारूपसमानाधिकरणजलावृत्तिजाति-मत्त्वस्य विवक्षितत्वेन तत्र नाव्याप्तिः । जलत्ववायुत्वादीनां नानारूपसामानाधिकरण्यं नास्ति इति न तत्रातिव्याप्तिः । अन्य-तरत्वमादाय दोषापत्तिवारणाय जातिनिवेशः ।

मधुरादिषड्रसवत्त्वमपि पृथिव्याः लक्षणं वक्तुं शक्यम् । लक्षणपरिष्कारस्तु पूर्ववद्द्रष्टव्यः । **स्पर्श इति** । इदं तु न लक्षणम् । वायावतिव्याप्तेः । यद्वा वायुभिन्नत्वे सति अनुष्णाशीतस्पर्शवत्त्वं लक्षणमित्युच्यताम् ।

पृथिवीविद्यमानरूपादिविषये विशेषमाह — **सर्वे चेति** । एते रूपरसगन्धस्पर्शाः । अस्यां पृथिव्याम् । पाकजाः पाकेन जायमानाः । पाको नाम रूपादिपरावर्तकः विजातीयतेजस्संयोगः । स च परमाणाविति वैशेषिकाः । नैयायिकास्तु अवयविन्येवेति वदन्ति ।

नित्या परमाणुरूपा । न च तस्यां मानाभावः । यथा हि महत्परिमाणतारतम्यं गगनादौ विश्रान्तं, तथाऽणुपरिमाणतारतम्यस्यापि क्वचिद्विश्रान्तिर्वक्तव्या । यत्र च विश्रमस्तस्यानित्यत्वेऽनन्तावयवारब्धत्वाविशेषेण मेरुसर्षपयोस्तुल्यपरिमाणत्वप्रसङ्गान्नित्यत्वं वाच्यम् । स एव परमाणुः । न च जालमार्गप्रविष्टसौरलोकान्तरुपलभ्यमाने त्रुटिशब्दिते रजस्येव विश्रमोऽस्त्विति वाच्यम् । यत्र ह्यणुपरिमाणतारतम्यं विश्रान्तं,

---

पृथिवीं विभजते — **सा चेति** । नित्यानित्यभेदात् प्रकारद्वयवतीत्यर्थः । विभागो नाम उद्देश्यतावच्छेदकव्याप्यपरस्परासङ्कीर्णयावद्धर्मपुरस्कारेण धर्मिप्रतिपादनम् । यथा द्रव्यविभागः । तत्रोद्देश्यतावच्छेदकं द्रव्यत्वम् । तद्व्याप्याः धर्माः पृथिवीत्वादयो नव । तत्पुरस्कारेण पृथिव्यादीनां धर्मिणां विवरणं क्रियते पृथिव्यप्तेज इत्यादि वाक्येनेति । तस्य वाक्यस्य विभाजकवाक्यत्वम् । यावद्धर्मेत्युक्त्या यत्किञ्चिद्धर्मपुरस्कारेण धर्मिप्रतिपादने न विभागत्वम् ।

अथ नित्यां निरूपयति — **नित्या परमाणुरूपा इति** । परमाणुसत्वे प्रमाणमाह — **न चेत्यादिना** । महत्परिमाणस्य गगनादौ विश्रान्तिरभ्युपेयते । तथाऽणुपरिमाणस्यापि क्वचित् विश्रान्तिरभ्युपेया । सा परमाणुरिति व्याचक्षते । तस्याश्चानित्यत्वेऽनन्तावयवकल्पनायामनवस्थापत्तिः । अवयवसंख्याया अनिर्णयेन महापट लघुपटयोः तुल्यत्वापत्तिश्च । न च त्र्यणुक एव विश्रान्तिरस्त्विति वाच्यम् । त्र्यणुकस्सावयवः चाक्षुषत्वाद् घटवदित्यनुमानेन तस्य सावयवत्वसाधनात् । द्व्यणुकस्यापि सावयवत्वं महदारम्भकत्वेनानुमेयम् । तदेतत् नैयायिकवैशेषिकवृद्धानामभिमतम् । नवीनास्तु त्र्यणुक एव विश्रान्तिं परिकल्पयन्ति । जालमार्गप्रविष्टसौरालोकान्तरुपलभ्यमानं यद्रजः तदेव त्र्यणुकशब्देनोच्यते । तस्यानित्यत्वे मानाभावः । सावयवत्वसाधकानुमानन्तु आप्रयोगिकशङ्काग्रस्तत्वादकिञ्चित्करम् । तदेतत्सर्वं क्रोडीकृतं परमाणुं प्रत्याचख्युरित्यन्तेन ग्रन्थेन ।

तन्नित्यमित्युक्तम् । न च त्रुटेर्नित्यत्वं सम्भवति । स हि चक्षुषा गृह्यते । अतः घटादिवच्चाक्षुषद्रव्यत्वादयमपि सावयवः । एवं त्रुटेस्सावयवत्वे सिद्धे तदवयवानां द्व्यणुकसंज्ञानां कपाल-वन्महदारम्भकत्वेन सावयवत्वम् । तदवयवास्तु न सावयवाः, मानाभावादनवस्थापत्तेश्चेति न्यायवैशेषिकवृद्धाः । नवीनाः पुनस्त्रुटेरेव नित्यतां स्वीकृत्य परमाणुं प्रत्याचख्युः । अनित्या च द्व्यणुकादिरूपा पृथिवी । सैवावयवसमवेतेत्युच्यते । ननु

अनित्यपृथिवीं निरूपयति—अनित्या चेति । द्व्यणुकादिरूपा पृथिवी स्वावयसंयोगनाशे नश्यतीति तस्या अनित्यत्वं स्पष्टमेव । सैवानित्या पृथिव्येव । अवयवसमेताऽवयविनीत्युच्यते । नन्ववयवाति-रिक्तमवयविनं साधयितुमारभते नन्वित्यादिना । नानातन्तुसमुदायेन पटव्यवहारोपपत्तौ तन्तुव्यतिरिक्तः पटाभिधानोऽपरः पदार्थः किमर्थ-मङ्गीक्रियते । एवं क्रमेण परमाणुपुञ्जा एव प्रत्यक्षविषयाः घट-पटादयः न तद्व्यतिरिक्ता इति वक्तुं शक्यम् । एवञ्चानन्तभाव-नाशप्रादुर्भावादिकल्पनमप्यनावश्यकं भवतीति लाघवं भवति । अतोऽव-यवातिरिक्ताऽवयवी नाङ्गीकरणीय इति पूर्वपक्षिण आशयः । परमाणूनां बहुत्वेनैको घट इति व्यवहारानापत्तिः । अणुत्वान्महान् घट इति व्यवहारस्याप्यनुपपत्तिः । न चैको महान् धान्यराशिरितिवदेको महान् घट इति प्रयोगस्याप्युपपत्तिरिति वाच्यम् । तथा सति महत्त्वा-भावेन प्रत्यक्षत्वानापत्तेः । यथा एकपरमाणोरप्रत्यक्षत्वं तथा परमाणु-पुञ्जस्यापि प्रत्यक्षत्वं न स्यात् । न च दूरस्थैकदेशस्याप्रत्यक्षत्वेऽपि केशपुञ्जस्य प्रत्यक्षत्वं तथा एकपरमाणोरप्रत्यक्षत्वेऽपि परमाणुपुञ्जस्य प्रत्यक्षत्वं स्यादिति वाच्यम् । न हि केशोऽप्रत्यक्षः । अपि तु दूरत्वं तत्र प्रतिबन्धकम् । परमाणुस्तु अप्रत्यक्ष एव । एकस्याप्रत्यक्षत्वे तत्पुञ्जस्यापि अप्रत्यक्षतैव । प्रत्यक्षं प्रति महत्त्वस्य कारणत्वं सर्व-सम्मतम् । अवयविनां अवयवातिरिक्तत्वाभावे तत्र कथं महत्वमिति स्यात् । एवञ्चावयवातिरिक्तोऽवयवी सर्वथाऽङ्गीकरणीय एव । एतत्सर्वं प्रतिनिधायाह — इति संक्षेप इति ।

अवयवातिरिक्तेऽवयविनि किं प्रमाणं, घटादिव्यवहारस्य परमाणुपुञ्जैरेवोपपत्तेरिति चेन्न, तेषां बहुत्वेन महत्त्वाभावेन चैको महान् घट इत्यादि व्यवहारानापत्तेरिति संक्षेपः। अनित्यापि त्रिविधा शरीरेन्द्रियविषयभेदात्। तत्र च शरीरं योनिजायोनिजभेदेन द्विविधम्। तत्र जरायुजं मनुष्यादीनाम्। अण्डजं सरीसृपादीनाम्। अयोनिजं स्वेदजोद्भिदादिकम्।

अनित्यां विभजते — शरीरेन्द्रियविषयभेदादिति। आत्मनो भोगायतनं शरीरम्। शरीरत्वं न जातिः। पृथिवीत्वादिना साङ्कर्यात्। पृथिवीत्वं विहाय शरीरत्वं जलीये शरीरे वर्तते। शरीरत्वं विहाय पृथिवीत्वं घटे वर्तते। उभयोः सामानाधिकरण्यमस्मच्छरीरे। अपि तु चेष्टावत्त्वं शरीरत्वम्। चेष्टा च हिताहितप्रवृत्तिनिवृत्त्यनुकूलो व्यापारः। करचरणादीनां चेष्टावत्त्वेन तत्र शरीरव्यवहाराभावादतिव्याप्तिरन्त्यावयवित्वनिवेशेन निवारणीया। चेष्टावदन्त्यावयविवृत्तिजातिमत्त्वं शरीरत्वमिति भावः। रामकृष्णत्वादिजातिमवलम्ब्य मनुष्यशरीरे लक्षणसमन्वयः। यद्येवं नृसिंहशरीरे कथं लक्षणसमन्वयः। अस्मादृशे शरीरे बाल्यकौमाराद्यवस्थाभेदेन शरीरभेदस्वीकरणात् रामत्वकृष्णत्वादीनां जातित्वं सम्भवति। नृसिंहत्वन्तु एकव्यक्तिवृत्तितया न जातिः इति चेत् कल्पभेदेन नृसिंहशरीरस्यापि भेदेन नृसिंहत्वस्य एकव्यक्तिवृत्तित्वाभावात् जातित्वं सुलभमेव। किञ्च नृसिंहप्रादुर्भावानन्तरं तच्छरीरे उपचयापचयो वा न समजायत इत्यत्र किं प्रमाणम्। अन्त्यावयवित्वनिवेशात् हस्तादावतिव्याप्तिवारणम्। न चैवं सत्तामादाय गुणेऽतिव्याप्तिः। द्रव्यत्वव्याप्यत्वस्यापि निवेशात्।

शरीरं विभजते — तत्र चेति। योनिजमयोनिजञ्चेति द्विविधं शरीरम्। योनिजमपि द्विविधम्। जरायुजमण्डजञ्चेति। तत्र जरायुजमस्मदादीनाम्। अण्डजं विहङ्गमादीनाम्। अयोनिजन्तु स्वेदजोद्भिदादिरूपेण बहुविधम्। उद्भिदस्तरुगुलमादयः।

स्वेदजा मशकमत्कुणादयः। उद्भिदस्तरुगुल्मादयः। शरीरत्वन्तु चेष्टावत्त्वे सत्यन्त्यावयवित्वम्। चेष्टावत्त्वमात्रं हस्तादाववयवेऽतिप्रसक्तम्। अतो विशेष्यदलम्। चेष्टा च हिताहितप्राप्तिपरिहारानुकूला क्रिया, न तु स्पन्दमात्रम्। अतो नातिप्रसङ्गः। इन्द्रियं गन्धग्राहकं घ्राणम्। विषयो द्व्यणुकादिमहापृथिव्यन्तः। उपभोगसाधनं विषय इत्युच्यते। यच्च

अथेन्द्रियं निरूपयति—इन्द्रियमिति। गन्धग्राहकमिति इन्द्रियस्य प्रयोजनं निर्दिष्टम्। घ्राणमिति नामनिर्देशः। तत्तु नासाग्रवर्तीति बोध्यम्। विषयं निरूपयति—द्व्यणुके। शरीरेन्द्रियभिन्न सर्वोऽपि विषय इति भावः। विषयत्वञ्च उपभोगसाधनत्वम्। यद्यपि शरीरेन्द्रिययोरपि उपभोगसाधनत्वेन विषयेष्वन्तर्भावस्तथापि तयोः पृथगुपदेशः शिष्यबुद्धिवैशद्यार्थः।

अथ जलं निरूपयति—जलत्वजातिमज्जलमिति। जलत्वजातिमत्त्वं जलस्य लक्षणम्। जलत्वजातिश्च स्नेहसमवायिकारणतावच्छेदकतया सिध्यति। तथा हि स्नेहं प्रति जलं समवायिकारणम्। तथा च समवायसम्बन्धावच्छिन्नस्नेहत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकारणता यत्किञ्चिद्धर्मावच्छिन्ना, कारणतात्वात् गन्धनिरूपितपृथिवीनिष्ठकारणतावदित्यनुमानेन स्नेहकारणतावच्छेदकतया जलत्वसिद्धौ तत्र परामर्शवेलायां सिध्यमानधर्मस्य जातित्वे लाघवमिति लाघवज्ञानेन जातिभूतं जलत्वमनुमीयते। न च पक्षतावच्छेदककोटौ स्नेहत्वस्य कार्यतावच्छेदकत्वं न सम्भवति तस्यातिप्रसक्तत्वादिति वाच्यम्। तस्य जन्यत्वेन विशेषणात्। तथा च जन्यस्नेहत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकारणताया एव पक्षत्वम्। न च तादृशकारणतावच्छेदकतया सिध्यमानजलत्वं नित्यजले न स्यात् तत्र जन्यस्नेहनिरूपितकारणतायाः अभावादिति वाच्यम्। तादृशकारणतावच्छेदकतया जन्यजलत्वसिद्धौ तदवच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकारणतायाः जलमात्रवृत्तित्वात् तदवच्छेदकतया जलत्वजातिसिद्धेः निरपायत्वात्।

कार्यं यददृष्टाधीनं तत्तस्योपभोगं साक्षात्परम्परया वा साधयति। न हि विषय[1]प्रयोजनाभ्यां विना कस्यचित्सम्भवोऽस्ति। शरिरेन्द्रिययोरेतदन्तःपातेऽपि पृथगुपदेशः शिष्यबुद्धिवैशद्यार्थः।

जलत्वजातिमज्जलम्। तच्च शीतस्पर्शाश्रयम्। स्नेहस्तु तस्मिन्नेव। शुक्लमेव रूपम्। न च कालिन्दीजलादौ नील-

---

तत्र गुणान्तराण्याह–तच्चेत्यादिना। शीतस्पर्शाश्रय इति। शीतस्पर्शाश्रयत्वं लक्षणम्। न च तप्तोदके शीतस्पर्शानुपलम्भात् तत्राति[व्या]प्तिश्चेति वाच्यम्। तप्तोदके तेजस्त्र्यणुकप्रवेशेन नैसर्गिक-स्पर्शाभिभवात् तदनुपलम्भः। समीरणे तु तदानीतजलकणस्पर्श एवानुभूयते न तु समीरणस्येत्युभयत्र दोषाभावात्। शीतस्पर्शवद्वृत्ति पृथिव्यवृत्तिजातिमत्त्वं जलस्य लक्षणमिति वक्तुं शक्यम्। शीत-स्पर्शवद्वृत्तीत्युक्त्या वायुत्वादीनां निरासः। पृथिव्यवृत्तीत्युक्त्या द्रव्यत्वमादाय नेतरेष्वतिव्याप्तिः। जातिपदमपहाय तादृशधर्मवत्त्व-मात्रोक्तौ जलाकाशान्यतरत्वमादाय आकाशेऽतिव्याप्तिः स्यात्। अतो जातिमत्त्वम्। तद्वत्त्वञ्च समवायेनैव ग्राह्यम्। तेन कालिकसम्बन्धेन जलत्ववत्याकाशादौ नातिव्याप्तिः।

स्नेहवत्त्वमपि जलस्य लक्षणमित्याशयेनाह–स्नेहस्तु तस्मिन्नेवेति। जल एवेत्यर्थः। अत्र एवकारेण स्नेहस्येतरयोगो व्यवच्छिद्यते। स्नेहवत्त्वं जलस्य लक्षणमिति भावः। लक्षणपरिष्कारस्तु पूर्ववद्द्रष्टव्यः। शुक्लमेव रूपमिति। एवकारो रूपान्तरव्यवच्छेदाय। तत्राव्याप्तिमाशङ्कते न चेत्यादिना। कालिन्दीपरिसरमुपागतस्य नीलञ्जलमिति प्रतीतिः जायते। एवञ्च नीलरूपोपलम्भात् शुक्ल-मेवेत्युक्तिरसाम्प्रतमिति भावः। समाधत्ते पृथिव्या इति। समवायेन नीलरूपं प्रति तादात्म्येन पृथिवी करणमिति नियमाज्जले नीलरूपो

---

१ 'बीज'

रूपोपलम्भादयुक्तमिदमिति वाच्यम्। पृथिव्या एव नील-रूपसमवायितया जले तदसम्भवात्। तत्र नीलवत्त्वप्रतीतेरा-श्रयोपाधिकत्वात्। अत एव कालिन्दीजलस्य वियति विक्षेपे सति धवलिमोपलभ्यते। मधुर एव रसस्तत्र। न च जले रस एव नोपलभ्यते, प्रत्युत जम्बीरजलादावन्यरस एवोपलभ्यत इति वाच्यम्। व्यञ्जकासमवधानदशायां तत्र रसानुपलम्भेऽपि

न सम्भवतीति भावः। तथा च नीलञ्जलमिति तत्र प्रतीतिराश्रयौ-पाधिका भ्रमरूपैव। वर्णस्य च नार्थसाधकतेति तत्तन्नीलरूपप्रतीतेर्जले न नीलरूपसाधकता। नोलवत्ताप्रतीतेराश्रयौपाधिकत्वे युक्तिमाह— अत एवेति। तथा च नोलसिकतासंसर्गेणैव नोलत्वप्रतीतिर्यथा जपाकुसुमगर्भे स्फटिके रक्तत्वप्रतीतिः।

मधुर ऐवेति। अत्राप्येवकारो रसान्तरव्यवच्छेदाय। अत्राऽऽ-शङ्कते नचेति। रस एव रसत्वविशिष्टवस्तुमात्रं नोपलभ्यत इत्यर्थः। तथा च माधुर्यमपि नास्तीति भावः। न केवलं मधुररसो नोपल-लभ्यत इति, अपि तु जम्बीरजलादावम्लरस उपलभ्यत इति भावः। तथा च मधुररसवत्त्वरूपं लक्षणमसम्भवग्रस्तमेवेति प्रष्टुराशयः। समाधत्ते — व्यञ्जकेति। जलीयमाधुर्यव्यञ्जकाभावदशायां जले माधुर्यरसानुपलम्भः। आमलकीहरीतक्यादिकं तदीयरसाभिव्यञ्जकं लोके दृश्यते। तद्भक्षणोत्तरं जलपाने माधुर्योपलम्भात्। जम्बीर-सलिलादावम्लाद्युपलम्भस्तु आश्रयौपाधिका भ्रान्तिरेव।

गुणान्तरमाह — सांसिद्धिकेति। चकारो भिन्नक्रम एवकारार्थ-कश्च। सांसिद्धिकद्रवत्वमस्यैव गुणः न तु पृथिव्यादीतरेषाम्। तथा च सांसिद्धिकद्रवत्वमपि लक्षणान्तरं बोध्यम्।

तदपीति। कार्यरूपं जलमित्यर्थः। तत्र शरीरेन्द्रियविषयेषु शरीरमयोनिजम्। पार्थिवशरीरवद् द्वैविध्यं नास्ति। अयोनिजमेक-वेमेत्यर्थः। तत्प्रसिद्धिप्रदेशमाह — वरुणलोक इति। इन्द्रियमिति।

आमलकीहरीतक्यादिभक्षणरूपव्यञ्जकसमवधाने तत्र मधुरस्योपलभ्यमानस्य प्रत्याख्यानायोगात् । जम्बीरनीरादौ रसान्तरोपलम्भ आश्रयौपाधिकी भ्रान्तिरेव । सांसिद्धिकद्रवत्त्वञ्चास्य गुणः । तच्च नित्यानित्यभेदाद्द्विविधम् । नित्यं परमाणुरूपमनित्यं कार्यरूपमवयवसमवेतञ्च । तदपि त्रिविधम्, शरीरेन्द्रियविषयभेदात् । तत्र शरिरमयोनिजं वरुणलोके प्रसिद्धम् । इन्द्रियं रसनम् । हिमकरकादिर्विषयः ।

जलीयमिन्द्रियं रसनमित्यर्थः । **हिमकरकादिरिति** । आदिपदेन सरित्समुद्रादीनां ग्रहणम् । ननु जलस्य सांसिद्धिकद्रवत्वाश्रयेन कथं जलीयशरीरस्योपपत्तिरिति चेत् पार्थिवांशानामुपष्टम्भकत्वमिति गृहाण । वस्तुतः पञ्चभूतात्मकं शरीरमिति सिद्धान्तः । अस्मदादिशरीरेषु पार्थिवांशस्य प्राधान्यात् पार्थिवत्वं शरीरमित्यभिधीयते । वरुणलोकदृश्यमानानां शरीराणां जलांशस्याऽऽधिक्यात् जलीयत्वमादित्यलोकविद्यमानानान्तु तेजांशाधिक्यात् तैजसत्वं वायुलोकदृश्यमानानान्तु समीरणाऽऽधिक्याद् वायवीयत्वञ्च प्रकल्प्यत इत्यध्यवसेयम् ।

तेजो निरूपयति—**तेजस्त्वमिति** । तेजस्त्वजातिमत्त्वं तेजसो लक्षणम् । तेजस्त्वस्य जातित्वे प्रमाणं सूचयति—**उष्णस्पर्शाश्रयश्चेति** । उष्णस्पर्शसमवायिकारणमिति भावः । उष्णस्पर्शत्वावच्छिन्नकार्यतानिरूपितकारणता यत्किञ्चिद्धर्मावच्छिन्ना कारणतात्वादित्यनुमानेन जातेः तेजस्त्वस्य सिद्धिः । तस्य च परमाणुसाधारण्यं जलनिरूपणप्रस्तावोक्तरीत्या बोध्यम् । न च रत्नकिरणादौ चन्द्रमयूखे च उष्णस्पर्शाननुभवादुष्णस्पर्शनिरुपितकारणतावच्छेदकतया सिद्धस्य तेजस्त्वस्य तत्रावृत्तित्वापत्तिरिति वाच्यम् । हिमादिनाऽभिभवात्तत्राननुभवोपपत्तेः । तदेतदाह — **चन्द्रप्रभादाविति** । रूपं दर्शयति—**शुक्लेति** । शुक्लरूपं हि द्विविधं भास्वरमभास्वरञ्चेति । तत्राभास्वरशुक्लं पृथिवीजलयोः । भास्वरशुक्लन्तु तेजस्येवेति सिद्धान्तः ।

*5

तेजस्त्वसामान्यवत्तेजः, उष्णस्पर्शाश्रयश्च । चन्द्र-प्रभादौ हिमादिनाऽभिभवात्तदग्रहः । शुक्लभास्वररूपाश्रयो हि ज्वलनः । मरतककिरणादौ पार्थिवरूपेणाभिभवात् श्वेतरूपाग्रहः । एवं सुवर्णेऽप्युपष्टम्भकपार्थिवरूपेणाभिभवात्तद-ग्रहः । अत एव न भास्वरत्वं तस्य रूपस्य । पृथिव्यामिव नैमित्तिकद्रवत्वं तेजस्यपि, सुवर्णादिरूपे तेजसि अग्निसंयोगेन

मरतकादिषु अव्याप्तिमाशङ्क्याह — मरतकेति । तत्र पार्थिवरूपेणा-भिभवात् शुक्लरूपाननुभव इत्यर्थः । सुवर्णेऽपि भास्वरशुक्लरूपं विद्यत एव । उपष्टम्भकपार्थिवरूपेण तन्न प्रत्यक्षगोचरतां उपयाति। इतररूपेणाभिभवादेव तस्य रूपस्य न पदार्थान्तरप्रकाशकता । सुवर्णा-दिरूपे तेजस्यग्निसंयोगेन द्रवत्वदर्शनान्नैमित्तिकद्रवत्वमपि पृथिव्यामिव तेजस्यप्यङ्गीकरणीयम् ।

अत्र सुवर्णस्य तेजसत्वं साधयितुं प्रक्रमते — **न चेत्यादिना । मानाभाव इति** । प्रमाणं नास्तीति पूर्वपक्षिण आशयः । सुवर्णं पीतमिति प्रतीत्या तस्य पार्थिवत्वमेव गृह्यते न तैजसत्वमित्यनुमानमपि न प्रमाणम् । सुवर्णं न तैजसम् पीतिमगुरुत्वाश्रयत्वादित्यनुमानेन तेजस्त्वाभावसाधनात् तेजस्त्वसाधकस्य हेतोः सत्प्रतिपक्षितत्वात् । अतः सुवर्णस्य पार्थिवेष्वेवान्तर्भाव इति पूर्वपक्षिण आशयः । समा-धत्ते — **अत्यन्तानलेति** । अयम्भावः—सुवर्णस्य तेजसत्वे प्रमाण-मनुमानमेव । तथा हि सुवर्णं तैजसं प्रतिबन्धकासमानकालीना-त्यन्तानलसंयोगकालीनध्वंसाप्रतियोगिद्रवत्वाश्रयत्वात् । यन्नैवं तन्नैवं, यथा पृथिवी । द्रुते सुवर्णे यद्द्रवत्वं तदत्यन्ताग्निसंयोगेऽपि न नश्य-तीति तस्य तैजसत्वं साधयत्येव । द्रवत्वं हि पृथिवीजलतेजस्सु विद्यते । पृथिवीद्रवत्वं जलीयद्रवत्वञ्चातितरामग्निसंयोगे सति विन-श्यतीति । अतस्तद् विजातीयद्रवत्वमेव सुवर्णादौ गृह्यत इति अनु-मानसम्मितिः । अत्र व्यतिरेकस्थान एव प्रदर्शितः । यन्नैवं न तैजसं तन्नैवं तन्न हेतुमदित्यर्थः । जलमध्यस्थघृतादौ विद्यमानस्य द्रव-त्वस्यात्यन्तानलसंयोगे सत्यपि नाशाभात्तत्र व्यभिचारवारणाय प्रति-

द्रवत्वोपलम्भात्। न च सुवर्णस्य तैजसत्वे मानाभाव इति वाच्यम्। अत्यन्तानलसंयोगेऽपि तदीयद्रवत्वस्योच्छेदादर्शनेन तस्य तैजसत्वनिश्चयात्। पार्थिवद्रवत्वस्यात्यन्तानलसंयोगे उच्छेदोपलम्भात्। जलवदेवास्यापि नित्यतादि। किन्त्विह तैजसं शरीरमादित्यलोके प्रसिद्धम्। नयनं तैजसमिन्द्रियम्। विषयो[1] हि कनकादिः।

बन्धकासमानकालीनेति। ननु प्रतिबन्धकासमानकालीनात्यन्तानल-संयोगकालीनध्वंसाप्रतियोगिद्रवत्वमस्तु तैजसत्वं मास्तु इत्यप्रयोजक-शङ्कायां कथं परिहार इति चेन्न। पृथिवीद्रवत्वजन्यजलद्रवत्वयो-रत्यन्तानलसंयोगनाशत्वात्। तथा च तादृशद्रवत्वनाश प्रति अत्यन्ता-नलसंयोगः कारणमिति कार्यकारणभावभङ्ग एवानुकूलस्तर्कः। न चात्र पूर्वोक्तविधया सत्प्रतिपक्षितत्वं शङ्क्यम्। सुवर्णं पार्थिवं पीतगुरुत्वाश्रयत्वादित्युक्तानुमाने हेतोः स्वरूपासिद्धत्वात्। पीतत्वा गुरुत्वञ्च पीततावष्टम्भकपार्थिवांशेष्वेव न तु तेजोरूपसुवर्णांशे।

अपरे त्वाहुः — फलादिषु पार्थिवेषु तेजस्संयोगे सति पूर्वरूप-परावृत्तिर्दृश्यते। तद्वत् पीतिमाश्रये काञ्चने आचन्द्रतारकमत्यन्ताग्नि-तप्तेऽपि रूपपरावृत्तिर्न दृश्यते। अतस्तत्र रूपपरावृत्तिप्रतिबन्धकं विजातीयं किञ्चिद्द्रवद्रव्यं कल्पनीयम्। तदेव तैजससुवर्णमित्या-चक्ष्महे। इत्थञ्चानुमानपरिपाटी। अत्यन्तानलतप्तपीतिमगुरुत्वाश्रयः रूपपरावृत्तिप्रतिबन्धकद्रवद्रव्यसंयुक्तोऽत्यन्ताग्निसंयोगे सत्यपि पूर्वरूप-विजातीयरूपानाश्रयत्वात्। यथा जलमध्यस्थपीतपट इति। एतत्सर्वं प्रतिनिधायोक्तं — न चेत्यारभ्योच्छेदोपलम्भादित्यन्तेन। तदीय-विभागस्तु पूर्ववदेव। शरीरमादित्यलोके प्रसिद्धम्। तैजसमिन्द्रियं नयनम्। विषयस्तु भौमदिव्यौदर्याकरजभेदाच्चतुर्विधः। भौमं वह्न्यादिकम्। दिव्य विद्युदादि। भुक्तस्य परिणामहेतुरुदर्यम्। आकराज्जायमानं कनकादिराकरजम्।

---

१ 'यो वह्निकन'

वायुत्वजातिमान् वायुः। स चापाकजानुष्णाशीतस्पर्शवानप्रत्यक्षश्च। वियति विक्षिप्तानां तृणादीनां धारणेन शाखादीनां कम्पनेन चानुमीयते। अयं प्रत्यक्षश्चेत्यग्रे वक्ष्यते। पूर्ववदेवास्य नित्यतादि। वायवीयं शरीरं पिशाचादीनां प्रसिद्धम्। त्वगिन्द्रियं वायवीयम्। प्राणादिर्विषयः।

अथ वायुं निरूपयति—**वायुत्वजातिमानिति**। वायुत्वजातिमत्त्वं वायोर्लक्षणमित्यर्थः। वायुत्वजातौ प्रमाणं सूचयति **स चेत्यादिना**। स च वायुश्च अपाकजानुष्णाशीतस्पर्शवान्। अपाकजो योऽनुष्णशीत स्पर्शो तदाश्रय इत्यर्थः। तथा च तादृशस्पर्शसमवायिकारणतावच्छेदकतया वायुत्वजातिसिद्धिरिति भावः। पृथिवीस्पर्शव्यावृत्यर्थं—**अपाकजेति**। **अप्रत्यक्षश्चेति**। वायोः प्रत्यक्षं नास्तीति सिद्धान्तः। तर्हि वायुसत्वे किं मानमिति चेत्तत्राह—**वियतीति**। गगने विक्षिप्ताः तृणादयः किञ्चिद् क्षणं तत्रैव तिष्ठन्ति नाधः पतन्ति। एवं वृक्षादीनां शाखाः कम्पन्ते। तेन वायुरनुमीयत इत्यर्थः। अनुमानप्रकारश्चेत्थम्—वायौ वाति सति योऽयं स्पर्शोऽनुभूयते सः यत्किञ्चित् द्रव्याश्रितः स्पर्शत्वात् पृथिवीसमवेतस्पर्शवत्। तच्च द्रव्यं न पृथिवी नापि जलं नापि तेजः रूपाभावात्। एवं गगने तृणादीनां धृतिः स्पर्शवत् वेगवत् द्रव्यसंयोगहेतुका। अस्मदाद्यनधिक्षतद्रव्यधृतित्वात् नौकाधृतिवदिति। अत्रापि तादृशधृतिप्रयोजकसंयोगाश्रयतया वायुः सिध्यति। पक्षान्तरमाह—**अयं प्रत्यक्षश्चेति**। अयम्भावः—बहिरिन्द्रियजन्यप्रत्यक्षं प्रत्युद्भूतरूपं कारणमिति कार्यकारणभावाङ्गीकाराद् वायौ रूपाभावादप्रत्यक्षत्वमिति साम्प्रदायिकाः। वस्तुतस्तु रूपाभावेन चाक्षुषप्रत्यक्षाभावेऽपि स्पर्शवत्त्वात् त्वाचः प्रत्यक्षं नानुपपन्नम्। चाक्षुषप्रत्यक्षं प्रत्येवोद्भूतरूपस्य कारणत्वं न तु वाह्यप्रत्यक्षसामान्ये। त्वाचः प्रत्यक्षं प्रत्युद्भूतः स्पर्शः कारणम्। स च वायावस्तीति त्वाचः प्रत्यक्षे न काप्यनुपपत्तिः। अतो वायुः प्रत्यक्षः। तदेतदग्रे वक्ष्यते। अस्य विभागोऽपि पूर्ववदेव। तत्र वायवीयं शरीरं पिशाचादीनाम्। वायवीयमिन्द्रियं त्वक्।

शब्दाश्रय:आकाशः। स चैको विभुर्नित्यश्च। एकैकमप्याकाशं कर्णशष्कुल्यवच्छेदाच्छ्रोत्रसंज्ञां लभते। तदेव च[1] शब्दग्राहकम्।

वृक्षादिकम्पनहेतुः वायुर्विषयः। प्राणापानादयोऽपि वायवः विषय एवान्तर्भवन्ति। न चास्य प्राणत्वादिना पञ्चविधत्वं भ्रमितव्यम्। औपाधिकसंज्ञामात्रभेदात्।

इदं तावत् विचिन्तनीयं गन्धवत्त्वं पृथिव्याः लक्षणमित्युच्यते। किमिदं लक्षणम् नाम? उच्यते — **असाधारणधर्मो लक्षणम्।** यस्य लक्षणमुच्यते तल्लक्ष्यम्। तस्यासाधारणः यो धर्मः सः लक्षणमित्युच्यते। लक्ष्यतेऽनेनेति लक्षणमिति व्युत्पत्तेः। स च धर्मोऽव्याप्त्यतिव्याप्त्यसम्भवदूषणरहितो लक्षणं इति फलितम्। लक्ष्यैकदेशावृत्तित्वमव्याप्तिः। यथा गोः नीलरूपवत्त्वं लक्षणमुक्तं चेल्लक्ष्यैकदेशे श्वेतगव्यां नीलरूपाभावात् तल्लक्षणमव्याप्तिग्रस्तम्। अलक्ष्ये लक्षणसत्त्वमतिव्याप्तिः। यथा गोः शृङ्गित्वं लक्षणमुक्तं चेदलक्ष्ये महिषे तस्य विद्यमानत्वात्तदतिव्याप्तिग्रस्तम्। लक्ष्यमात्रावृत्तित्वमसम्भवः। यथा एकशफवत्वं लक्षणमुक्तं चेद्गोत्वावच्छिन्ने तस्यावृत्तित्वादसम्भवग्रस्तं तत्। यद्यप्यव्याप्तिग्रस्ते लक्षणेऽजादिष्वपि नीलरूपसद्भावादव्याप्तिग्रस्तत्वमपि सम्भवति। एवं दोषसाङ्कर्यापत्तिस्तथापि त्रयाणामपि लक्षणानां परिष्कारेण स दोषः परिष्करणीयः परिष्कारश्चेत्थम् — लक्ष्यतावच्छेदकसामानाधिकरण्ये सति लक्ष्यतावच्छेदकावच्छिन्नप्रतियोगिताकभेदसामानाधिकरण्यमतिव्याप्तिः। लक्ष्यतावच्छेदकसामानाधिकरण्ये सति लक्ष्यतावच्छेदकसामानाधिकरण्यात्यन्ताभावप्रतियोगित्वमव्याप्तिः। लक्ष्यतावच्छेदकव्यापकीभूताभावप्रतियोगित्वमसम्भवः इति निष्कर्षः। एतादृशदूषणत्रयरहितं सास्नावत्त्वं गोः लक्षणं भवति। लक्षणञ्च द्विविधम्—व्यावहारिकं व्यावर्तकञ्चेति। स्वरूपपरिज्ञानाय क्रियमाणं लक्षणं व्यावहारिकम्। इतरभेदानुमितिजनकं लक्षणं व्यावर्तकं। अवच्छेदकं नामान्यूनानति-

---

1 'वश'

सर्वोत्पत्तिमन्निमित्तं जगदाधारश्च कालः। 'इदानीं घट' इत्यादिप्रत्ययो हि कालस्य घटाधारतामवगाहते। कालकृत-परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतया च तस्य सिद्धिः।

रिक्तवृत्तिर्धर्मः। यथा पृथिव्याः लक्षणकथने पृथिवीत्वं लक्ष्यता-वच्छेदकं भवति। यावत्पृथिवीषु लक्ष्यता वर्तते तत्र सर्वत्रापि पृथिवीत्वमपि वर्तते। यत्र लक्ष्यता नास्ति तत्र पृथिवीत्वमपि नास्तीति पृथिवीत्वस्य लक्ष्यतानतिरिक्तवृत्तित्वं वर्तत इति पृथिवीत्वं लक्ष्यतावच्छेकं भवति। यो धर्मः यस्यामवच्छेदकः सा तद्धर्मा-वच्छिन्ना। तथा च लक्ष्यतापृथिवीत्वावच्छिन्नेत्यलमप्रसक्तिविचारेण।

अथाऽऽकाशं निरूपयति—शब्दाश्रयेति। शब्दसमवायिकारणत्व-माकाशस्य लक्षणमिति भावः। एतेनाऽऽकाशे प्रमाणमपि दर्शितम् तथा हि शब्दो यत्किञ्चित् द्रव्याश्रितः विशेषगुणत्वादित्यनुमानेन शब्दाश्रयतयाऽऽकाशरूपं द्रव्यं सिध्यति। ननु क्लृप्तद्रव्येष्वन्यतमस्य शब्दाश्रयत्वस्तु किमतिरिक्तद्रव्यकल्पनयेति चेदत्र ब्रूमः — शब्दो न पृथिव्यादिचतुष्टयगुणः। अपाकजत्वे सत्यकारणगुणपूर्वकत्वे सति प्रत्यक्षत्वात्। यथा ज्ञानम्। नैयायिकमते पाकजन्यरूपादीनां सम-वायिकारणगुणजन्यत्वाभावात् तत्र व्यभिचारवारणाय अपाकजेति। शब्दो न दिक्कालाऽऽत्ममनसां गुणः। वहिरिन्द्रियग्राह्यत्वात्। एवञ्च परिशेषात् शब्दाश्रयतयाऽऽकाशं सिध्यति।

तस्य भेदो नास्तीत्याह — स चेति। मठाकाशः घटाकाश इत्यादिव्यवहारस्तूपाधिभेदादिति ध्येयम्। एवमेव कर्णशष्कुल्यवच्छि-न्नाऽऽकाशः श्रोत्रसंज्ञां लभते।

इदन्तु बोध्यम्। अनित्यपृथिव्यादीनां शरीरेन्द्रियविषयभेदेन त्रैविध्यमुक्तम्। तत्र शरीरविषययोः लक्षणमप्युक्तम्। इन्द्रिय-लक्षणन्तु किमिति चेदुच्यते—शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनस्संयोगाश्रयत्वम्। यथा चक्षुषि न शब्देतरोद्भूत-विशेषगुणानाश्रयत्वं सिद्धम्। मन. चक्षुः संयोगानन्तरं चक्षुषि

स चैको विभुर्नित्यश्च। एकोऽप्ययमुपाधिवशात् क्षणदिव्यवहार-हेतुः। उपाधिश्च गुणप्रागभावविशिष्टो घटः। पटप्राग-भावावच्छिन्नान्त्यतन्तुसंयोगो वा, स्वकार्यविशिष्टसामग्री वा। पातञ्चलास्तु कालोऽवयवी क्षणलवाद्यवयवक्रमेण जन्यत

पदार्थैकसंयुक्ते चाक्षुषप्रत्यक्षं जायत इत्यत ज्ञानकारणसंयोगाश्रयत्वमपि चक्षुषि लब्धम्। अतो लक्षणसमन्वयः। अत्र प्रथम-दलानुपादाने आत्मनोऽपि ज्ञानकारणमनःसंयोगाश्रयत्वात्तत्रातिव्याप्तिः। आत्मा मनसा संयुज्यते। मन इन्द्रियेण। इन्द्रियमर्थेनेति हि प्रत्यक्षप्रक्रिया। तद्वारणाय प्रथमदलोपादानम्। तदुपादाने तु शब्देतरज्ञानेच्छादिरूपोद्भूतविशेषगुणानाश्रयत्वादात्मनः तदनाश्रयत्वं नास्तीत्यतिव्याप्तिवारणम्। द्वितीयदलानुपादाने दिक्कालयोरपि विशेषगुणानाश्रयत्वात्तत्रातिव्याप्तिः स्यात्। तद्वारणाय द्वितीयदलम्। तयोः ज्ञानकारणमनःसंयोगाश्रयत्वं नास्ति। यद्यपि दिक्कालयोः विभुत्वान्मनः संयोगित्वं विद्यत एव। तथापि तस्यान्यथासिद्ध-त्वाज्ज्ञानकारणमनःसंयोगाश्रयत्वं नास्त्येव। प्रथमदलघटकशब्दे-तरेत्यस्याभावे श्रोत्रेऽतिव्याप्तिः स्यात्। तस्य ज्ञानकारणमनः संयोगाश्रयत्वेऽपि उद्भूतविशेषगुणानाश्रयत्वं नास्ति शब्दाश्रयत्वात्। अतः शब्देतरेति। शब्देतर उद्भूतविशेषगुणः आकाशे नास्तीत्य-व्याप्तिपरिहारः। उद्भूतपदानुपादाने चक्षुष एवानुद्भूतगुणानाश्रयत्वात् तत्राव्याप्तिः स्यात्। अत उद्भूतेति। चक्षुषि विद्यमानानां रूपा-दीनां नोद्भूतत्वमिति सिद्धान्तः। अतः शब्देतरोद्भूतविशेषगुणाना-श्रयत्वं चक्षुषि लब्धमेव। विशेषपदानुपादाने तत्रैवोद्भूतरूपाना-श्रयत्वान् तत्राव्याप्तिः स्यात्। तद्वारणाय प्रथमदले उद्भूतत्व-निवेशः। विशेषेत्यनुक्तौ चक्षुषि विद्यमानं संख्यादिकमादाय तत्रा-व्याप्तिः। संख्यादीनां न विशेषगुणत्वमिति तत्परिहारः। द्वितीय-दले ज्ञानकारणत्वानुपादाने दिक्कालयोरतिव्याप्तिः। तयोः विभु-त्वान्मनः संयोगाश्रयत्वं न कोऽपि तत्र विशेषगुणः। कालमनस्संयोगस्य ज्ञानकारणत्वाभावाद् अतिव्याप्तिपरिहारः। एतच्च लक्षणं पञ्चसु बाह्येन्द्रियेषु मनसि च वर्तते। अथेदं विचारणीयम्। घ्राणादीनां

इत्याहुः। अत्र च संख्यादयो विभागान्ताः पञ्चैव गुणाः। घटतत्प्रागभावध्वंसैर्भवद्भूतभविष्यत्कालादिव्यवहाराः। घट-सत्तोपलक्षितः कालो हि भवद्वर्तमान इत्यर्थः। तत्प्रागभावो-पलक्षितसमयो भूतः। तद्ध्वंसोपलक्षितो भविष्यदिति।

पार्थिवत्वादिकमभिहितं तत्र किं मानमिति। उच्यते। अनुमानमेव तत्र प्रमाणम्। तथा हि घ्राणेन्द्रियं पार्थिवम्। रूपादिषु गन्धस्यै-वाभिव्यञ्जकत्वात्। कुङ्कुमगन्धाभिव्यञ्जकगोघृतवत्। अनुमानमिदं घ्राणेन्द्रियस्य पार्थिवत्वं साधयति। पार्थिवत्वं साध्यम्। रूपादि-चतुष्टयघटकगन्धाभिव्यञ्जकत्वे सति रूपादिचतुष्टयघटकगन्धेतरानभि-व्यञ्जकत्वं हेतुः। कुङ्कुमगन्धस्पर्शेषु गन्धमेवाभिव्यञ्जयति न त्वन्यत्। अतः पार्थिवत्वमनुमीयते। गोघृतं हि कुङ्मस्य गन्धमेवाभि-व्यञ्जयति। न तु तद्रसादीन्। तच्च पार्थिवत्वं भवति। यद्यप्यत्र दृष्टान्ते स्वीयरूपरसस्पर्शव्यञ्जकत्वाद्गन्धेतराव्यञ्जकत्वाभावात् हेत्व-सिद्धिः। तथापि परकीयत्वनिवेशेन तन्निस्तारः। घृतस्य परकीय-रसाद्यभिव्यञ्जकत्वं नास्त्येव।

अनयैव रीत्या नयनादीनामपि तत्तज्जातीयत्वमास्तेयम्। **सर्वेति**। आकाशस्य विभुत्वात्सर्वमूर्तद्रव्यसंयोगित्वेन तस्य सर्वोत्पत्ति-निमित्तत्वम्।

कालं निरूपयति — **जगदाधारश्चेति**। जन्याश्रयश्चेत्यर्थः। तत्रहेतुमाह — इदानीमिति। 'इदम्' शब्दात् सप्तम्यन्तात् 'दानीम्' प्रत्ययः स्वार्थे। इदम्शब्देन विवक्षितोऽर्थश्च कालः। तथा चेदानीं घट इति प्रत्यये कालस्य घटाधारत्वं सम्यग् प्रदीयते। ननु कालसत्वे किं मानमिति चेत् तत्राह — **कालरूपेति**। परत्वापरत्वे हि कालदिक्प्रयुक्तत्वेन द्विविधे। तत्र कृतपरत्वापरत्वयोरसमवायि-कारणं कालपिण्डसंयोगः। तदाश्रयत्वेन कालोऽनुमीयते। तस्य वैविध्यं नास्तीत्याह — **स चैक इत्यादिना**। विभुत्वं नित्यत्वमिति भावः। यद्येवं दिनमासादिव्यवहाराणां कथमुपपत्तिरित्यत आह — **एकोऽप्यमिति**। **उपाधीति**। तथा च उपाधिभेदप्रयुक्त एवं

दिक्कृतपरत्वापरत्वासमवायिकारणसंयोगाश्रयो दिक् पूर्वादिप्रत्ययनिमित्तञ्च। अयं पूर्वोऽयं पर इत्यादि प्रत्ययो हि घटादेरुदयाचलास्ताचलसंयोगवैशिष्ट्यं विषयीकरोति। न चोदयाचलादिसंयोगस्साक्षात्सम्बन्धेन घटादौ विद्यते, किन्तु स्वसमवायिसंयुक्तसंयोगरूपपरम्परासम्बन्धेनेति सम्बन्धघटकतया

क्षणादिव्यवहार इति भावः। उपाधिमाह — **उपाधिश्चेति**। अन्तिमतन्तुसंयोगानन्तरक्षणे पटोत्पत्तिः तदुत्तरक्षणे तत्र गुणोत्पत्तिः। एवञ्च पटोत्पत्तिक्षणे गुणप्रागभावविशिष्टपटरूपोपाध्यवच्छिन्नत्वं वर्तत एव। एवं पटोत्पत्तेः प्राक्क्षणे कथं क्षणव्यवहारः। तत्र पटाभावादिति चेदत्रोच्यते — **पटप्रागभाव इति**। एवं सति गुणोत्पत्तिक्षणे पटप्रागभावगुणप्रागभावयोः नाशात् कथं क्षणव्यवहार इति चेदत्राह — **स कार्येति**। तत्तत्कार्यविशिष्टकारणसमुदाय इति यावत्। एतच्च यथाव्यवहारं योजनीयम्। मतान्तरमाह — **पातञ्जला इति**। कालस्यावयवित्वेऽनन्तावयवकल्पना तद्ध्वंसप्रागभावकल्पना चेति गौरवं दुष्परिहरमिति मनसि निधाय आहुरित्यभिदधे। कालगतान् गुणानाह — **अत्र चेति**। संख्या परिमाणं पृथक्त्वं संयोगः विभागश्चेति पञ्चैवेत्यर्थः। ननु भूतभविष्यद्वर्तमानरूपकालत्रयव्यवहारे कोपपत्तिरित्याशङ्क्याह — **घट इति**। वर्तमानपदार्थप्रागभावावच्छिन्नकालः भूतकालः। वर्तमानपदार्थध्वंसावच्छिन्नकालः भविष्यत्कालः। एवञ्च तद्व्यवहारस्यापि उपाध्याश्रयत्वं लब्धम्। तदेतदाह — **घटसत्वेत्यादिना**।

दिशं निरूपयति — **दिगिति**। दिक्कृते ये परत्वापरत्वे तदसमवायिकारणभूतो यः संयोगः तदाश्रयत्वं दिश एव। पूर्वादिप्रत्यय एव तत्सत्वे मानम्। तदेतत् स्पष्टीकरोति — **अयमित्यादिना**। दिश एकत्वेऽपि प्राच्यादिव्यवहारः उपाधियुक्तः। तथा हि उदयाचलसन्निहिता या दिक् प्रतीची। मेरुसन्निहिता दिगुदीची। तद्व्यवहिता त्ववाचीति सम्प्रदायः। सर्वेषामेव वर्षाणां मेरुरुत्तरतः स्थित इति

भवति दिङ्निमित्तमुक्तप्रत्यये। पूर्ववदियमपि विभ्वी नित्यैका चोपाधिवशात् प्राच्यादिव्यपदेशभेदं लभते। उपाधिश्चोदयाचलसंयोगादिरेव। उदयाचलसन्निहिता दिगुदीची। तद्व्यवहिता त्ववाची। कालवदस्यामपि संख्यादयः पञ्चैव गुणाः। आकाशादयस्तिस्रस्संज्ञा न जातिनिमित्ताः, आकाशत्वादीनां जातीनामभावात्। नित्यत्वे सत्यनेकसमवेता हि

हि पौराणिकाः वदन्ति। एवञ्च प्राच्यादिव्यवहाराणामुपाधिप्रयोज्यत्वं स्पष्टमेव। अयम्पूर्वोऽयम्पर इत्यादिप्रत्ययोऽपि घटादेरुदयाचलादिसंयोगवैशिष्ट्यमेव विषयीकरोति। नन्विहस्थस्य घटस्य कथमुदयाचलसंयोगोऽस्ताचलसंयोगो वेति चेत् परम्परयेति गृहाण। सा च स्वसमवायिसंयुक्तसंयोगरूपा। स्वपदेन संयोगो घट इति स्वसमवायिसंयुक्तसंयोगसम्बन्धेनोदयाचलसंयोगो घटे वर्तत इति तद्वैशिष्ट्योपपत्तिः। एवञ्च दिशमन्तरा तादृशव्यवहारस्य नोपपत्तिरिति दिशि प्रमाणमपि दर्शितं भवति। वाच्यादिव्यपदेशस्यास्योदयाचलसंयोगादिकमेवोपाधिः। सर्वमूर्त्तद्रव्यसंयोगित्वाद्विभुत्वम्। परममहत्परिमाणाश्रयत्वात् नित्यत्वञ्च। केचित्तु मध्याह्नसूर्यरश्मिसंयोगिनी दिगुदीचीति वदन्ति। तद्युक्तमेव। मध्याह्ने सूर्यस्योदङ्मुखत्वात्। रामायणेऽपि एतदवलम्ब्यैव दिग्व्यवहारः कृतः। कालवदस्यामपि संख्यादयः पञ्चैव गुणाः।

आकाशकालदिशामेकत्वादाकाशत्वादीनां न जातित्वम्। जातिर्हि नित्यानेकसमवेता। नैतेषामनेकसमवेतत्वम्। नवीनमतमाह — दीधितिकृतस्त्विवति। एवञ्च शब्दाश्रयत्वमतीतादिव्यवहारहेतुत्वं प्राच्यादिव्यवहारहेतुत्वञ्च परमात्मन एवेति तेषामाशयः। तत्रैतत् पदार्थनिरूपणे स्पष्टम्।

आत्मानं निरूपयति — आत्मत्वजातिमानिति। आत्मत्वजातिमत्त्वमात्मनो लक्षणम्। किं मानमिति चेत् तत्सूचयति समवायेनेत्यादि। तथा च ज्ञानाश्रयत्वमात्मनो लक्षणम्। विषयतया

जातिरित्युच्यते। यथा पृथिवीत्वादि। न चाकाशत्वादिकं तथा, आकाशादेरेकव्यक्तित्वेन तस्यानेकसमवेतत्वाभावादिति। दीधितिकृतस्तु दिक्कालाऽऽकाशा नेश्वरादतिरिच्यन्ते, तद्व्यवहारस्य परमात्मनैवोपपत्तेरिति प्राहुः। विस्तरस्तु पदार्थखण्डनादौ द्रष्टव्यः।

आत्मत्वजातिमान् समवायेन ज्ञानाश्रयो वाऽऽत्मा। स च द्विविधः जीवात्मपरमात्मभेदात्। तत्र जीवो बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाख्यसंस्कारवान् शरीरेन्द्रियादि-

---

घटादीनामपि ज्ञानाश्रयत्वमिति तन्नातिव्याप्तिवारणाय समवायेनेति। तथा च ज्ञानसमवायिकारणत्वमात्मनो लक्षणमिति पर्यवस्यति। ज्ञानसमवायिकारणतावच्छेदकतयाऽऽत्मत्वजातिसिद्धिः व्यज्यते। वस्तुतस्तूक्तप्रकारेणानुमीयमानाऽऽत्मत्वजातिः परमात्मनि दुर्लभा। समवायेन ज्ञानं प्रति तादात्म्येनाऽऽत्मा कारणमिति सामान्यकार्यकारणभावो न युज्यते। ईश्वरीयनित्यज्ञानस्य हेत्वनपेक्षत्वात्। अतः कार्यतावच्छेदकं जन्यज्ञानत्वमेव। तदवच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकारणता जीवात्मस्वेव, न त्वीश्वरे इति तदवच्छेदकतयानुमीयमानमात्मत्वं जीवेष्वेव सिध्येन्न त्वीश्वरे। अत ईश्वरे आत्मव्यवहार उपचारादिति मन्तव्यम्।

विभजते — स चेति। जीवात्मा परमात्मा चेत्यात्मा द्विधेत्यर्थः। जीवस्त्वनन्त इत्याह — तत्रेत्यादिना। बुद्धीत्यादिना तदीयगुणाः परिगणिताः। अहमिति प्रतीतिविषय इत्युक्त्याऽऽत्मनो मानसिकप्रत्ययविषयत्वमभिधीयते। न हि तद्विषयत्वं शरीरादीनां सम्भवतीति विशेषणेनाह — शरीरेन्द्रियादिव्यतिरिक्तः। आदिशब्देन मनो गृह्यते। प्रतिशरीरं भेदे हेतुः सुखादिवैचित्र्यादिति। अयम्भावः — प्रत्यक्षे इन्द्रियस्य करणत्वं, करणं हि कर्तृव्यापाराधीनं व्यापाराश्रयः। यथा चैत्रः कुठारेण छिनत्तीत्यत्र चैत्रीयव्यापारेण कुठार उद्यमन-

व्यतिरिक्तोऽहमिति प्रतीतिविषयः कर्ता भोक्ता च प्रतिशरीरं सुखादिवैचित्र्याद्भिन्नश्च। शरीरमेवात्मेति सौगताः, इन्द्रियाणीति तदेकदेशिनः। क्षणिकमालयविज्ञानमात्मेति विज्ञानवादिनः। नित्यं विज्ञानमात्मेत्यौपनिषदाः। एतन्मतविवेकनिरासप्रकारावात्मविवेकादिषु द्रष्टव्यौ। वयन्तु विस्तराद् बिभीमः। परमात्मा तु जगतः कर्ता। बुद्धीच्छाप्रयत्नास्त्रयः एव

निपतनरूपव्यापारः तेन काष्ठे द्वैधीभावरूपफलञ्च जायते। तत्र कर्तृव्यापाराधीनव्यापाराश्रयत्वं करणे कुठारे स्पष्टमेव। एवञ्च चक्षुरादीन्द्रियाणां करणत्वोपपत्त्यर्थं तन्नियन्तापरः कल्पनीयः। स आत्मेत्युच्यते। न चेन्द्रियाणामेव कर्तृत्वमस्तु करणत्वे हि परापेक्षेति चेन्न। चक्षुषाऽनुभूतस्य नेत्रविनाशे स्मरणानुपपत्तेः। एवञ्च चक्षुरादीनां न ज्ञानाश्रयत्वम्। शरिरस्यापि नाहमिति प्रत्यक्षविषयत्वम्। तथा सति बाल्येऽनुभूतानां यौवने स्मरणानुपपत्तिः। बाल्यकालावच्छिन्नशरीरस्य तदानीमभावात्। किञ्च मृतेऽपि ज्ञानाद्यापत्तिश्चः। मनसोऽपि न ज्ञानाश्रयत्वम्। तस्याणुत्वेन ज्ञानादीनामप्रत्यक्षत्वापत्तेः। अतः शरिरेन्द्रियमनोव्यतिरिक्ततया व्यतिरिक्तः ज्ञानाश्रयतयाऽऽत्मा कल्पनीय एव। तस्य च प्रतिशरीरं भेदाभावे सुखादिवैचित्र्यं न स्यात्।

मतभेदं दर्शयति — शरीरमेवेत्यादिना। शरीरमेवेति सौगताः बुद्धमतानुयायिनः। इन्द्रियाणीति तदेकदेशिनः बौद्धेषु केचिदित्यर्थः। क्षणिकमालयविज्ञानमात्मेति विज्ञानवादिनः। नित्यविज्ञानमात्मेति औपनिषदाः, वेदान्तिन इत्यर्थः। आश्रयाश्रयिनोरभेदकल्पनया तदा वादः। अत एव तत्स्वरूपः चित्स्वरूपो आनन्दस्वरूप इति ते वदन्ति।

परमात्मेति। जगतः कर्तेति तत्र प्रमाणं दर्शितम्। ईश्वरगुणानाह — बुद्धीति। ज्ञानम् इच्छा प्रयत्न इति त्रय एव ईश्वरे विशेषगुणाः। दीधितिकारस्तु सुखमप्यङ्गीचकार। जीवात्मनेव शरीरं

विशेषा इति प्राञ्चः। दीधितिकृतस्तु सुखमपि तत्राङ्गीचक्रुः। स चैको जीवविलक्षणस्सर्वज्ञश्शरीररहितश्चेति संक्षेपः।

मनस्त्वजातियोगि मनः। सुखादिसाक्षात्कारसाधनतया च तस्य सिद्धिः। तत्सम्बन्धात् बाह्येन्द्रियाणि ज्ञानं जनयन्ति। तच्चाणुपरिमाणमेकदा सर्वेन्द्रियैर्ज्ञानाजननात्। अष्टावधानवतामवधानादावन्येषां दीर्घशष्कुलीभक्षणादौ च युगपत् सर्वेन्द्रियैर्ज्ञाना[1]दर्शनादाकाशादिवद्विभवं तस्येति मीमांसकाः।

नाङ्गीकुर्वन्ति। अतः स एक एव। अत एव जीवाद्वैलक्षण्यम्। विस्तरस्त्वन्यत्र द्रष्टव्यः।

मनो निरूपयति — **मनस्त्वजातियोगीति**। मनसः सत्वे किं प्रमाणमित्याशङ्क्याह — सुखादीति। अयम्भावः — सुखसाक्षात्कारः (अहं सुखीत्याकारक सुखप्रत्यक्षम्) यत्किञ्चित्करणकः साक्षात्कारत्वात् रूपादिसाक्षात्कारवत्। साक्षात्कारकरणत्वञ्च चक्षुरादीनां न भवति। चक्षुरादिबाह्येन्द्रियविरलानामपि अहं सुखीति सुखाद्यनुभवात्। एवञ्च तत्करणतया परिकल्पमानं मनोरूपमिन्द्रियमणुपरिमाणमेव। तस्यात्मनेव विभुत्वे एकदैव नानेन्द्रियसंयोगसम्भवात्। मध्यमपरीमाणत्वे तु तस्यानित्यत्वापत्तिः। अनेकध्वंसप्रागभावादिकल्पनया गौरवञ्च। अतोऽणुत्वमङ्गीक्रियते। आत्मनः संयोगश्च सकलविधज्ञानानां कारणम्। स एव ज्ञानादीनामसमवायिकारणम्। आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेनेति प्रत्यक्षक्रमः।

ननु ज्ञानादयो आत्मविशेषगुणा आत्ममनस्संयोगेन जायन्ते। आत्मनश्च विभुत्वात् सर्वदापि ज्ञानं वा इच्छा वा कृतिर्वा जायत इत्यत्र न विवादः। सुषुप्तिवेलायां तु न किमपि जायते। मनसि पुरीतति प्रविष्टे सुषुप्त्यनुभवः। यद्यपि तदानीमपि आत्ममनस्संयोगो विद्यते तथापि तात्कालिकसंयोगस्य फलोपधायकत्वं नाङ्गीकुर्मः।

---

१ 'जननाद्'

वेदान्तिनस्तु सर्वदा ज्ञानयौगपद्यायौगपद्ययोरदर्शनान्न तस्य वैभवमणुत्वं वा, किन्तु संकोचविकासात्मकं मध्यमपरिमाण-मित्याहुरिति संक्षेपः ।

॥ इति द्रव्यनिरूपणम् ॥

पुरीततोऽन्यत्र जायमानस्यैव संयोगस्य ज्ञानरूपफलोपधायकत्वमिति कल्प्यते । अतः मनसोऽणुत्वमवश्यमेवाङ्गीकर्तव्यम् । मीमांसकास्तु विभुत्वमङ्गीकुर्वन्ति । वेदान्तिनस्तु नानाज्ञानयौगपद्यादर्शनात् न विभुत्वमणुत्वं वेति वदन्ति । तेषां मते सङ्कोचविकासात्मकमध्य-मपरिमाण मन इति वक्तव्यम् ।

इति द्रव्यनिरूपणम्

अथ गुणनिरूपणम्

अथ गुणा निरूप्यन्ते । गुणत्वजातिमन्तो गुणाः द्रव्यकर्मान्यत्वे सति सामान्यवन्तो वा । रूपरसगन्धस्पर्शपरत्वापरत्वगुरुत्वद्रवत्वस्नेहवेगानां मूर्तगुणत्वं साधर्म्यम् । शब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनानाममूर्तगुणत्वम् । संख्यापरिमाणपृथक्त्वसंयोगविभागानामुभयगुणत्वम् । धर्मा-

---

अथावसरसङ्गत्या गुणा निरूप्यन्ते । सङ्गतिर्नाम सम्बन्धविशेषः । स चानन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयस्मरणानुकूलसम्बन्धः । यथा—द्रव्यनिरूपणानन्तरं गुणनिरूपणेऽवसरसङ्गतिः प्रतिबन्धकीभूतशिष्यजिज्ञासानिवृत्तौ अवश्यवक्तव्यं हि अवसरः । द्रव्यं कीदृशमिति शिष्यो जिज्ञासते । तदानीं गुणः क इति जिज्ञासा नोदेति । द्रव्यनिरूपणानन्तरं तु पूर्वजिज्ञासायाः निवृत्तत्वाद्गुणविषयकजिज्ञासा सञ्जायते । अतः गुणस्यावश्यवक्तव्यत्वमिति गुणेऽवसरसङ्गतिः स्पष्टा । अनन्तराभिन्नप्रयोजिका जिज्ञासाऽत्र गुणः क इति जिज्ञासा । तज्जनकज्ञानं गुणविषयकज्ञानम् । तद्विषयकस्मरणानुकूलसम्बन्धः गुणेऽवश्यवक्तव्यत्वमेवेति सङ्गत्युपपत्तिः ।

गुणसामान्यलक्षणमाह—गुणत्वजातिमन्त इति । लक्षणान्तरमाह — द्रव्यकर्मान्यत्व इति । द्रव्यकर्मभिन्नत्वे सति जातिमत्त्वं गुणसामान्यलक्षणमिति भावः ।

ननु गुणत्वजातौ किं मानमिति चेदत्र ब्रूमः — द्रव्यकर्मभिन्ने सामान्यवति या कारणता सा किञ्चिद्धर्मावच्छिन्ना, कारणतात्वादित्यनुमानेन 'तादृशकारणतावच्छेदकतया गुणत्वजातिं साधयामः ।

अत्रापरे प्रत्यवतिष्ठन्ते — गुणसामान्यवृत्त्यैका कारणता दुर्लभा । एवञ्च पक्षासिद्धिः । ननु रूपादीनां पृथक् पृथक् कारणत्वं लभ्यते तत्समुदायस्य च पक्षत्वमस्त्विति चेन्न, पारिमाण्डल्यस्याकारणत्वस्य

धर्मगुरुत्वभावनाव्यतिरिक्तानामिन्द्रियग्राह्यत्वम् । रूपरस-गन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्व-स्नेहवेगस्थितस्थापकानां बहिरिन्द्रियग्राह्यत्वम् । बुद्धिसुख-दुःखेच्छाद्वेषप्रयत्नानामन्तरिन्द्रियग्राह्यत्वम् । रूपरसगन्धस्पर्श-शब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नानामेकेन्द्रियग्राह्यत्वम् । संख्या-परिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्काराणां द्वीन्द्रिय-ग्राह्यत्वम् । रूपरसगन्धस्पर्शबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्मा-

---

पूर्वं निरूपितत्वात् । तथा चोक्तरीत्या गुणत्वजातिसाधनं न सम्य-गिति । अत एव लक्षणान्तरमभिहितमिति बोध्यम् ।

अथ गुणविषयेऽपि साधर्म्यनिरुपणमारभते **रूपरस** इत्यादिना । रूपादीनां दशानां गुणानां मूर्तगुणत्वं साधर्म्यमिति भावः । उक्ता एते दशगुणाः पृथिव्यप्तेजोवायुमनस्सु मूर्तेषु द्रव्येष्वेव वर्तन्त इति लक्षणसमन्वयः । **शब्देति** । शब्दादीनां दशानाममूर्तगुणत्वं साधर्म्यम् । आकाशकालदिगात्मानोऽमूर्तद्रव्याणि । शब्दादीनां दशानां गुणानां विभुमात्रवृत्तित्वाल्लक्षणसमन्वयः । शब्दव्यतिरिक्तानां बुध्यादीनां नवानामात्मगुणत्वं साधर्म्यं वक्तुं शक्यमिति बोध्यम् । अथेतरेषां साधर्म्यमाह — **संख्येति** । उभयगुणत्वं — मूर्तामूर्तोभयगुणत्वमिति भावः । **धर्माधर्मेति** । धर्माधर्मगुरुत्वभावनानां केनापीन्द्रियेण ग्रहीतुमशक्यत्वादितरेषामिन्द्रियग्राह्यत्वं साधर्म्यं वक्तुं शक्यते । रूपा-दीनां चक्षुरादीन्द्रियग्राह्यत्वं स्पष्टमेव । संख्यादयस्तु चक्षुषा त्वचा च गृह्यन्ते । अतः तेषां द्वीन्द्रियग्राह्यत्वं साधर्म्यं वक्तुं शक्यम् । अत्र सर्वत्रापि द्रव्यभिन्नत्वं विशेषणं देयम् । अथवा गुणत्ववत्त्वम् । अतः कर्मणि नातिव्याप्तिः । बुध्यादीनां यत्नान्तानामन्तरिन्द्रिय-ग्राह्यत्वं मनोग्राह्यत्वमिति यावत् । **रूपेत्यादि** । द्वीन्द्रियग्राह्यत्व-मित्यन्तं स्पष्टम् । किं नाम विशेषगुणत्वमित्याशङ्क्याह — **तच्चेति** । लक्षणवाक्यं व्याचष्टे — **यामित्यादिना** । यथा नीलजातिमादाय रूपे लक्षणसमन्वयः कर्तव्यः । स्वपदेन नीलत्वं गृह्यते । स्वाश्रयः नीलरूपम् । तत्समानाधिकरणः द्रव्यविभाजकधर्मः पृथिवीत्वम् ।

धर्मभावनास्नेहसांसिद्धिकद्रवत्वशब्दानां विशेषगुणत्वम्। तच्च स्वाश्रयसमानाधिकरणगुणावृत्तिगुणत्वव्याप्य जातिमत्त्वम्। यां जातिमादाय लक्ष्ये लक्षणसङ्गतिः, तत्परं लक्षणे स्वपदम्। तथा च स्वाश्रयसमानाधिकरणो यो गुणस्तद्वृत्तिर्या गुणत्वव्याप्या जातिस्तद्वत्त्वम्। वर्तते चेदं नीलरूपादौ। स्वं नीलत्वादि, तदाश्रयो यो नीलादिः तदधिकरणवृत्तिर्यो द्रव्यविभाजकधर्मः पृथिवीत्वादिः तदत्यन्ताभावसमानाधिकरणो जलादौ वर्तते यो गुणः संयोगादिः, तदवृत्तिर्या गुणत्वव्याप्या जातिः नीलत्वादिरेव तद्वत्त्वं नीलादेरिति। संयोगादौ सामान्ये

तदत्यन्ताभावो जलादौ। तद्वृत्तिगुणः शीतस्पर्शादिः। तदवृत्तिः गुणत्वव्याप्या जातिः नीलत्वम्। तद्वत्त्वं गन्धे। इति लक्षणसमन्वयः। एवं गन्धत्वजातिमादाय गन्धे लक्षणसमन्वयः क्रियते। यथा गन्धत्वाश्रयो गन्धः। तत्समानाधिकरणो द्रव्यविभाजकधर्मः पृथिवीत्वम्। तदत्यन्ताभावो जलादौ। तद्वृत्तिगुणाः शीतस्पर्शादयः। तदवृत्तिः गुणत्वव्याप्या च जातिः गन्धत्वम्। तद्वत्त्वं गन्धे इति लक्षणसमन्वयः। एवं रसादिष्वपि बोध्यम्। लक्षणस्यातिव्याप्त्यभावं निरूपयति — संयोगादावित्यादिना। रूपादावितिं। रूपादिषु चतुर्विंशतौ गुणेष्वित्यर्थः। घटकत्वं सप्तम्यर्थः। रूपादिघटकशब्दादीनामव्याप्यवृत्तित्वं साधर्म्यमिति भावः। अव्याप्यवृत्तित्वं नाम स्वाभावसमानाधिकरणमिति पूर्वमेवोदितम्। इतरेषां व्याप्यवृत्तित्वं साधर्म्यमिति भावः।

अथ प्रत्येकं गुणान् निरूपयितुमारभते — तत्रेति। तत्र रूपादिषु गुणेषु। रूपत्वजातिमत्त्वं रूपस्य लक्षणमिति भावः। रूपत्वजातौ किं प्रमाणमिति चेत् प्रत्यक्षमेव। यो गुणो यदिन्द्रियग्राह्यः तन्निष्ठा जातिः तदभावश्च तेनैव गृह्यत इति नियमात्। यद्यपि कृतविद्यानां रूपत्वजातिरनुभवगोचरातथापि तदितरत्रिषये सन्देह एव। अतः व्यावर्तकं लक्षणान्तरमाह — चक्षुर्मात्रग्राह्यो गुणो वेति। चक्षुर्मात्रग्राह्यत्वे सति गुणत्वं रूपस्य लक्षणमिति भावः।

च न लक्षणसत्वम्। स्वं संयोगत्वम्, तदाश्रयसमानाधिकरणो यो द्रव्यविभाजको धर्मः पृथिवीत्वादिः, तदत्यन्ताभावसमानाधिकरणो जलादौ वर्तते यो गुणः संयोगादिः, तद्वृत्तिर्या गुणत्वव्याप्या जातिः नीलत्वादिरेव तद्वत्त्वं नीलादेरिति। संयोगादौ सामान्ये च न लक्षणसत्त्वम्। स्वं, संयोगत्वं, तदाश्रयसमानाधिकरणो यो द्रव्यविभाजको धर्मः पृथिवीत्वादिः, तदत्यन्ताभावसमानाधिकरणो यो गुणः संयोगादिरेव तद्वृत्तिरेव संयोगत्वादिः, न तदवृत्तिरितीतरेषां सामान्यगुणत्वं वर्तते। रूपादी शब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्म–

ग्राह्यत्वं नाम ग्रहविषयत्वमित्यर्थः। तथा च चक्षुर्मात्रजन्यग्रहविषयत्वमित्युक्तौ ग्रहप्रत्यक्षमेवेति सुगमम्। मात्रशब्देन इतरेन्द्रियव्यवच्छेदः क्रियते। तथा च चक्षुर्जन्यप्रत्यक्षविषयत्वे सति चक्षुरितरेन्द्रियजन्यप्रत्यक्षाविषयत्वे सति गुणत्वं रूपस्य लक्षणमिति फलितम्। यथा—पटो नील इति चक्षुषा गृह्यते अन्धेन न गृह्यते। नीलरूपश्च गुणः। एवञ्च चक्षुर्जन्यप्रत्यक्षविषयत्वविशिष्टचक्षुरितरेन्द्रियजन्याविषयत्व विशिष्टगुणत्वं नीलरूपे प्रतिपादितमिति लक्षणसमन्वयः। प्रथमदलानुपादानेऽतीन्द्रियगुरुत्वादीनां केनापीन्द्रियेण गृहीतुमशक्यत्वाच्चक्षुरितरेन्द्रियाग्राह्यत्वविशिष्टगुणत्वं वर्तते तत्रातिव्याप्तिः स्यात्। तद्वारणाय प्रथमदलम्। द्वितीयदलानुपादाने संयोगविभागादीनां चक्षुर्ग्राह्यत्वं गुणत्वञ्चेति तत्रातिव्याप्तिः स्यात्। तद्वारणाय द्वितीयदलम्। संयोगस्य त्वगिन्द्रियेणापि ग्राह्यत्वात् चक्षुरितरेन्द्रियाग्राह्यत्वाभावात् तद्वारणम्। विशेष्यानुपादाने रूपत्वजातेरपि चक्षुर्ग्राह्यत्वं चक्षुरितरेन्द्रियाग्राह्यत्वञ्च विद्यते पूर्वनियमानुरोधात्। तद्वारणाय गुणत्वमिति। न च प्रभाघटसंयोगस्य चक्षुरितरेन्द्रियाग्राह्यत्वाच्चक्षुर्ग्राह्यत्वात् गुणत्वाच्च तत्रातिव्याप्तिरिति वाच्यम्। विशेषगुणत्वेन विवक्षणात्। यद्यपि परमाणुरूपस्य चक्षुरादीन्द्रियगतानुद्भूतरूपस्य चाप्रत्यक्षत्वात्तत्राव्याप्तिस्तथापि चक्षुरिन्द्रियग्राह्या चक्षुरितरेन्द्रियाग्राह्या च या जातिः तादृशजातिमत्त्वे सति विशेषगुणत्वमिति लक्षणपरिष्करणान्नाव्याप्तिः। रूपत्वजातेः चक्षुरित–

भावनासंयोगविभागानामव्याप्यवृत्तित्वम् इतरेषां व्याप्यवृत्तित्वमित्यादिगुणानां साधर्म्यं द्रष्टव्यम् ।

तत्र रूपत्वजतिमद्रूपं, चक्षुर्मात्रग्राह्यं गुणो वा । शुक्लनीलपीतहरितलोहितश्यामचित्रभेदेन सप्तविधं तत् । अव्याप्यवृत्तिनानारूपैरेव चित्रव्यवहारस्योपपत्तेरतिरिक्तचित्रे मानाभावेन षड्विधमेव रूपमित्यन्ये । तच्च द्विविधं नित्यानित्यभेदात् । तत्र पार्थिवरजः परमाणुगतन्नित्यम् । पार्थिवरजपरमाणुगतं कार्यद्रव्यगतञ्चानित्यम् । प्राभाकरास्तु नीलारुणादि-

---

रेन्द्रियाग्राह्यत्वं चक्षुर्ग्राह्यत्वञ्च वर्तते । तां जातिमादाय सर्वेष्वपि लक्षणसमन्वयः सम्भवति । एवं जातिघटितलक्षणापरिष्कारे विशेषगुणत्वमिति विशेष्यदलं नोपादेयम् । संयोगत्वजातेः चक्षुर्मात्रग्राह्यत्वाभावात् । रूपत्वस्य च तादृशजातिमत्त्वाभावाच्च दोषाप्रसक्तेः । तथा च चक्षुरिन्द्रियजन्यप्रत्यक्षविषयचक्षुरितरेन्द्रियजन्यप्रत्यक्षाविषयजातिमत्त्वं रूपस्य लक्षणमिति पर्यवसितम् ।

तद्विभजते — **शुक्लनीलेति** । चित्ररूपानङ्गीकर्तॄणां मतमुपन्यस्यति — **अव्याप्यवृत्तीत्यादिना** । अयम्भावः — चित्रः पट इति व्यवहारोपपत्तये चित्राभिध सप्तमं रूपमङ्गीक्रियते । तन्मास्तु । चित्रः पट इति प्रतीतिः तदवयवगतशुक्लनीलादिरूपविषयत्वेनैवोपपन्ना । अत षड्विधमेव रूपमिति ते वदन्ति । अन्ये इत्यस्वरसद्योतकम् । तद्बीजन्तु विषयतासम्बन्धेन द्रव्यचाक्षुषप्रत्यक्षं प्रति समवायसम्बन्धेनोद्भूतरूपस्य कारणत्वं वक्तव्यम् । अन्यथाऽऽकाशकालादेरपि चाक्षुषप्रत्यक्षापत्तिः । एवञ्च नानावर्णतन्तुनिर्मिते पटे रूपाभावे तस्याप्रत्यक्षत्वापत्तिः । न च तत्र पटे एकावयवावच्छेदेन नीलरूपमन्यावयवावच्छेदेनान्यरूपमित्यङ्गीकारेणोपपत्तिः स्यादिति वाच्यम् । रूपस्याव्याप्यवृत्तित्वानङ्गीकारात्पटस्य नीरूपत्वापत्तेः । अतस्तत्तदवयवगतरूपैरसमवायिकारणभूतैरवयविनि पटे रूपान्तरोत्पत्तिरवश्यमङ्गीकर्तव्या । तदेव चित्ररूपमित्याभिधीयते । इति ।

व्यक्तयः एकैकाः । न चैकनीलनाशे जगतो नीलशून्यतापत्तिरिति वाच्यम् । नीलादेर्नित्यत्वाभ्युपगमेन नाशविरहादिति वदन्ति । तन्न । नीलो नष्टो रक्त उत्पन्न इत्यनुभवबलेन नीलादेरुत्पाद-विनाशशालितया नित्यत्वायोगात् । नीलादेस्तारतम्यस्यानु-भूयमानतयैकत्वायोगाच्चेति संक्षेपः ।

रसत्वजातिमान् रसनेन्द्रियग्राह्यगुणो वा रसः । मधुर-तिक्तकटुकषायाम्ललवणचित्रभेदेन सप्तविध इति सम्प्रदायः। परे त्वतिरिक्तचित्ररसे मानाभावः, चित्ररसप्रत्ययस्यावयव-

---

तच्चेति । सप्तविधमपि रूपमित्यर्थः । जलतेजः—परमाणुगतन्नित्यम् । पार्थिवपरमाणुगतमिति । परमाणोः नित्यत्वेऽपि तद्गतरूपस्य पाकेन नाशादनित्यत्वमेव । कार्यद्रव्यगतमिति पृथिव्यप्तेजस्सु अनित्येषु वर्तमानं अनित्यमेवेत्यर्थः । प्राभाकरमतमनूद्य निरस्यति — प्राभाकरस्त्वित्यादिना । तेषां मते नीलादिव्यक्तीनां नित्यत्वमिति भावः । तच्चानुभवविरुद्धमित्याह — नीलं इत्यादिना । नीलो नष्टः रक्त उत्पन्न इति प्रत्यक्षमेव नीलादिरूपाणां विनाशोद्भवयोः प्रमाणम् । एवञ्च तस्य नित्यत्वमपि न युज्यते । अयमतितरां नीलः, अयमीषन्नील इति प्रतीतिरेव नीलादिव्यक्तीनामनेकत्वसाधिका ।

अथ रसं लक्षयति — रसत्वजातिमानिति । रसनेन्द्रियग्राह्य-गुणो वेति । रसनेन्द्रियग्राह्यत्वे सति गुणत्वं रसस्य लक्षणम् । दलप्रयोजनन्तु पूर्ववदनुमेयम् । परमाणुरसेऽव्याप्तिवारणाय जाति-घटिततया लक्षणं परिष्करणीयम् । रसनेन्द्रियजन्यप्रत्यक्षविषय-जातिमत्त्वमिति । तदेव रसत्वजातिमानिति प्रथमभागेन विवक्षितम् ।

तं विभजते — मधुरेत्यादि । मधुराम्ललवणयोजनेन उत्पाद्यमाने व्यञ्जनेऽनुभूयमानो यो रसः स एव चित्ररसत्वेनाभिधीयत इति साम्प्रदायिका आहुः । सिद्धान्तमाह — परेत्वित्यादिना । वस्तुतः षड्विध एव रसः । उक्तविधव्यञ्जनेऽवयवरसेनैवोपपत्तिः । अवयविनः

गतनानारसैरेवोपपत्तेः । अवयविनो नीरसत्वेऽपि क्षतिविरहा-दित्याहुः । पूर्ववदयमपि द्विविधः । जलपरमाणुगतो नित्यः । जन्यजले पृथिव्याञ्च सर्वत्रानित्यः । अवयविरसे चावयवरसोऽ-समवायिकारणम् ।

गन्धत्वजातिमान् घ्राणग्राह्यविशेषगुणो वा गन्धः । स च द्विविधः, सुरभिरसुरभिश्चेति । सर्वो गन्धोऽनित्यः । अव-यविगन्धेऽवयवगन्धोऽसमवायिकारणं च ।

नीरसत्वेऽपि न कापि हानिः । नीरूपत्वे प्रत्यक्षानुपपत्त्या चित्र-रूपमङ्गीकृतम् । नीरसत्वे तादृशदोषो नास्त्येवेति भावः । तद्विभाग-माह — पूर्ववदिति । पृथिवीजलोभयवृत्तिरयं रसः पृथिवीगत सर्वोऽपि अनित्यः । जन्यजलेऽपि तथा । जलपरमाणुगतस्तु नित्यः । तत्र पाकाभावात् । अवयविरसे च अवयवरसोऽसमवायिकारणम् ।

गन्धं निरूपयति —गन्धत्वजातिमान् इति । स्पष्टम् ।

स्पर्शं निरूपयति — स्पर्शत्वजातिमानित्यादि । त्वगिन्द्रिय-मात्रग्राह्यगुणत्वं स्पर्शस्य लक्षणम् । तथा च त्वगिन्द्रियग्राह्यत्वे सति त्वगितरेन्द्रियाग्राह्यत्वे सति गुणत्वं स्पर्शस्य लक्षणम् । तच्च शीतादि-स्पर्शे स्पष्टमेवेति लक्षणसमन्वयः । अत्रापि परमाणुस्पर्शेऽव्याप्ति-वारणाय जातिघटिततया लक्षणपरिष्कारः करणीयः । तदेतद्ध्व-नयन्नेत्र स्पर्शत्वजातिमानिति अभिदधे ।

तं विभजते — त्रिविध इत्यादिना । पूर्ववन्नित्यानित्यभेदेनापि द्वैविध्यं बोध्यम् । तत्र परमाणुगतो नित्यः । पार्थिवपरमाणौ तु अनित्य एव । जन्यद्रव्यगतोऽपि तथा ।

अथ पृथिवीगतानां रूपादीनां विशेषं व्याचष्टे — सर्वेऽप्येते इत्यादिना । एते चत्वारः रूपरसस्पर्शगन्धाः अवयवरूपादित इति । अवयवरूपादीनामवयविगतरूपादिकं प्रत्यसमवायिकारणत्वादिति

स्पर्शत्वजातिमान् त्वगिन्द्रियमात्रग्राह्यगुणो वा स्पर्शः। स च त्रिविधः शीतोष्णानुष्णाशीतस्पर्शभेदात्। नित्यानित्यभेदेन द्विविधश्च। आप्यतैजसवायवीयपरमाणुषु नित्यः। जन्यद्रव्ये पार्थिवपरमाणौ चानित्यः। अवयविस्पर्शोऽवयवस्पर्शोऽसमवायी च। सर्वेऽप्येते चत्वारो द्रवत्वञ्च पृथिव्यां क्वचिदवयवरूपादितः क्वचिच्च पाकादुत्पाद्यन्ते। केचिदाश्रयनाशात्, केचित् पाकाद्विनश्यन्ति। न च पृथिवीपरमाणुगतानामेषामुत्पादविनाशयोर्मानाभाव इति वाच्यम्। नीलमधुरसुरभिकठिनादिवस्तूनां

भावः। पाकादिति। पाकजरूपादौ पाकस्यैवासमवायिकारणत्वम् आश्रयनाशादिति। पटगतरूपविनाशे पटनाशस्यैव हि कारणत्वम्। पाकादिति। यथा नूतनतया निर्मितो घटः चुल्यां निहितोऽग्निसंयुक्तः विपर्यस्तरूपवान् भवति (श्यामलः पाटलो भवति)। अत्र पूर्वश्यामलनाशेऽग्निसंयोगस्यैव कारणत्वम्। पृथिवीपरमाणुगतानां रूपादीनां भस्म उत्पद्यते। भस्मनि शुक्लरूपं दृश्यते। गोमये तु नीलरूपं गोमयारम्भकपरमाणव एव भस्मारम्भका इत्यत्र न सन्देहः। अवयविगुणानाञ्चावयवगुणजन्यत्वमवश्यमङ्गीकर्तव्यम्। तथा च भस्मारम्भकपरमाणोः शुक्लरूपवत्त्वमवश्यमङ्गीकर्तव्यम्। तच्च गोमयतादशायां न सम्भवति। गोमये नीलरूपदर्शनेन तद्वत्ताया एव तदानीमौचित्यात्। एवञ्च गोमयनाशानन्तरं तद्रूपारम्भकरूपनाशे तत्र परमाणौ भस्मरूपजनकरूपोत्पत्तिरवश्यमङ्गीकर्तव्या। तथा च नित्यपरमाणुगतरूपस्योत्पादविनाशौ सिद्धौ। यदि तु भस्मारम्भकपरमाणूनां गोमयारम्भकपरमाणुतादशायामपि भस्मरूपसजातीयरूपाश्रयता तर्हि गोमयेऽपि भस्मरूपसजातीयरूपमुपलभ्येत।

एवञ्च गोमयनाशेन भस्मोत्पत्त्यनन्तरमेव भस्मरूपसजातीयरूपोत्पत्तिरिति सिद्धे परमाणुगतरूपाणामनित्यत्वमुक्तप्रायमेव।

इदन्तु बोध्यम् — द्रव्यत्वव्याप्यजातयः परमाणौ न स्वीक्रियन्ते। द्रव्यत्वव्याप्यपृथिवीत्वव्याप्यघटत्वजातिः घटारम्भकपरमाणौ नास्तीति

भस्मनि विपरीतरूपादय उपलभ्यन्ते । न च भस्मारम्भकपर-
माणुषु तादृशरूपादिकमन्तरेण भस्मनि ते भवितुमर्हन्ति ।
कारणगुणानां कार्यगुणारम्भकत्वादिति भस्मारम्भकपरमाणु-
भिस्तादृशरूपादिमद्भिर्भवितव्यम् । त एव च परमाणवस्तादृश-
वस्तुनोऽप्यारम्भकाः । अतिरिक्तकल्पने गौरवान्मानाभावाच्च ।
ते च यदि भस्मारम्भककालात्प्रागपि भस्मगतरूपादिजातीय-
रूपादिमन्तस्तदा तादृशैस्तैराब्धे वस्तुन्यपि* तादृशरूपाद्युप-
लम्भापत्तिः । अतस्तादृशवस्तुनः तेजस्संयोगे सति तदारम्भ-

भावः । तथा स्वीकारे तु क्षीरनाशेन जायमाने दध्नि क्षीरत्वापत्तिः
स्यात् । दधिक्षीरयोरुभयोरपि समानपरमाण्वारब्धत्वात् । अतः
घटपटाद्यारम्भकपरमाणुषु पृथिवीत्वमेवाभ्युपेयम् । इति ।

अथ पाकं प्रति विचारयति – अथेति । पृथिवीगतरूपादि-
चतुष्टयं पाकजमवयवगुणजन्यमिति द्विधा वक्तुं शक्यते । तत्र क्व
पाकात् रूपाद्युत्पत्तिः क्व वाऽवयवरूपादिभ्य इत्यत्रेति प्रश्नः । अथ
वैशेषिकसिद्धान्तमाह – अत्र सिद्धान्तेत्यादिना । समवेतनाशं प्रति
समवायिकारणनाशः कारणमिति तेषां मतम् । एवञ्च घटे तेज-
स्संयोगे सत्यपि घटसमवेतरूपादीनां नाशो भवेद्घटाविनाशे । अतः
पाकेन (विजातीयतेजस्संयोगेन) प्रथमं घटरूपद्रव्यनाशः तदनन्तरं
रूपनाश इति वक्तव्यम् । घटनाशेऽपि तत्समवायिकारणनाशस्य
कारणत्वात् कपालनाशः पूर्वं वक्तव्यः । एवंक्रमेण त्र्यणुकनाश-
पर्यन्तं वक्तुं शक्यते । द्व्यणुकनाशे तु समवायिकारणनाशस्य न
कारणत्वम् । समवायिकारणयोः परमाण्वो नित्यत्वात् । अपि तु
असमवायिकारणस्य परमाणुद्वयसंयोगस्य नाश एव तत्र हेतुन-
याभ्युपगन्तव्यः । एवञ्च पाके सति प्रथमं परमाणुद्वयसंयोगनाशः ।
तदनन्तरं द्व्यणुकनाशः । ततः परं त्र्यणुकनाशमिति क्रमेण घटनाश

---

* "तादृशरूपादयो भवेयु । इदानीं वा यदि ते नीलादि-
मन्तस्तदा तद्भस्मन्यपि" ।

कपरमाणुष्वपि तेजस्संयोगेन पूर्वरूपादिनाशेन तदा रूपान्तरोत्पादोऽङ्गीकर्तव्य इति सिद्धं नित्यपृथिवीगतानां तेषामनित्यत्वमित्येषा दिक्। अथ पाकाद्रूपाद्युत्पत्तिः क्व, क्व वावयवरूपादित इति चेद्, अत्र सिद्धान्तानुयायिनः—समवेतनाशं प्रत्याश्रयनाशस्य हेतुतया विना कारणं कार्योत्पत्तेरसम्भवात्। अतः पाकेन द्व्यणुकाद्यन्त्यावयविपर्यन्तमवयवनाशक्रमेण नश्यति। नष्टे च तस्मिन् केवलेषु परमाणुषु पाकतश्श्यामनाशरूपान्तरोत्पत्ती सम्पद्येते। ततो द्व्यणुकादिक्रमेण कार्य-

---

उपपादनीयः। अत्र परमाणुद्वयसंयोगनाशक्षण एव परमाणुगतानां पुरातनरूपादीनामपि नाशो वक्तव्यः। तदनन्तरं परमाणुषु विजातीयरूपादय उत्पाद्यन्ते। अतः परं तादृशपरमाणुभिः द्व्यणुकाः विजातीयरूपादिविशिष्टा उत्पाद्यन्ते। तैः द्व्यणुकैः तथाविधाः त्र्यणुकादयश्चेति क्रमेण कपालिकाः कपालौ घटश्चोत्पाद्यन्ते इति।

तदेतत्सर्वं सिद्धान्तानुयायिन इत्यारभ्य रूपान्तरोत्पादावित्यन्तेन ग्रन्थेन स्पष्टीकृतम्। अत्रारुचिं हृदि निधाय नैयायिकमतं वक्तुमुपक्रमते—**नैयायिकाः पुन** इति। अयम्भावः—मृत्पिण्डमादाय चक्रोपरि निक्षिप्य चक्रभ्रमणेन स्वाभिमताकारं घटमुत्पाद्याऽऽतपे शोषयित्वा चुल्युपरि निधाय वह्निना तं दाहयति। तदनन्तरमानीतं घटं प्रेक्ष्य सोऽयं घट इति प्रेक्षकः प्रत्यभिजानाति। तत्कथमुपपद्यते पूर्वमतानुसारे। प्रथमनिर्मितस्य घटस्य नष्टत्वात्। अतः घटो न नश्यतीत्येवाभ्युपगन्तव्यम्। अपि तु कथं रूपान्तरोपलम्भ इति चेदुच्यते। समवेतनाशं प्रति समवायिकारणनाशस्य कारणत्वं वक्तुं न प्रभवामः। द्व्यणुकनाशानुपपत्तेः। तत्रासमवायिकारणनाशः हेतुरिति चेदन्यत्रापि असमवायिकारणनाशस्यैव कारणत्वंकल्प्यताम्। किं वैषम्याभ्युपगमेन। तथा च पाकेन प्रथमरूपादयो नश्यन्ति। अभिनवाश्चोत्पद्यन्ते। अभिनवरूपोत्पत्तौ अग्निसंयोगस्यैवासमवायिकारणत्वम्। पूर्वमतेऽनेकध्वंसोत्पादकल्पने मानाभावो गौरवञ्च न परोक्षं सुधियाम्। अत एव पिठरपाकवादिनो नैयायिका इति वदन्ति।

द्रव्यान्तराण्युत्पद्यन्ते। ततस्तेषु कारणगुणक्रमेण रूपान्तरोत्पादः। इत्थञ्च पाकात् परमाणावेव पूर्वरूपनाशरूपान्तरोत्पादाविति। नैयायिकाः पुनरेवमुपवर्णयन्ति —पाकेन द्वयणुकाद्यन्त्यावयविपर्यन्तं द्रव्यनाशद्रव्यान्तरोत्पादौ न मन्तव्यौ, गौरवान्मानाभावाच्च। न चाश्रयनाशस्य समवेतनाशहेतुतया विना पूर्वद्रव्यनाशं पूर्वरूपनाशो न सम्भवतीति वाच्यम्। विनाप्याश्रयनाशं परमाणुरूपादिनाशेनोक्तकार्यकारणभावाभावात्। अपि च पूर्वद्रव्यनाशाङ्गीकारे श्यामघटादौ कृतानां रेखोपरेखादीनां पाकानन्तरमनुपलम्भापत्तिः। न चावयविनावष्टब्धेष्ववयवेषु

अत्रेदं तत्त्वम् — अवयविनि विजातीयाग्निसंयोगेन (पाकेन) परमाणुपर्यन्तं नश्यति। ततः परमाणौ पूर्वरूपनाशः ततो रूपान्तरोत्पत्तिः। तादृशपरमाणुभिः द्वयणुकादिक्रमेणावयवी जायते। एवञ्च द्वयणुकादिगतरूपादीनामवयवगुणपूर्वकत्वं वक्तुं शक्यम्। तदेतत् प्राचां मतम्। अपरे नैयायिकास्त्ववयविन्यग्निसंयोगेन नावयवी नश्यति। किन्त्ववयविनः बहुच्छिद्रतया तद्द्वारा वह्निरन्तःप्रविश्य तदारम्भकसकलपरमाणुष्वपि रूपादीनि विनाशयति रूपान्तराण्युत्पादयति च। ततः क्रमेण द्वयणुकादिषु रूपान्तरोत्पत्तिः इत्याहुः। अस्मिन् पक्षे सोऽयं घट इति प्रत्यभिज्ञायाः न काप्यनुपपत्तिः। पक्षद्वयमपि परमाणुष्वेव पाकः नावयविनि इति मतानुसारेण। नवीननैयायिकास्तु अवयविन्यपि पाकमङ्गीकृत्याग्निसंयोगेन घटे एव पूर्वरूपनाशः रूपान्तरोत्पत्तिश्च जायते इति वदन्ति। पूर्वमतद्वयेऽप्यनेकोत्पत्तिध्वंसकल्पनानिबन्धनं गौरवमपरिहार्यम्। तृतीयमते तु न तादृशं गौरवमिति।

प्राचीनमतानुसारेण क्षणप्रक्रियां निरूपयितुमारभतेऽथेत्यादिना। नोदनाच्छब्दाजनकसंयोगादित्यर्थः। अभिघातात्तज्जनकसंयोगादिति।

पाको न सम्भवतीति वाच्यम्। अवयविनस्सच्छिद्रतया सत्येवावयविनि वह्नेरन्तःप्रवेशसम्भवात्। एवञ्च पाकेन परमाण्वाद्यन्त्यावयविपर्यन्तं एकदैव श्यामादिनाशः, अनन्तरं परमाणावेव पाकजरूपोत्पादः। द्व्यणुकादौ तु कारणगुण-क्रमेण रूपान्तरोत्पाद इति। नवीनास्तु युगपदेव परमाण्वाद्य-न्त्यावयविपर्यन्तं रूपनाशवद्रूपान्तरोत्पादः, न तु कारणगुण-क्रमेणेति वदन्ति। अथ द्व्यणुकनाशमवधीकृत्य कियद्भिः क्षणैर्द्व्यणुकान्तरं रूपादिमद्भवतीति शिष्यबुद्धिवैशद्याय प्रक्रिया प्रदर्श्यते। वह्निना नोदनादभिघाताद्वा परमाणुषु प्रथमं कर्म,

---

द्व्यणुकनाशात् प्रभृति नवभिः क्षणैरुत्पन्ने द्व्यणुके रूपान्तरोत्पत्तिः प्रदर्शिता। अपरे तु दशभिः क्षणैरन्ये एकादशभिः क्षणैश्चेति वदन्ति। तत्सर्वं विश्वनाथपञ्चाननप्रणीतमुक्तावल्यादिभ्योऽवगन्तव्यम्।

एवं पाकजमपाकजञ्च रूपादिचतुष्टयं प्रदर्श्य तस्यान्यथाविभागं प्रदर्शयति — **पुनरिति**। उद्भूतरूपमनुद्भूतरूपमिति द्विविधमिति भावः। तयोराधारौ ब्रूते — **तत्रेत्यादिना**। परमाणुद्व्यणुकादिषु विद्यमाना उद्भूताः घ्राणादिषु इन्द्रियेषु वायुनानीतकुसुमपरागेषु शीतलतरनदीप्रवाहकणिकासु चानुद्भूताः। तत्र गन्धस्पर्शयोः गृह्य-माणत्वाद्रूपरसयोरेवानुद्भूतत्वं वक्तव्यम्। नव्यास्तु अनुद्भूतरूपादौ प्रमाणानुपलम्भान्नेदमङ्गीकुर्वन्ति। तन्मते घ्राणादीनां नीरूपत्वमेवेति संक्षेप इति। वस्तुनस्तु अनुद्भूतरूपाद्यनङ्गीकारे गन्धवत्त्वरूपपृथिवी-लक्षणस्य शीतस्पर्शवत्त्वरूपजललक्षणस्योष्णस्पर्शवत्त्वरूपतेजोलक्षणस्य रूपरहितत्वविशिष्टस्पर्शवत्त्वरूपतत्तदिन्द्रियेषु अव्याप्तिः स्यात्। अत उद्भूतानुद्भूतभेदेन तद्विभागस्वीकार एव न्याय्यः। उद्भूतत्वं न जातिः रूपत्वादिना साङ्कर्यात्। यद्येवं रूपत्वादिव्याप्यतया नानोद्भूतत्वं परिकल्प्यतामिति चेत्तदपि न शक्यते। बहिरिन्द्रिय-जन्यप्रत्यक्षे उद्भूतरूपादीनां कारणत्वेन तत्र कारणतावच्छेदकानु-

ततो आरम्भकसंयोगनाशः, ततो द्व्यणुकनाशः परामाणोरुत्तर-देशसंयोगश्चेत्येकक्षणः। ततः श्यामनाशपरमाणुक्रियानाशौ। अनन्तरं परमाणौ रक्तरूपमदृष्टवदात्मसंयोगाद्द्रव्यारम्भानुकूला क्रिया च। ततः क्रियया विभागः, विभागात्पूर्वदेशसंयोगनाशः, ततः परमाणुद्वयसंयोगः ततो द्व्यणुकोत्पादः, ततो रक्तोत्पाद इति। नवक्षणादिप्रक्रियास्तु विस्तरभयान्न प्रदर्श्यन्ते। पुनरमी रूपादयश्चत्वार उद्भूतानुद्भूतभेदेन द्विविधाः। तत्रोद्भूताः परमाणुद्व्यणुकादिषु। अनुद्भूताः पुनर्घ्राणादिष्विन्द्रियेषु, पवनानीतकुसुमसलिलावयवेषु, तप्तवारिस्थदहनादिषु चेति

गमापत्तेः। अतोऽनुद्भूतत्वाभावकूटमेवोद्भूतत्वम्। अनुद्भूतत्वन्तु रूपत्वादिव्याप्यतया नाना।

संख्यां निरूपयति — **संख्यात्वेति**। संख्यात्वजातिः एकद्वया-दिषु अनुगताकारप्रतीतिगम्या। गणनाव्यवहारा एकद्वयादिषु अनुगताकारप्रतीतिगम्या। गणनाव्यवहारा एकः द्वौ त्रय इत्यादि-व्यवहाराः। तस्यासाधारणकारणं संख्येति भावः। तथा चैकः द्वावित्यादिव्यवहारासाधारणकारणत्वे ,सति गुणत्वं संख्याया लक्षण-मिति भावः। अत्र संख्याश्रयव्यक्तीनामपि तादृशव्यवहारासाधारण-कारणत्वात्तत्रातिव्याप्तिः स्यात्। तन्निवारणाय विशेष्यदलोपादानम् अदृष्टादीनां सर्वं प्रति कारणत्वात् तत्रातिव्याप्तिवारणायासाधारणेति। असाधारणकारणत्वं नाम कार्यत्वेतरधर्मावच्छिन्नकार्यतानिरूपिता। यतः कार्यं प्रत्यदृष्टं कारणमित्येव कार्यकारणभावः। न तु पटादिकं प्रति प्रत्येकतः। एवञ्च कार्यत्वावच्छिन्नकार्यतानिरूपितकारणताऽ साधारणकारणता इत्यपि फलितम्। प्रकृते चैकः द्वावित्यादिव्यवहार-निरूपितासाधारणकारणत्वं गुणत्वञ्च संख्याया इति लक्षणसङ्गतिः।

तद्विभागमाह — **एकत्वादीति**। **तत्रेति**। एकत्वादिपरार्द्धपर्यन्तासु संख्यासु निर्धारणे सप्तमी। एकत्वं नित्यगतं नित्यमित्यन्वयः।

प्राञ्चः नवीनास्तु अनुद्भूतरूपादौ मानाभावः न चैवं घ्राणादेर्नीरूपादित्वापत्तिरिति वाच्यम्, इष्टापत्तेरिति प्राहुरिति संक्षेपः ।

संख्यात्वजातिमान् गणनाव्यवहारासाधारणनिमित्तं वा गुणस्संख्या । सा चैकत्वादिपरार्धपर्यन्ता । तत्र नित्यगतमेकत्वं नित्यम् । अनित्यगतमेकत्वमनित्यं यावद्द्रव्यभाव्याश्रयनाश-नाश्यञ्च । अवयवगतमेकत्वमवयविगतैकत्वेऽसमवायिकारण-मिति प्राञ्चः । नवीनास्तु एकत्वस्यासमवायिकारणमेव नास्ति ।

नित्येषु परमाण्वाकाशादिषु विद्यमानमेकत्वं नित्यमिति भावः । अनित्यगतमिति । द्व्यणुकादिगतमिति भावः । एकत्वस्य स्वभावमाह — **यावद्द्रव्येति** । यावत्तिष्ठति द्रव्यं तावदेकत्वमपि तदाश्रितं तिष्ठति । आश्रयनाशे चैकत्वमपि नश्यति । तदेतदाह — **आश्रय-नाशनाश्यञ्चेति** । भावकार्यजातस्यासमवायिकारणजन्यत्वादसम-वायिकारणं निर्दिशति — **अवयवीत्यादिना** । तथा च पटगतैकत्वं प्रति तदवयवगतैकत्वस्य स्वसमवायिसमवेतत्वसम्बन्धेन कारणत्वं वक्तुं शक्यमिति अवयविगतैकत्वस्यावयवगतैकत्वमसमवायिकारणमिति भावः । प्राञ्च इत्यनेन सूचितमस्वारस्यं हृदि निधाय नवीनमतमाह — **नवीनास्त्वित्ति** । तद्विलम्बेनासमवायिकारणत्वेनाभिमतं यदवयव-गतमेकत्व तद्विलम्बेनेत्यर्थः । यद्यपि कार्यगतपूर्ववर्तित्वमवयवगतै-कत्वस्यास्त्येव तत्र च कारणतावच्छेदकसम्बन्धः स्वसमवायिसमवेत-त्वम् । एवञ्च कारणैकार्थप्रत्यासत्त्या कारणत्वमक्षतमिति असमवायि-कारणत्वं सुवचम् । तथापि एतादृशासमवायिकारणत्वमवयवगत-परिमाणादीनामपि भवतीति तत्रापि प्रसक्तं स्यात् । अतोऽवयवगतै-कत्वस्यासमवायिकारणत्वं वक्तुमसाम्प्रतम् । तदेतदाह — **नियतेत्या दिना** । इदं तत्राकूतम् — कार्यैकार्थप्रत्यासत्त्या कारणैकार्थप्रत्यासत्त्या चासमवयिकारणत्वं सामान्यतो निरूपणीयम् । तथा च समवाय-सम्बन्धावच्छिन्नकार्यतानिरूपितसमवाय–स्वसमवायिसमवेतत्वान्यतर-सम्बन्धावच्छिन्नकारणताऽसमवायिकारणतेति वक्तव्यम् । एवं सति

तद्विलम्बेन तद्विलम्बाभावात् । नियतपूर्ववृत्तित्वमात्रेण वयव-गतैकत्वस्य हेतुत्वे तद्गतपरिमाणादेरपि जनकत्वापत्तेः । न च समवेतकार्यमात्रेऽसमवायिकारणापेक्षानियमादवयवगतैकत्व-मसमवायिकारणमिति वाच्यम् । तस्य हि कारणैकार्थप्रत्या-सत्या जनकत्वादसमवायिकारणत्वं वाच्यम् । सा च प्रत्यासत्तिः परिमाणादेरप्यविशिष्टेति पूर्वदोषानिवारणात् । अनुगतानतिप्रसक्तस्यासमवायिकारणत्वस्याभावेन भावकार्य-मात्रेऽसमवायिकारणवत्त्वनियमे मानाभावाच्च । प्रागुक्ता-समवायिकारणलक्षणस्य तन्तुतुरीसंयोगादेः पटासमवायि-

---

तुरीतन्तुसंयोगस्य पटम्प्रति दण्डकपालसंयोगस्य घटम्प्रति ज्ञानादीना-मिच्छादिकं प्रति चासमवायिकारणत्वापत्तिः। अतः विशिष्यैवा-समवायिकारणत्वलक्षणं वक्तव्यम् । तथा पटनिरूपितासमवायि-कारणलक्षणं समवायिसम्बन्धावच्छिन्नपटत्वावच्छिन्नकार्यतानिरूपित-समवायसम्बन्धावच्छिन्नकारणत्वे सति तुरीतन्तुसंयोगभिन्नत्वमिति । सामान्यलक्षणे तुरीतन्तुसंयोगभिन्नत्वं निवेशयितुं न शक्यते । तुरी-पटसंयोगं प्रति तस्यासमवायिकारणत्वाभ्युपगमात् । एवमेव घटाद्य-समवायिकारणलक्षणेष्वपि तत्तद्भेदो निवेशनीयः। तथा चासम-वायिकारणस्य सामान्यतो दुर्वचतयासमवायिकारणनाशात् भाव-कार्यनाश इति नियमोऽपि दुर्वच एव। एवञ्च भावकार्यमात्रस्या-समवायिकारणजन्यत्वनियमोऽपि अनुपादेयः। तथा च घटादिगतैक-त्वस्य चासमवायिकारणाजन्यत्वेऽपि न कापि हानिः इति । एकत्वमेव नित्यानित्यत्वेन द्विविधेति वक्तुं शक्यम् । द्वित्वादेस्तु सर्वा अपि संख्या अनित्याः। तदेतदाह — द्वित्वादीति। एकाधिक-निष्ठेत्यर्थः। अनित्याऽपेक्षाबुद्धिजन्या तन्नाशजन्या च। द्वित्वं प्रति अपेक्षाबुद्धेः कारणत्वं तन्नाशाच्च द्वित्वादिनाश इति भावः। अपेक्षा-बुद्धिस्वरूपमाह — द्वित्वाश्रयव्यक्तीनामिति । एकैकोद्देशेनायमेकोऽय-मेक इत्याकारिकाऽपेक्षाबुद्धिरिति भावः। अस्याः बुद्धेः निमित्त-कारणत्वमेव। प्रत्येकगतमेकत्वञ्च द्वित्वादेरसमवायिकारणम् । अयं

कारणत्वापत्या ज्ञानादेरिच्छाद्यसमवायिकारणत्वप्रसङ्गेन चायुक्तत्वादिति वदन्ति । विस्तरस्तु गुणरहस्यादौ द्रष्टव्य. । द्वित्वादिपरार्धपर्यन्ता संख्या व्यासज्यवृत्तिरनित्याऽपेक्षाबुद्धिजन्या तन्नाशनाश्या च । द्वित्वाश्रयव्यक्तीनां प्रत्येकमेकबुद्धिरयमेकोऽयमेक इत्याद्याकारापेक्षाबुद्धिः । इयं द्वित्वादौ निमित्तकारणम् । प्रत्येकमेकत्वमसमवायिकारणम् । प्रथममपेक्षाबुद्धिः, ततो द्वित्वोत्पत्तिः, अथ द्वित्वनिर्विकल्पकं, ततो द्वित्वविशिष्टप्रत्यक्षं तदैवापेक्षाबुद्धिनाशश्च, ततो द्वित्वनाश इति द्वित्वाद्युत्पत्तिः तन्नाशक्रमः। परमाणुद्वित्वादिकमीश्वरापेक्षाबुध्या योगिनाम-

---

क्रमः — प्रथमं अपेक्षाबुद्धिः तदुत्तरक्षणे द्वित्वोत्पत्तिः । तदुत्तरं द्वित्वनिर्विकल्पकं ज्ञानम् । तदनन्तरं द्वित्वप्रकारकप्रत्यक्षञ्च । तस्मिन्नेव क्षणेऽपेक्षाबुद्धिनाशः । अपेक्षाबुद्धिनाशे च द्वित्वस्यापि नाशः । तथा चापेक्षाबुद्धिः क्षणत्रयं तिष्ठति । न च द्वित्वोत्पत्युत्तरक्षणे द्वित्वविशिष्टज्ञानं जायतामिति वाच्यम् । विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुत्वात् । अत एव निर्विकल्पकमतीन्द्रियं ज्ञानमङ्गीक्रियते । यद्येवं परमाणुद्वित्वस्य कथमुपपत्तिः । परमाणोरप्रत्यक्षतया तद्विशेष्यकापेक्षाबुद्धेरजननात् इति चेत्तत्राह — **परमाणुद्वित्वादिकमिति** । ईश्वरस्य सर्वोऽपि प्रत्यक्षविषयः । अतः तदीयापेक्षाबुद्धिः परमाणुद्वित्वादिकं जनयति । यद्वा परमाण्वादीनामपि योगिप्रत्यक्षविषयत्वात् योगिनामपेक्षाबुद्धिः परमाण्वादिगतद्वित्वादिजनिका इति भावः ।

नवीनमतमाह — **दीधितिकृतस्त्विति** । नैयायिकास्तु गुणे गुणं नाङ्गीकुर्वन्ति । गुणानां द्रव्यमात्राश्रयत्वमातिष्ठन्ते । संख्या तु चतुर्विंशतिर्गुणाः पञ्चकर्माणि त्रयोऽभावः चत्वारो वेत्यादिप्रतीतिबलात् द्रव्येतरेष्वपि वर्तत इति न परोक्षम् । गुणादीनां हि निर्गुणत्वं साधर्म्यमित्युक्तञ्च । अतः संख्या नाम न गुणः । नाप्युक्तेषु सप्तसु पदार्थेष्वन्तर्भवति । अपि त्वष्टमः पदार्थ इत्याशयः ।

पेक्षाबुध्या चोत्पद्यत इति। दीधितिकृतस्तु संख्या न गुण:, चतुर्विंशतिर्गुणा: पञ्चकर्माणीति गुणादावपि तत्प्रतीतेः। न हि गुणादौ गुणस्समस्ति, गुणादीनां निर्गुणत्वं साधर्म्यमित्यभिधानात्। अतः पदार्थान्तरमेव संख्येत्याहुरिति संक्षेपः। परिमाणत्वजातियोगि मानव्यवहारासाधारणकारणं वा गुणः परिमाणम्। तच्चतुर्विधम्, अणुमहद्दीर्घह्रस्वभेदात्। सर्वञ्च तन्नित्यगतन्नित्यमनित्यगतमनित्यम्। तस्मिंश्च क्वचित् परिमाणं क्वचित् संख्या क्वचित् प्रचयोऽसमवायिकारणम्। तत्र त्र्यणुकादिपरिमाणमवयविपरिमाणेऽसमवायिकारणम्।

वस्तुतस्तु द्रव्येतरविशेष्यकसंख्याप्रकारकप्रतीतेरपेक्षाबुद्धिविषयत्वात्मक एकत्वादिप्रकारकत्वेनैवोपपत्तौ संख्यायाः गुणत्वेऽपि न कापि हानिरिति तस्याः पदार्थान्तरत्वकल्पनं न न्याय्यम्।

अथ परिमाणं लक्षयति — **परिमाणत्व इति**। मानव्यवहारासाधारणकारणत्वं परिमाणस्य लक्षणमित्यर्थः। अयं दीर्घोऽयं महानयमतिलघुरित्यादिव्यवहाराणामसाधारणकारणत्वेन परिमाणमङ्गीक्रियते। तद्विभजते **तच्चतुर्विधमिति**। सर्वञ्च तदणुत्वमहत्वदीर्घत्वह्रस्वत्वरूपचतुर्विधमपि परिमाणम्। नित्यगतन्नित्यम्। अनित्यगतं घटपटादिनिष्ठमनित्यम्।

तस्मिंश्चानित्यपरिमाण इत्यर्थः। क्वचित्परिमाणस्यैवासमवायिकारणत्वम्। क्वचित् संख्याया एवासमवायिकारणत्वं क्वचित् प्रचयस्येति भावः। तदेतद्विवृणुते — **तत्र त्र्यणुकादिपरिमाण** इत्यादिना। त्र्यणुकादिगतपरिमाणस्य त्र्यणुकाद्यारब्धचतुरणुकादिगतपरिमाणं प्रति असमवायिकारणत्वं सुवचम्। परिमाणं हि स्वसजातीयं स्वोत्कृष्टञ्च परिमाणमुत्पादयतीति सिद्धान्तः। तथा च त्र्यणुकपरिमाणं (महत्वं) स्वसजातीयं स्वोत्कृष्टञ्च परिमाणं (महत्तरत्वं) चतुरणुके जनयति। त्र्यणुकपरिमाणं प्रति द्व्यणुकपरिमाणस्य कारणत्वं वक्तुमशक्यम्।

अवयवगतश्च तत् स्वापेक्षयोत्कृष्टं स्वसमानजातीयमवयविनि परिमाणमुत्पादयति। त्र्यणुकपरिमाणे द्व्यणुकपरिमाणे च संख्याऽसमवायिकारणम् । न च तत्रापि स्वावयवपरिमाण-मेवासमवायिकारणमस्तु, किं संख्या हेतुत्वेनेति वाच्यम्। परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वस्वभाव-स्योक्ततया परमाणुपरिमाणस्य जनकत्वे द्व्यणुकादेरणुतरत्व-प्रसङ्गेनाणुतरारब्धत्र्यणुकस्याणुसमत्वापत्या त्रसरेणोरचाक्षु-षत्वप्रसङ्गात् । अतः परमाणुद्वित्वं द्व्यणुकपरिमाणे, द्व्यणुक-बहुत्वं त्र्यणुकमहत्त्वे चासमवायिकारणमिति प्राञ्चः । नवीनाः

तयोः साजात्यभावात् । त्रसरेणुपरिमाणं ह्यपकृष्टमहत्त्वम् । द्व्यणुक-परिमाणन्तु अणुत्वम् । यदि द्व्यणुकपरिमाणं त्र्यणुकपरिमाणं प्रति कारणमभविष्यत्तदा त्र्यणुके महत्त्वं नोदभविष्यत् । तच्चाप्रत्यक्षताम-यास्यत् । बहिरिन्द्रियजन्यप्रत्यक्षे महत्त्वस्य कारणत्वं सर्वानुमतम्। न चैवं त्र्यणुकपरिमाणस्यासमवायिकारणजन्यत्वं न स्यादिति वाच्यम्। द्व्यणुकगतसंख्याया एव तत्त्वाङ्गीकारात् । एवं द्व्यणुकपरिमाणं प्रति परमाणुगतसंख्याया एवासमवायिकारणत्वं वक्तव्यम् । अन्यथा (परमाणुपरिमाणस्य द्व्यणुकपरिमाणासमवायिकारणत्वे) द्व्यणुकस्य परमाण्वपेक्षयाऽणुतरत्वापत्तिः । अणोरणुतरमुत्कृष्टमिति सिद्धान्तात् । अवयवगतमिति । स्वापेक्षयाऽवयवगतपरिमाणापेक्षया ।

नवीनमतमाह — नवीनास्त्विति । अयम्भावः — संख्यायाः परिमाणासमवायिकारणत्वं मास्तु। द्व्यणुकगताणुपरिमाणं प्रति परमाणुपरिमाणस्यैवासमवायिकारणत्वम् । एवं त्र्यणुकगतापकृष्टमहत्त्वं प्रति द्व्यणुकगतापकृष्टाणुपरिमाणस्यैव कारणत्वम्। न चैवं परि-माणस्य स्वसजातीयस्वोत्कृष्टपरिमाणजनकत्वमिति सिद्धान्तव्याकोप इति वाच्यम् । तत्र मानाभावात् । न चाणुपरिमाणभिन्नानां कारणत्वं साधर्म्यमिति पूर्वोक्तं विरुद्ध्येत इति वाच्यम् । तत्राणुपरिमाणशब्देन मनोगताणुत्वस्यैव ग्रहणमित्यभ्युपगमात् । तदेतत्सर्वं वदन्तीत्यन्तेन

पुनरुन्नयन्ति—द्व्यणुकनिष्ठात्यन्तापकृष्टाणुपरिमाणं प्रति परमाणुनिष्ठोत्कृष्टाणुपरिमाणस्य जनकत्वं, त्र्यणुकनिष्ठापकृष्टमहत्त्वं प्रति द्व्यणुकपरिमाणस्यैव जनकत्वं न तु संख्यायाः, मानाभावात्। न च परमाण्वादिपरिमाणस्यापि जनकत्वे द्व्यणुकादेरणुतरत्वापत्तिरित्यादिप्रागुक्तदोष इति वाच्यम्। परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वस्वभावनियमे मानाभावेनोक्तदोषानवकाशात्। न चाणुपरिमाणस्यापि कारणत्वेऽणुपरिमाणभिन्नानां कारणत्वमिति सिद्धान्तविरोध इति वाच्यम्। तत्राणुपरिमाणशब्देन मनोगताणुपरिमाणस्यैव ग्रहणादिति वदन्ति। प्रचयापरनाम्ना प्रशि—

ग्रन्थेन प्रतिपाद्यते। एवञ्च संख्यायाः परिमाणजनकत्वं न वक्तव्यमिति नवीनानामभिप्रायः। शिथिलावयवसंयोगः प्रचयः। तेनापि परिमाणमुत्पद्यते। यथा तण्डुलसमूहे। **अनित्यमिति**। अनित्यगतं परिमाणं यावत्तदाश्रयद्रव्यं तिष्ठति तावत्तिष्ठति। द्रव्यनाशे च परिमाणस्यापि नाश इति भावः।

अथ पृथक्त्वं निरूपयति — **अयमित्यादिना**। पृथक्व्यवहारासाधारणकारणत्वं तल्लक्षणम्। अयमस्मात् पृथगिति व्यवहारे यदसाधारणं कारणं तदेव पृथक्त्वमित्युच्यते। तच्च नित्यानित्यभेदात् द्विविधम्। नित्येषु परमाण्वादिषु प्रतीयमानं पृथक्त्वं नित्यम्। अनित्येषु घटपटादिषूपलभ्यमानं पृथक्त्वमनित्यम्। इमौ घटौ तस्मात् घटात् पृथक् इमे घटाः तस्माद् घटात् पृथगित्यादि प्रतीतिषु प्रतीयमानं द्विपृथक्त्वादिकन्तु अपेक्षाबुद्धिजन्यम्। तस्य च द्वित्वादीनामिवापेक्षाबुद्धिनाशाद्विनाशोऽप्यङ्गीकरणीयः। अयं नैयायिकवैशेषिकाणां प्राचीनानामाशयः।

दीधितिकारादयस्तु न हि गुणस्य गुणवृत्तित्वमङ्गीक्रियते केनापि दार्शनिकेन। एवं स्थिते घटगतनीलरूपं पटनीलात् पृथगिति प्रयोगे

थिलात्रयवसंयोगेन तूलपिण्डादौ परिमाणमुत्पद्यते। अनित्यश्च परिमाणं यावद्द्रव्यभाव्याश्रयनाशनाश्यश्चेति ।

अयमस्मात् पृथगिति व्यवहारासाधारणकारणं पृथक्त्वजातिमान् वा गुणः पृथक्त्वम् । तत्रायमस्मात् पृथगित्येकस्मिन् प्रतीयमानमेकपृथक्त्वम् । तच्च नित्येषु नित्यमनित्येष्वनित्यमेकत्ववत् । इमावस्मात् पृथगिमेऽस्मात् पृथगिति प्रतीयमानं द्विपृथक्त्वत्रिपृथक्त्वादिकम् । तच्च द्वित्वादिवदपेक्षाबुद्धिजन्यं तन्नाशनाश्यश्चेति न्यायवैशेषिकसम्प्रदायः । दीधितिकारादयस्तु पृथक्त्वन्न गुणः, अयमस्मात् पृथगित्यादिप्रतीतेरन्योन्याभावेनैवोपपत्तेरित्याहुः ।

संयोगत्वजातिमान् युतसिद्धयोस्सम्बन्धो वा संयोगः। स द्विविधः कर्मजस्संयोगजश्चेति । कर्मजोऽपि द्विविध उभयकर्म-

---

कस्य वा वाच्यत्वमभ्युपेयम् । रूपं हि गुणः । पृथक्पदप्रतिपाद्यं पृथक्त्वमपि गुणः । तयोः कथमाधाराधेयभावः । अथः तत्र पृथक्त्वं न प्रतीयतेऽपि तु अन्योन्याभाव एव प्रतियत इति वक्तव्यम्। तथा चायं घटः तस्माद्घटात् पृथगिति व्यवहारस्यापि अन्योन्याभावेनैवोपपत्तौ पृथक्त्वरूपस्य गुणस्याङ्गीकारो निरर्थकः ।

अथ संयोगं निरूपयति — संयोगत्वजातिमानिति । विभजते— स द्विविध इति । तत्र प्रथमं विभजते — कर्मजोऽपीति । यौ संयुक्तौ तयोरुभयोरपि कर्मणा जायमानः प्रथमः । अन्यतरकर्मणा जायमानः द्वितीयः । उदाहर्तुमारभते — तत्रेति । आद्यप्रथम इति । कर्मजसंयोगजत्वेन प्रथमं द्वैविध्यमभिहितम् । तत्राद्यः कर्मजः । तस्यापि द्वैविध्यमुक्तम् । तयोः प्रथम उभयकर्मजः । सक्रिययोर्मल्लयोर्मेषयोर्वा संयोग इति । अत्र संयोग उभयोरपि कर्मणोः हेतुत्वं स्पष्टम् । आद्यद्वितीयास्त्विति । कर्मजसंयोगेऽन्यतरकर्मजन्येत्यर्थः । दृष्टान्तः घटाकाशसंयोगः । आकाशमपि निष्क्रियम् । अतः घटाकाशसंयोगः घटक्रियाजन्य इत्यन्यतरक्रियाजन्यत्वम् । अन्तिममुदाहरति— संयोगज-

जोऽन्यतरकर्मजश्चेति। तत्राद्यप्रथमो यथा सक्रिययोर्मल्लयोर्मेष-योर्वा संयोगः। आद्यद्वितीयस्तु घटाकाशसंयोगादिः। संयोगज-संयोगो हि कारणाकारणसंयोगात् कार्याकार्यसंयोगः। यथा हस्तपुस्तकसंयोगात् कायपुस्तकसंयोगः। ननु का पुनर्युत-सिद्धिरिति चेदत्र भाष्यकारः–पृथग्गतिमत्त्वं युताश्रयाश्रितत्वञ्च युतसिद्धिरिति। परस्परसंयोगजनककर्मवत्त्वमाद्यस्यार्थः। द्वितीयस्य तु युते संयुक्ते आश्रये अश्रितत्वमेकतरद्रव्यस्येत्यर्थः। यदेकतरसमवेतावृत्तिसंयोगजनको यस्संयोगस्तदेकतरप्रति-योगिकः, तद्वत्समवेतत्वमन्यतरस्येति फलितोऽर्थः। ईदृशी युतसिद्धिर्घटपटयोरस्ति। एकतरो घटः तत्समवेते न वर्तते यो घटपटसंयोगः तज्जनको यो घटतन्तुसंयोगः तद्वति तन्तौ समवेतत्वं पटस्येति भवति घटपटयोर्युतसिद्धिः। तन्तुपटयोश्च

संयोग इत्यादिना। कारणाकारणसंयोगात् कार्याकार्यसंयोगो यो भवति स एव संयोगजसंयोग इत्युच्यत इत्यर्थः। हस्तपुस्तकसंयोगाज्जाय-मानः कायपुस्तकसंयोगः संयोगजसंयोग इत्यभिधीयते। शरीरस्य समवायिकारण हस्तः। अकारणञ्च पुस्तकम्। अनयोः संयोगेन शरीर-पुस्तकसंयोगो जायते। शरीरञ्च कार्यम्। अकार्यञ्च पुस्तकम्। शरीर-पुस्तकयोगः कार्याकार्यसंयोगः शरीरकारणीभूतहस्ततदकारणपुस्तक-संयोगेन जायमान इति लक्षणसमन्वयः।

युतसिद्धयोः सम्बन्ध इति पूर्वमुक्तम्। तद्विवृणुते ननु का इत्यादिना। युतसिद्धिमान् युतसिद्धः। तत्र युतसिद्धिर्नाम का इति प्रश्नः। पृथग्गतिमत्त्वं युताश्रयाश्रितत्वं च युतसिद्धिरिति भाष्यमतम्। पृथग्गतिमत्त्वं नाम परस्परसंयोगजनकधर्मवत्त्वमेव। तच्च मेषयो-रुपलभ्यते। युते संयुते आश्रितत्वं युताश्रयाश्रितत्वं तदेव युतसिद्धिः। तद्विवृणोति — यदेकतरेत्यादि। ययोरेकतरस्मिन् समवेतेऽवृत्तिर्यः संयोगः तज्जनको यः संयोगः तद्वत्समवेतत्वमन्यतरस्य चेत्तयोः युतसिद्धिरिति भावः। तदेतदुपपादयति — एकतर इत्यादिना।

नेदृशी युतसिद्धिः। ययोरेकतरस्तन्तुस्तत्समवेते पटादौ न वर्तते यः संयोगस्तन्तुघटसंयोगस्तज्जनको यस्तन्तुप्रतियोगिक-कपालसंयोगस्तद्वति कपाले समवेतत्वाभावात् पटस्य। अत्रैकतरसमवेतावृत्तीत्यस्यानुपादाने कपालद्वयसंयोगजनको यः कपालान्तरावयवप्रतियोगि[1]कसंयोगः तद्वति कपाले समवेतत्वं घटस्येति कपालावयवघटयोर्युतसिध्यापत्तिः। अत-स्तदुपात्तम्। कपालावयवकपालसंयोगस्य कपालावयवसमवेत-वृत्तिकपालद्वयसंयोगजनकत्वेन कपालावयवसमवेतावृत्तिसंयोग-जनकत्वाभावाद् घटसमवेतावृत्तिकपालद्वयसंयोगजनककपाला-वयवप्रतियोगिकसंयोगवति कपाले समवेतत्वेऽपि घटस्य न कपालेन युतसिद्धिप्रसङ्गः। प्रथमैकतरशब्देन यस्य ग्रहणं द्वितीयैकतरशब्देन तस्यैव ग्रहणात्। तदेकतरप्रतियोगि[2]कत्व-स्यानुपादाने कपालसमवेता वृत्तिः कपालपटसंयोगः तत्जन-कस्तन्तुकपालसंयोगः तदधिकरणं कपालमपि तत्समवेतत्वस्य

घटपटयोरेकतरो घटः। तत्र समवेतं रूपादि। तत्रावृत्तिः यत्संयोगोः घटपटसंयोगः तज्जनको यः संयोगः घटतन्तुसंयोगः। तद्वान् तन्तुः। तत्र समवेतो घट इति घटपटयोर्युतसिद्धिर्भवतीत्यर्थः। अवयवावयविनोः नेदृशी युतसिद्धिरित्युपपादयति तन्तुपटयोश्चेति। तन्तुपटयोरेकत-रस्तन्तुः। तत्र समवेतः पट। तत्रावृत्तिर्यः संयोगः तन्तुघटसंयोगः। तज्जनको यः तदेकतरप्रतियोगिकः तन्तुकपालसंयोगः। तद्वति कपाले पटस्य न समवेतत्वम्। अतः तन्तुपटयोर्न युतसिद्धिः। अत्र यदेकतरा-समवेतावृत्तीत्यस्यानुपादाने संयोगजनको यः संयोगः तदेकतरप्रति-योगिकतद्वत्सवेतत्वमन्यतरस्येति स्यात्। घटपटसंयोगजनकघटतन्तु-संयोगप्रतियोगिनोरेकतरः घटः। तत्प्रतियोगिकसंयोगवान् तन्तुः। तत्समवेतत्वं पटस्येति घटपटयोर्युतसिद्धिः सुनिरूपा। अथापि घटक-

---

१ 'गिककपालसं' २ 'केत्य'स्य

घटे सत्त्वाद्घटकपालयोर्युतसिध्यापत्तिः। अतस्तदुपादानम्। निरुक्तसंयोगजनककपालप्रतियोगिकसंयोगाश्रयश्च न कपालः। स्वप्रतियोगिकसंयोगस्य स्वस्मिन्नभावात्, किन्तु तन्तुरेव। तत्समवेतत्त्वं न घटस्येति नोक्तो दोषः। न चावयवावयविनोर्युतसिध्यसम्भवेऽपि परस्परसंयोगजनकगतिमत्त्वमित्याद्या युतसिद्धिः कुतो न भवतीति वाच्यम्। कर्मणां ह्यभिमुखदेशसंयोगजनकत्वं स्वभावः। अभिमुखश्च कस्यचित् कर्मणः कश्चिद्देश इत्यवयविरूपश्च देशो नावयवकर्मणोऽभिमुख इत्यवयवक्रियाया न संयोगजनकत्वम्। अत[1] एवावयवावयविनोर्निरुक्तायुतसिद्धेरभावान्न संयोगस्सम्बन्ध इति। नवीनास्तु शिरसि शरीरसंयुक्तः पाणिरित्यनुभवबलादवयवकर्मणावयविनि संयोगजनने बाधकविरहादवयवावयविनोरपि संयोगमूरीकुर्वन्तीति संक्षेपः।

पालावयवयोर्युतसिध्यापत्तिः स्यात्। तथा हि कपालद्वयसंयोगजनकः कपालावयवसंयोगस्तदेकतरप्रतियोगिकसंयोगवत्कपाले समवेतो घटः। अतः घटकपालावयवयोतर्युसिध्यापत्तिः। अतः तदुपादानम्। कपालावयवकपालसंयोगस्य कपालावयवसमवेतावृत्तिसंयोगजनकत्वं नास्ति।

विभागं लक्षयति — **विभागत्वजातिमानिति**। विभागत्वजातिमत्त्वं इमौ विभक्ताविति प्रतीत्यसाधारणत्वं वा विभागस्य लक्षणमिति भावः। विभजते — **सोऽपीति**। तत्राद्यः कर्मजः। संयोगो द्विविध इति। एकतरकर्मज उभयतरकर्मजश्चेत्यर्थः। तत्र श्येनपर्वतविभागः श्येनगतक्रियाजन्य इति स एकतरकर्मजः। मेषयोर्विभाग उभयोः क्रियया जायत इत्युभयकर्मजः। विभागजोऽपि द्विविधः। कारणमात्रविभागजः कारणाकारणविभागजश्चेति। तत्र प्रथममुदाहरति — **यत्र कपालेत्यादिना**। कपाले घटध्वंसानुकूलकर्मणा घटारम्भकसंयोगविनाशकः कपालद्वयविभागो जायते। तस्माद्विभागात् कपालाकाश-

---

1 अत एवेति नास्ति पाठः

विभागत्वजातिमान् विभक्त इति प्रत्ययासाधारणकारणं वा विभागः। सोऽपि संयोगवद्द्विविधः कर्मजो विभागजश्चेति। तत्राद्यस्संयोगवदेव द्विविधः। श्येनपर्वतविभागोऽन्यतरकर्मजः। मेषयोर्मल्लयोर्वा विभाग उभयकर्मजः। विभागजोऽपि द्विविधः कारणमात्रविभागजः कारणाकारणविभागजश्चेति। तत्र कारणमात्रविभागजो यथा – यत्र कपाले घटनाशानुकूला क्रिया तया क्रियया घटारम्भकसंयोगविरोधी कपालद्वयविभागः ततो गगनकपालसंयोगनाशः ततः कपालस्योत्तरदेशसंयोगः ततः कपालकर्मणो नाश इति। ननु तया कपालक्रिययैव कुतो न कपालद्वयविभागवत् कपालाकाशविभागोऽपि जन्यत इति चेच्छृणु। आरम्भकसंयोगप्रतिद्वन्द्विविभागजनककर्मणोऽनारम्भकसंयोगप्रतिद्वन्द्विविभागाजनकत्वनियमात्। अन्यथा विकसत्कमलमुकुलभङ्गापत्तेः। कमलदलकर्मणानारम्भकसंयोगप्रतिद्वन्द्विविभागजनकेन कमलारम्भकसंयोगप्रतिद्वन्द्विविभागस्यापि जननसम्भवात्। विस्तरेण चैतत् कर्मनिरूपणावसरे निरूपयिष्यते। कारणाकारणविभागजस्तु हस्तपुस्तकविभागात्कायपुस्तकविभागः। नवीनास्तु विभक्त इति प्रययस्य संयोगध्वंसविषयत्वेनैवोपपत्तेर्विभागो गुण एव नास्तीत्याहुः। परापरव्यवहारासाधारणकारणे परत्वापरत्वेऽनित्यद्रव्यगते। तयोश्च बहुतरतपनपरिस्पन्दान्तरितजन्मत्वनिमित्ते। परत्वा–

विभागः। सः कारणमात्रविभागजः। अत्र कारणमात्रविभागात्कपालाकाशविभागो जायत इत्युक्तं समुचितम्। अत्राशङ्कते — नन्विति। यथा कपालद्वयविभागः कपाले क्रिययोत्पद्यते तथा कपालाकाशविभागोऽपि तयैव क्रियया जायतामिति पूर्वपक्षाशयः। वस्तुनस्तु क्रिया, क्रियातो विभागः विभागात् पूर्वसंयोगनाशः तत उत्तरे संयागः तत्काले क्रियानाशश्च। कपालाकाशविभागकाले क्रिया न तिष्ठतीति वक्तुं शक्यम्।

परत्वाश्रयपिण्डस्य कालस्य च संयोगोऽसमवायिकारणम्। तद्व्युत्पत्तिप्रकारश्चेत्थम्—इन्द्रियसन्निकृष्टे स्थविरपिण्डे प्रथममयमस्माद्बहुतरतपनपरिस्पन्दान्तरितजन्मेति बुद्धिः, ततस्तस्मिन् परत्वोत्पत्तिः, ततः परत्वनिर्विकल्पकं, ततः परत्वविशिष्टप्रत्यक्षं, ततोऽपेक्षाबुद्धिनाशः। ततः परत्वनाशः। एवं यस्मिन् यदपेक्षयाल्पतरतपनपरिस्पन्दान्तरितजन्मत्वबुद्धिस्तस्मिन्नपरत्वमुत्पद्यते। ततः परत्ववदेव तन्नाशादिकं बोध्यम्। दैशिकपरत्वापरत्वयोस्तु बहुतरसंयोगान्तरितत्वाल्पतरसंयोगान्तरितत्वबुद्धी निमित्ते। दिक्पिण्डसंयोगोऽसमवायिकारणम्। तथा हीन्द्रियसन्निकृष्टे दूरस्थपिण्डेऽयमस्माद्बहुतरसंयोगान्तरित इति बुध्या परत्वमुत्पद्यते। निकटस्थपिण्डेऽल्पतरसंयोगान्तरितत्वबुध्यापरत्वमुत्पद्यते। ततः कालिकवदनयोर्नाश इति। इमे च कालिकपरत्वापरत्वविपरीते, स्थविरेऽपि नेदीयसि दैशिकापरत्वस्य, यूनि दवीयसि दैशिकपरत्वस्य च दर्शनात्। इमे च मूर्तमात्रसमवेत इति। नवीनास्तु परत्वापरत्वे न गुणान्तरे, ज्येष्ठत्वकनिष्ठत्वाभ्यां कालिकपरत्वापरत्वव्यवहारस्य सन्निकृष्टत्वविप्रकृष्टत्वाभ्याञ्च दैशिकपरत्वापरत्वव्यवहारस्य चोपपत्तेरित्याहुरिति दिक्।

कारणाकारणविभागजमाह—हस्तपुस्तकेति। हस्तपुस्तकविभागात्कायपुस्तकविभागो भवति। अत्र कायस्य समवायिकारणं हस्तः। तथा च हस्तपुस्तकविभागः कारणाकारणविभाग इति। नवीनाशयं विवृणोति—नवीनास्त्विवति। विभागरूपस्य गुणस्य सत्वे प्रमाणं नास्ति। विभक्त इति प्रत्ययस्तु संयोगध्वंस एव जायत इति तस्याः प्रतीतेः संयोगः ध्वंसविषयत्वेनैवोपपत्तौ विभागरूपगुणान्तराङ्गीकारः व्यर्थ इति तेषामाशयः।

इति हरिप्रिया व्याख्या समाप्ता।

अर्थप्रकाशो बुद्धिः। सा द्विविधा – अनुभूतिः स्मृतिश्चेति। तत्र संस्कारासाधारणकारणकं ज्ञानं स्मृतिः। यथा – पूर्वानुभूतेऽर्थे गङ्गादौ सा गङ्गेत्यादिज्ञानम्। अत्र हि पूर्वानुभवसंस्कारद्वारा कारणम्। स्मृत्यन्यज्ञानमनुभूतिः। सा द्विविधा प्रत्यक्षानुमितिभेदात्। न चोपमितिशाब्दबोधयोस्संग्रह इति वाच्यम्। तयोरनुमितावन्तर्भावात्। यथा चैतत्तथा मूलग्रन्थेषु सुव्यक्तम्। अस्माभिस्तु बालव्युत्पादनाय प्रवृत्तैर्दुरूहत्वान्न प्रदर्श्यते। नैयायिकास्तु – उपमितिशाब्दयोः पार्थक्यादनुभूतेश्चातुर्विध्यमित्याहुः। तत्प्रदर्शनं चिन्तामण्यादिषु द्रष्टव्यम्। वयन्तु न्यायमतमनुरुध्यैवानुभूतेश्चातुर्विध्यं प्रदर्शयामः। तत्र प्रत्यक्षं द्विविधं नित्यानित्यभेदात्। तत्र नित्यप्रत्यक्षमैश्वरम्।

स्मारं स्मारं गुरोर्वाचश्चास्माकं कुलदेवतां
सिद्धान्तचन्द्रिकाव्याख्यां कुर्वे शिष्टां हरप्रियाम्।

तत्र संस्कारासाधारणकारणकं ज्ञानं स्मृतिरिति — स्वसमानविषयकोऽनुभव एव तत्तत्स्मृतिकारणम्। तेनघटानुभवतः न पटस्मरणापत्तिः। अनुभवः संस्कारद्वारा स्मृतिं प्रति कारणम्। अनुभवजन्यत्वे सति अनुभवजन्यस्मृतिजनकत्वं संस्कारस्यास्तीति तस्य व्यापारत्वम्। तथा च संस्कारजन्यत्वे सति संस्कारेतराजन्यत्वे सति ज्ञानत्वं स्मृतेर्लक्षणं भवति। संस्कारध्वंसस्य संस्कारजन्यत्वात्तत्रातिव्याप्तिवारणाय ज्ञानपदम्। एवमपि प्रत्यभिज्ञायामतिव्याप्तिः। तदर्थं संस्कारेतराजन्यत्वपदं देयम्। प्रत्यभिज्ञाया इन्द्रियसन्निकर्षमपि कारणमिति नात्रातिव्याप्तिः। अहं स्मरामीति प्रतीत्या स्मृतित्वजातिसिद्धिः, तथापि स्मृतित्वजातावनुमानरूपप्रमाणमेव सुवचम्। अनुभवत्वेन च स्मृतित्वेन च कार्यकारणभावोऽनुपेक्षणीयः। तथा

अनित्यन्तु इन्द्रियज[1]न्यं ज्ञानम्। तच्च षड्विधं चाक्षु[2]षादि-भेदात्। तत्र चक्षुषा[3]मुद्भूतरूपं तदाश्रयद्रव्यं तद्गतसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वस्नेहद्रवत्वानि योग्यद्रव्यगता क्रिया तद्गता जातिः तद्गतस्समवायश्च विषयाः।

वैशेषिकास्तु सम्बन्धप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुतया समवायाश्रयगगनादेरप्रत्यक्षतया यावदाश्रयप्रत्यक्षाभावात् समवायो न प्रत्यक्ष इत्याहुः। चाक्षुषप्रत्यक्षे चोद्भूतानभिभूतरूपालोकसंयोगो हेतुः। नातोऽन्धकारे घटादिचाक्षुषापत्तिः। निदाघोष्मण उद्भूतरूपत्वाभावान्न तत्संयोगेऽपि चाक्षुषम्। सुवर्णस्योद्भूतरूप[4]त्वेऽपि तद्रूपस्याभिभूतत्वेन न तत्संयोगेऽपि चाक्षुषम्। उद्भूतरूपमपि तत्र हेतुः। अत एव तप्तवारिस्थदहनादेर्न चाक्षुषत्वम्। स्पार्शनप्रत्यक्ष उद्भूतरूपं तादृशस्पर्शश्च हेतुः। निदाघोष्मण उद्भूतस्पर्शवत्त्वेऽपि उद्भूतरूपाभावान्न स्पार्शनम्। एवं वायुरपि न स्पार्शन इति प्राञ्चः। नव्यास्तु स्पार्शनप्रत्यक्ष उद्भूतस्पर्श एव हेतुः, न तूद्भूतरूपमपि, गौरवान्मानाभावाच्च। किन्तु चाक्षुषप्रत्यक्ष उद्भूतरूपं स्पार्शने[5] उद्भूतस्पर्शो हेतुः। [6]त्वचो योग्य उद्भूतस्पर्शः तदाश्रयद्रव्यं

चानुभवजन्यतावच्छेदकतयापि स्मृतित्वजातिसिद्धिः। स्मृतिपद-शक्यतावच्छेदकतया स्मृतित्वजातिसिद्धिरिति कथनमयुक्तमेव। न कुत्र-

---

१ इन्द्रिय इति नास्ति २ स्पार्शनादि ३ 'क्षुर्योग्य'
४ प'व'त्त्वे ५ 'नप्रत्यक्षे' ६ न चैवमननुगतम्।
इष्टत्वादिति वदन्ति। प्रमाया उद्भूनरूपवत्वेऽपि न स्पार्शनम्, उद्भूनस्पर्शाभावादित्यधिकः पाठः

रूपव्यतिरिक्ताश्चक्षुर्योग्यगुणाः योग्यद्रव्यगता क्रिया तद्गता जातिस्तथाविधस्समवायश्च। महत्त्वसमानाधिकरणोद्भूतो गन्धस्तद्गता जातिस्समवायश्च घ्राणयोग्यः। महत्त्वसमानाधिकरणोद्भूतो रसस्तद्गता जातिस्समवायश्च रसनयोग्यः। शब्दस्तद्गता जातिस्समवायश्च श्रवणग्राह्यः। जीवात्मा तद्गतैकत्वमहत्वे सविकल्पकबुद्धिः सुखदुःखेच्छाद्वेषप्रयत्ना- स्तद्गता जातिस्तत्समवायश्च मनोग्राह्यः। टीकाकृतस्तु तदेकत्वपरिमाणे न योग्ये इति वदन्ति।

षड्विधेऽपि प्रत्यक्षे इन्द्रियं करणम्। ननु किन्नाम करण- त्वम्। उच्यते – व्यापारवत्कारणम् करणम्। यथा छिदिक्रियां प्रति परशुः। तस्य छिदिक्रियायामुद्यमननिपतने व्यापारः। तज्जन्यस्तज्जन्यजनको हि व्यापारः। भवति ह्युद्यमनादिः परशुजन्यः परशुजन्यच्छिदिक्रियाया जनकश्च। इन्द्रियत्वन्तु स्मृत्यजनकज्ञानजनकमनस्संयोगाश्रयत्वम्। अस्ति चेदश्च- क्षुरादौ। स्मृत्यजनको ज्ञानजनको यो मनस्संयोग इन्द्रियमन- स्संयोगस्तदाश्रयत्वञ्चक्षुरादेरिति। अत्र स्मृत्यजनकेत्यस्यानु- पादाने ज्ञानं प्रत्यात्ममनस्संयोगस्य कारणतया तादृशमन- स्संयोगाश्रयत्वमात्मनोऽपीति तत्रातिप्रसङ्गः स्यादतस्तस्यो-

---

चिदपि शक्यतावच्छेदकतया जातिसिद्धिसम्भवः। अनुभवजन्यत्वमेव स्मृतिपदशक्यतावच्छेदकमपि भवितुं युक्तमिति भावः।

प्रवृत्तौर्दुरूहत्वान्न प्रदर्श्यंत इति। शब्दस्योपमानस्य च पृथक्- प्रमाणत्वमित्यर्थः। अत्रायमाशयः– अनुमितौ व्याप्तिज्ञानं कारणम्। शाब्दबोधस्थले न हि सर्वत्र शब्दश्रवणानन्तरं व्याप्तिज्ञाने मानमस्ति।

पादानम्। आत्ममनस्संयोगस्य ज्ञानसामान्यकारणतया स्मृतिं प्रत्यपि जनकत्वेन नोक्तदोषः। स्मृत्यजनकमनस्संयोगाश्रयत्वमित्येतावत्युच्यमाने स्मृत्यजनककालमनस्संयोगाश्रयत्वं कालस्यापीति तत्रातिव्याप्तिः स्यात्। तत्परिहाराय ज्ञानजनकेति। कालमनस्संयोगस्य ज्ञानजनकत्वाभावान्नोक्तदोषः। स्मृत्यजनको ज्ञानजनकस्संयोगश्च गुर्घटसंयोगः, तदाश्रयो घटादिरपीति तत्रातिप्रसङ्गपरिहाराय मनः पदम्।

तस्य चेन्द्रियस्य विप्रकृष्टार्थग्राहकत्वाभावात् सन्निकर्षोऽपि सहकारी। स च लौकिकालौकिकभेदेन द्विविधः। तत्र लौकिकसन्निकर्षः षोढा, संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः समवेतसमवायः विशेषणता चेति। तत्र द्रव्यग्रहे इन्द्रियसंयोगस्सन्निकर्षः। द्रव्यसमवेतस्य गुणादेः प्रत्यक्षे संयुक्तसमवायस्सन्निकर्षः, चक्षुस्संयुक्ते घटादौ गुणादेस्समवायात्। द्रव्यसमवेतगुणादिसमवेतजातिग्रहे संयुक्तसमवेतसमवायः सन्निकर्षः[1]। श्रोत्रेण शब्दग्रहे समवायसन्निकर्षः, श्रोत्रस्य गगनात्मकत्वेन तस्मिन् शब्दस्य समवायात्। शब्दसमवेतकत्वखत्वादिजातिग्रहे समवेतसमवायस्सन्निकर्षः, श्रोत्रसमवेते ककारादौ कत्वादीनां समवायात्। विशेषणतया

पदं पदार्थस्मारकं यथा पदार्थोऽपि पदं स्मारयति। घटदर्शने घटपदस्मरणसम्भवात्। अनुमानमुद्रया शब्दस्य बोधकत्वे घटः कर्मत्वमानयनं कृतिरिति निरन्वयुतपदेभ्योऽपि शाब्दबोधापत्तिः। अतः शब्दः पृथगेव प्रमाणमिति बोध्यम्। एवमुपमानमपि प्रमाणान्तर-

---

१ चक्षुरादिसंयुक्तघटादिसमवेतरूपादौ रूपत्वादिजातीनां समवायात्। इत्यधिकं वाक्यम्।

अभावस्य ग्रहः । सा च नानाविधा । तथा हि क्वचित् संयुक्तविशेषणता, यथा चक्षुरादिसंयुक्ते भूतलादौ घटाद्यभाव-प्रत्यक्षे । क्वचित् संयुक्तसमवेतविशेषणता, यथा चक्षुरादि-संयुक्तघटादिसमवेते रूपादौ रसत्वाद्यभावग्रहे । क्वचित् संयुक्तसमवेतविशेषणता, यथा चक्षुरादिसंयुक्तघटादिसमवेते रूपादौ रसत्वाद्यभावग्रहे । क्वचिद्विशेषणता, यथा श्रोत्रे शब्दाभावग्रहे । श्रोत्रस्य गगनात्मकत्वेन तस्मिन् शब्दाभावस्य विशेषणतया वृत्तेः । क्वचित्समवेतविशेषणता, श्रोत्रसमवेते ककारादौ खत्वाद्यभावग्रहे इत्याद्यूह्यम् । भूतलादौ घटादेरुप-लम्भदशायां घटाद्यभावाग्रहात् प्रतियोग्यनुपलम्भोऽपि सहकारी । अथैवं भूतलादौ पिशाचाद्यभावोऽपि गृह्येत, भूतलादौ पिशाचादेः प्रतियोगिनोऽनुपलम्भादिति चेदुच्यते । न प्रतियोग्यनुपलब्धि-मात्रं हेतुः, किन्तु योग्यानुपलब्धिः । योग्या सहकारिसम्पन्ना अनुपलब्धिर्योग्यानुपलब्धिः । अथ कस्सहकारीति चेच्छृणु । क्वचित् प्रतियोगियोग्यत्वम् । अत एव भूतलादौ पिशाचाद्य-भावो न प्रत्यक्षः । तत्प्रतियोगिनः पिशाचादेरयोग्यत्वात् । क्वचिच्चाधिकरणयोग्यत्वम् । अत एव स्तम्भे पिशाचान्योन्या-भाव प्रत्यक्ष इति संक्षेपः । भाट्टास्तु – इन्द्रियाणां सम्बद्धार्थ-ग्राहकत्वादभावेन सममिन्द्रियस्यासन्निकर्षान्नेन्द्रियाणामभावग्रहे कारणत्वं, किन्तु योग्यानुपलब्धिः कारणम् । अत एव सा प्रमाणान्तरमित्याहुः । तन्न । अभावग्रहेऽपि सन्निकर्षस्योक्ततया

मेवेति ज्ञेयम् । तथा ह्यारण्यकपुरुषात् प्रथमं गोसदृशो गवय इति वाक्यश्रवणम् । ततः वनं गत्वा तादृशं पिण्डं पश्यति, अनन्तरमयं गवयपदवाच्य इति बोधो जायते । अनेन च ज्ञानेन गोसदृशो गवय इत्युपमितिश्च जायते । अत्र व्याप्तिज्ञानस्यानुदयात् कथमुपमान-स्यानुमानेऽन्तर्भावः ।

तत्रेन्द्रियस्य करणत्वसम्भवेनातिरिक्तप्रमाणकल्पने माना- भावादनुपलब्धेर्व्यापाराभावेन कारणत्वायोगाच्चेति ।

अलौकिकसन्निकर्षंस्तु[१] त्रिविधः – सामान्यलक्षणो ज्ञान- लक्षणो योगजलक्षणश्चेति । अत्र लक्षणशब्दः स्वरूपवाची । तथा च सामान्यं लक्षणं स्वरूपं यस्य च सामान्यसन्निकर्ष इति लभ्यते । तत्रेन्द्रियसम्बद्धविशेष्यज्ञानप्रकारीभूतं प्रत्यासत्तिः । तथा चेन्द्रियसंयुक्ते घटादावयं घट इत्यादिज्ञानम् । तत्र प्रकारो घटत्वादि । तेन सन्निकर्षेण घटत्वाश्रययावद्विशेष्यको घट इत्याकारकं प्रत्यक्षमुत्पद्यते । तत्र घटत्वाश्रययावद्व्यक्तिभिस्समं चक्षुरादेस्संयोगाद्यसम्भवेन जा[२]यमानं घटत्वादिसामान्यं तज्ज्ञानं वा प्रत्यासत्तिः कल्प्यते । ज्ञानलक्षणो यथा यत्र चन्दनखण्डादौ सौरभं संयुक्तसमवायेन गृहीतं पश्चाच्चन्दनखण्डे दृष्टे स्मृतं सौरभं चक्षुषा गृह्यते सुरभिचन्दनमिति, तत्र चक्षुषा समं सौरभ्य- ज्ञानमेव सन्निकर्षः । योगजलक्षणो यथा – योगिनामतीताना- गतगोचरप्रत्यक्षं जायते । तत्र योगजधर्म एव सन्निकर्षः । तत्र साधकस्य चिन्तासहकारेण प्रत्यक्षम् । सिद्धस्य तु चिन्तां विनैव प्रत्यक्षमिति । मीमांसकास्तु सामान्यादिप्रत्यासत्तिजन्य- ज्ञानानामनुमानादिनैवोपपत्तेरलौकिकसन्निकर्ष एव नास्ती-

---

सुरभिचन्दनमिति । सुरभिचन्दनखण्डमिति प्रत्यक्षे सौरभं संयुक्तसमवायसम्बन्धेन घ्राणप्रत्यक्षयोग्यं भवति । अत्र तु चन्दनखण्डस्य विप्रकृष्टत्वात् घ्राणसंयोगो नास्ति । सुरभीति विशेषणांशे स्मृतिरित्यपि न युक्तम् । सुरभिचन्दनमिति एकमेव प्रत्यक्षज्ञानमिति प्रतीति- बलादङ्गीकरणीयम् । एवञ्चात्र सौरभभानं ज्ञानलक्षणा प्रत्यासत्त्येति

---

१ स्त्रिविधः २ 'ज्ञा'

त्याहुरिति संक्षेपः। पुनश्चेदं जन्यप्रत्यक्षं प्रकारान्तरेण द्विविधं सविकल्पकनिर्विकल्पकभेदात्। तत्र निष्प्रकारकं प्रत्यक्षं निर्विकल्पकम्। तथा हि जागरादौ प्रथममयं घट इत्यादि-विशिष्टघटादिप्रत्यक्षमुपजायते। न च तद्विशेषणीभूतघटत्वादि-ज्ञानं विना सम्भवति, दण्डादिज्ञानं विना दण्डविशिष्टप्रत्यक्षा-दर्शनात्। अतो विशेषणीभूतघटत्वादिज्ञानमङ्गीकर्तव्यम्। तच्च निष्प्रकारकम्। तस्यापि विशिष्टज्ञानत्वे विशेषणज्ञानाधीन-त्वेनानवस्थापत्तेरिति संक्षेपः। तत् पश्चाज्ज्ञायमानमयं घट इत्यादिसप्रकारकं प्रत्यक्षं सविकल्पकम्। अत्र हि ज्ञाने घटत्वादिकं प्रकारतया भासते, घटादयो विशेष्यतया, घटत्व-समवायस्संसर्गविधया। प्रकारादयस्त्रयोऽपि विषयताविशेष-रूपाः। विषयता च स्वरूपसम्बन्धविशेष इति प्राञ्चः। नव्यास्तु विषयताप्रकारतादिः पदार्थान्तरमेवेति वदन्ति। विस्तरभीते-रुपरम्यते।

॥ इति प्रत्यक्षखण्डः ॥

वक्तव्यम्। सौरभांशे त्वलौकिकचाक्षुषं चन्दनखण्डे लौकिकचाक्षुष-मित्येव विशेषः।

सुवर्णस्येति। तद्रूपस्याभिभूतत्वेन — पार्थिवरूपपीतिमद्रव्येणाभि-भूतत्वादित्यर्थः। क्वचिद् समवेतविशेषणतेति। ककारादौ खत्वाद्य-भाव इत्याद्यूह्यमिति। तदेवं संक्षेपतः पञ्चविधसम्बन्धान्यत-मसम्बन्धविशेषणविशेष्यभावलक्षणेन इन्द्रियार्थसन्निकर्षेणाभाव इन्द्रियेण गृह्यते। सविकल्पकनिर्विकल्पकभेदादिति। तत्र निर्विकल्पकं स्वलक्षण-विषयं प्रत्यक्षम्। अनारोपितविषयत्वेऽपि तस्य भानसम्भवादिति भावः। नव्यास्तु पदार्थान्तरमिति विशेष्यतायाः विशेषणतायाश्च मुख्यामुख्यत्वेन भेद इत्यर्थः।

॥ इति प्रत्यक्षपरिच्छेदः ॥

॥ अथानुमानखण्डः ॥

अथानुमितिर्निरूप्यते । अनुमितित्वजातिमद्ज्ञानमनुमितिः । अनुमितित्वञ्च पर्वते वह्निमनुमिनोमीत्यनुभवसिद्धा जातिः । तस्याश्च ज्ञायमानं लिङ्गं करणमिति प्राञ्चः । नव्यास्तु लिङ्गज्ञानं करणमिति प्राहुः । एतदेवानुमितिकरणत्वादनुमानमिति गीयते । परामर्शश्चास्य व्यापारः । किं पुनर्लिङ्गम्, उच्यते—व्याप्त्याश्रयो लिङ्गम् । यो यद्व्याप्त्याश्रयः स तस्य लिङ्गम् । भवति हि धूमो वह्निव्याप्याश्रयः । ततो धूमो वह्नेर्लिङ्गम् । इदमेव हेतुसाधनादिशब्दैर्व्यवह्रियते । यस्य लिङ्गमित्यूच्यते, स साध्यादिशब्दैरभिधीयते । का पुनः व्याप्तिरिति चेन्नियतसाध्यसामानाधिकरण्यमिति गृहाण । यस्य येन सह नियतसामानाधिकरण्यं विद्यते स तस्य व्याप्यः । धूमस्य हि वह्निना समं नियमेन सामानाधिकरण्यमस्ति, धूमाधिकरणे सर्वत्राग्नेस्सत्वात् । अतो भवति धूमो वह्नेर्व्याप्यः । वह्निस्तु न धूमेन समं नियतसामानाधिकरण्यमस्ति, वह्न्यधिकरणे सर्वत्र धूमाभावादयो गोलकादौ यथा दर्शनात् । अतो न वह्निर्धूम–व्याप्यः । व्याप्तिविशिष्टस्य पक्षवृत्तित्वज्ञानं परामर्शः । तच्च

एवं प्रत्यक्षं निरूप्य तदुपजीवकत्वादनुमानं निरूपयति । ज्ञायमानं लिङ्गं करणमिति प्राञ्चः । तदयुक्तम् । अनागतेन विनष्टेन च लिङ्गेनानुमितिसम्भवात् येन ह्यनुमीयते तदनुमानम् । एवञ्च लिङ्गज्ञानं तत्र करणम् । व्याप्त्याश्रयो लिङ्गमिति । लीनं गमयतीति लिङ्गम् इत्यप्यस्ति निरुक्तिः । पर्वते वृक्षलतादिभिः तिरोहितमग्निं गमयति धूमः । इदमेव तृतीयं लिङ्गपरामर्शमिति प्रथमतः पर्वतो धूमवानिति

वह्निव्याप्यधूमः पर्वत इत्याकारं वह्निव्याप्यधूमवान् पर्वत इत्याकारकं वा। इदमेव तृतीयलिङ्गपरामर्शशब्देन व्यवहरन्ति। ननु कथमस्य ज्ञानस्य तृतीयत्वमुच्यते। प्रथमं तावन्महानसादौ धूमाग्न्योस्सहचारज्ञाने व्यभिचारज्ञानविरहदशायां धूमत्ववह्नित्वसामान्यलक्षणप्रत्यासत्या सकलधूमवह्न्युपस्थितौ यत्र यत्र धूमस्तत्र तत्र वह्निरिति प्रागुक्तसामानाधिकरण्यरूपव्याप्तिज्ञानमुपजायते। ततः कालान्तरे पर्वतसमीपं गतस्य पुंसः पर्वतोच्चल[१]न्तीमविच्छिन्नां धूमरेखां पश्यतः प्राङ्महानसादौ गृहीताया व्याप्तेर्धूमदर्शनोद्बुद्धसंस्कारवशात् स्मरणं धूमो वह्निव्याप्य इत्याकारं जन्यते। ततः प्रागुक्तपरामर्श उत्पद्यते। अत्र[२] धूमो वह्निव्याप्य इति ज्ञानं प्रथमं, धूमवान् पर्वत इति ज्ञानं द्वितीयं, वह्निव्याप्य धूमवान् पर्वत इति ज्ञानं तृतीयं, ततः पर्वतो वह्निमानिति ज्ञानमुत्पद्यते। तदेवानुमितिः। ननु व्याप्यस्य पक्षवृत्तित्वज्ञानं परामर्श इत्युक्तम्। तत्र कः पुनः पक्ष इति चेद्, उच्यते पक्षताश्रयः पक्षः। पक्षता च सिषाधयिषाविरहविशिष्टसिध्यभावः। साधयितुमिच्छा सिषाधयिषा, तद्विरहविशिष्टा या सिद्धिस्साध्यनिश्चयः, स यत्र नास्ति स पक्षः। यथा धूमेन वह्न्यनुमितौ पर्वतः। तत्र हि साध्यस्य

प्रत्यक्षम्। अनन्तरं यत्र यत्र धूमस्तत्र तत्र अग्निरिति व्याप्तिस्मरणम्। तृतीयक्षणे च वह्निव्याप्यधूमवानयं पर्वत इति लिङ्गपरामर्शो जायत इत्यर्थः। साध्यनिश्चयः यत्र नास्ति स पक्ष इति। सन्दिग्धसाध्यवान् पक्षः। निश्चितेऽनुमानस्यानुदयादिति।

---

१ 'वर्तिनीं धूमव्यक्तिं' २ 'तत्र'

वह्नेर्निश्चयो नास्ति। अत एव यत्राधिकरणे महानसादौ व्याप्तिग्रहस्तत्र नानुमितिः, वह्नेस्तत्र निश्चयाद्, निश्चितेऽर्थेऽनुमानानुदयात्। अत एव तादृशो महानसादिः सपक्ष इति भण्यते। न चैवं सिध्यभावमात्रं पक्षताऽस्तु, किं विशिष्टान्तेनं सिद्धिविशेषणेनेति वाच्यम्। यदा महानसादौ वह्निमनुमिनुयामितीच्छा, तदा तत्र वह्न्यनुमितेरुदयात् महानसादेः पक्षता न स्यात्। अतो विशिष्टान्तं सिद्धिविशेषणम्। तथा च तत्र सिषाधयिषाविशिष्टैव सिद्धिरस्ति, न तु सिषाधयिषाविरहविशिष्टसिद्धिरिति निरुक्तसिध्यभावसत्वात् पक्षतोपपत्तिरिति संक्षेपः।

तच्चानुमानं त्रिविधं केवलान्वयि केवलव्यतिरेक्यन्वयव्यतिरेकिभेदात्। तत्रासद्विपक्षः केवलान्वयी, यथा घटोऽभिधेयः प्रमेयत्वादित्यत्र प्रमेयत्वं हेतुः। अभिधेयत्वं साध्यम्। घटः पक्षः। अस्य हेतोर्विपक्षो नास्ति। निश्चितसाध्याभाववान् हि विपक्ष इत्युच्यते न चात्र साध्यस्याभिधेयत्वस्याभावः क्वचिदस्ति, वस्तुमात्रस्यैवाभिधेयत्वात्। अतोऽत्र हेतुसाध्यसहचारमात्रग्रहात् पटादौ सपक्षे तयोर्व्याप्तिर्गृह्यत इति प्रमेयत्वरूपो हेतुः केवलान्वयी। मीमांसकास्तु केवलान्वय्यनुमानमेव

नानुपलब्धे न निर्णेते
अर्थे न्यायः प्रवर्तते।

किन्तु सन्दिग्धे—इत्युक्तं भाष्यकृता। साध्यसिद्धिरनुमितिप्रतिबन्धिकेति भावः। सत्सपक्षो विपक्षो हेतुरन्वयव्यतिरेकीति।

नास्ति, घटोऽभिधेयः प्रमेयत्वादिति तदुदाहरणे साध्यसाधनयोः केवलान्वयित्वग्रहे घटेऽपि साध्यनिश्चयेन पक्षताविरहादिति वदन्ति। असत्सपक्षः केवलव्यतिरेकी यथा पृथिवी इतरेभ्यो भिद्यते गन्धवत्वादित्यादि। अत्रेतरभेदरूपसाध्यस्य पृथिवीमात्र-वृत्तेरन्यत्रानिश्चयाद् हेतुसाध्ययोर्व्याप्तिग्रहस्थलाभावात् सपक्षो नास्ति। अतोऽत्र साध्याभावहेत्वभावयोर्जलादौ विपक्षे सह-चारग्रहाद्गन्धवत्त्वे इतरभेदव्याप्तिर्गृह्यते। न चैवमन्ययोस्सह-चारग्रहाद्[1] घटपटयोरपि व्याप्तिग्रहप्रसङ्ग इति वाच्यम्। यदभावयोस्सहचारग्रहस्तयोर्व्याप्तिर्गृह्यत इत्यनतिप्रसङ्गात्। सत्सपक्षविपक्षो हेतुरन्वयव्यतिरेकी। यथा पर्वतो वह्निमान् धूमवत्वादित्यादि। अत्र महानसादौ सपक्षे हेतुसाध्ययोस्सह-चारग्रहाज्जलादौ विपक्षे साध्याभावहेत्वभावयोस्सहचारग्रहाच्च व्याप्तिग्रहादन्वयव्यतिरेकी धूमादिति हेतुरिति संक्षेपः।

पुनः प्रकारान्तरेण द्विविधमनुमानं स्वार्थं परार्थञ्चेति। यत्र स्वयमेव धूमाग्न्योर्व्याप्तिं गृहीत्वा पर्वतादौ धूमपरामर्शा-दग्निमनुमिनोति, तत्र स्वार्थम्। यत्र स्वयं वह्निमनुमाय परं प्रति पञ्चावयवमनुमानवाक्यमभिधत्ते, तत्र परार्थम्। पञ्चा-वयवाश्च प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि। तत्र पक्षे साध्य-वैशिष्ट्यबोधजनकन्यायावयवत्वं प्रतिज्ञात्वं, यथा 'पर्वतो वह्निमानि'ति। प्रतिज्ञान्वितस्वार्थबोधकन्यायावयवत्वं हेतुत्वं,

---

अन्वयव्याप्तिः ऋजुरीत्या साध्यं साधयति, व्यतिरेकव्याप्तिस्तु वक्रया रीत्या। तत्र विलम्बेनैव साध्यबोध इति भावः व्यतिरेकव्याप्तेरयं

---

[1] अन्यत्र व्याप्तिग्रहे धूमवह्न्योः सहचारग्रहाद्

यथा 'धूमादि'ति। अत्र ज्ञापकत्वं पञ्चम्यर्थः। तच्च प्रतिज्ञार्थे वह्नावन्वेति। व्याप्तिप्रतिपादकन्यायावयवत्वमुदाहरणत्वं, यथा 'यो यो धूमवान् स सोऽग्निमान् यथा महानस'मिति। पक्षे हेतुवैशिष्ट्यबोधकन्यायावयवत्वमुपनयत्वं, यथा 'तथा चाय'-मिति। धूमवांश्चायमिति अस्य वाक्यस्यार्थः। तथा च पक्षे हेतुवैशिष्ट्यबोधजनकत्वादिदं वाक्यमुपनय इत्युच्यते। उपनय-साकाङ्क्षवाक्यं निगमनं, यथा तस्मात्तथेति। अनेन वह्निव्याप्य धूमवत्वाद्वह्निमानित्यर्थकेनोपनय आकाङ्क्ष्यते, तस्मादिति तच्छब्देन प्रकृतपरामर्शेनोपनयार्थस्य धूमवत्त्वस्य परामर्शात्। अत्र पञ्चस्वपि लक्षणेषु न्यायावयवत्वपदमुदासीनेषु प्रतिज्ञादि-समानाकारेषु वाक्येष्वतिप्रसङ्गवारणाय। एतद्वाक्यपञ्चक-समुदायो न्याय इति भण्यते। मीमांसकास्तु प्रतिज्ञादया उदाहरणान्ता उदाहरणादयो निगमनान्ता वा त्रय एवावयवा इत्यूचुः। बौद्धास्तु उदाहरणोपनयौ द्वावेवावयवौ स्वीकुर्वन्तीति संक्षेपः।

अथ हेत्वाभासा निरूप्यन्ते। ते च पञ्च सव्यभिचार-विरुद्धासिद्धसत्प्रतिपक्षकालात्ययापदिष्टभेदात्। तत्र साधारणा-साधारणानुपसंहार्यन्यतमत्वं सव्यभिचारत्वम्। साधारणत्वञ्च साध्यात्यन्ताभाववत्ययोगोलके वर्तते। एतद्ज्ञाने सति नियतसामानाधिकरण्यरूपव्याप्तेर्ज्ञानं प्रतिबध्यते। ततो व्याप्ति-ज्ञानरूपकारणविरहान्नानुमितिः। पक्षमात्रवृत्तित्वमसाधारणत्वं, यथा 'शब्दो नित्यः शब्दत्वादित्यादि। अत्र शब्दत्वं हेतुः

क्रमः। अन्वयव्याप्तौ यद्व्याप्यं तदभावोऽत्र व्यापकः। यच्च व्यापकं तदभावोऽत्र व्याप्यः।

सपक्षाद् गगनादेर्विपक्षाद् घटादेश्च व्यावृत्तः पक्षे शब्द एव वर्तते। अत्र च दृष्टान्ताभावादन्वयव्याप्तिज्ञानप्रतिबन्धः फलम्। सर्वपक्षः केवलान्वयिसाध्यकः केवलान्वयी हेतुरनुपसंहारी। यथा सर्वमभिधेयं प्रमेयत्वादित्यादि। अत्र सर्वस्यापि पक्षतया साध्यसाधनयोर्व्याप्तिग्रहस्थलाभावाद् व्याप्तिग्रहो न भवति।

साध्याभावव्याप्यो हेतुर्विरुद्धः, यथा गौरयमश्वत्वादित्यादि। अत्र गोत्वाभावव्याप्यमश्वत्वमिति ज्ञाने सति गोत्वरूपसाध्यानुमितिः प्रतिबध्यते।

असिद्धिमानसिद्धिः। असिद्धिश्चाश्रयासिद्धिस्वरूपासिद्धिव्याप्यत्वासिद्धयन्यतमा। आश्रयासिद्धिस्तु पक्षे पक्षतावच्छेदकस्याभावः, यथा 'मणिमयः पर्वतो वह्निमान् धूमवत्वादित्यादि। अत्र पर्वते पक्षे पक्षतावच्छेदकस्य मणिमयत्वस्याभावनिश्चये वह्निव्याप्यधूमवान् मणिमयः पर्वत इति परामर्शप्रतिबन्धादनुमितिविरहः फलम्। पक्षे हेत्वभावः स्वरूपासिद्धिः, अयोगोलकं वह्निमद् धूमादि'त्यादि। अत्र पक्षेऽयोगोलके धूमाभावनिश्चये वह्निव्याप्यधूमवदयोगोलकमिति परामर्शविरहेणानुमित्यभावः फलम्। हेतुत्वेनाभिमते साध्यनिरूपितव्याप्त्यभावो व्याप्यत्वासिद्धि, यथा 'पर्वतो धूमवान् वह्नेरि'त्यादि। अत्र वह्नौ धूमनिरूपितव्याप्त्यभावनिर्णये व्याप्तिज्ञानविरहादनुमितिप्रतिबन्धः फलम्। एवं 'पर्वतो वह्निमान् नीलधूमवत्वादित्यादिप्रयोगे नीलधूमादिरपि व्याप्यत्वासिद्धः। ननु कथमयं व्याप्यत्वासिद्धः, धूममात्रस्य वह्निव्याप्यत्वेन नीलधूमस्यापि वह्निव्याप्यत्वादिति चेद्, उच्यते। धूममात्रस्य वह्निव्याप्यत्वेऽपि तत्र नीलविशेषणस्य व्यर्थतया व्यर्थविशेषणविशिष्टे व्याप्तिविरहेण नीलधूमस्यापि व्याप्यत्वासिद्धत्वादिति संक्षेपः।

सन् प्रतिपक्षो यस्य स सत्प्रतिपक्ष इत्युच्यते। प्रतिपक्षश्च साध्यव्याप्यवत्तापरामर्शकालिकसाध्याभावव्याप्यवत्त्वपरामर्शविषयो हेतुः, यथा 'पर्वतो वह्निमान् धूमवत्वादि'त्युक्ते स वह्न्यभाववान् पाषाणमयत्वादित्यादि तदुदाहरणे पाषाणमयत्वादिति हेतुः। अत्र च 'वह्निव्याप्यधूमवान् पर्वत' इति परामर्शकाले 'वह्न्यभावव्याप्यपाषाणमयत्ववान् पर्वत' इति परामर्शे सति वह्नितदभावोभयानुमितिस्संशयरूपोत्पद्यते। तथा च सत्प्रतिपक्षे संशयाकारानुमितिजनकत्वमेव दूषकताबीजमित्याहुरिति संक्षेपः।

पक्षे साध्याभावो बाधः, यथा 'गन्धप्रागभावविशिष्टो घटो गन्धवान् पृथिवीत्वादित्यादि। अत्र गन्धप्रागभावविशिष्टे घटे पक्षे साध्यस्य गन्धस्याभावनिश्चये गन्धानुमितिप्रतिबन्धो जायते। तदभाववत्ताज्ञानं हि तद्वत्ताज्ञाने प्रतिबन्धकं, भूतलादौ घटाभाववत्ताज्ञाने सति घटवत्ताज्ञानानुदयात्। न च पक्षे घटे गन्धसत्वात् कथं बाध इति वाच्यम्। पक्षतावच्छेदकविशिष्टे पक्षे हि साध्यानुमितिः। प्रकृते च गन्धप्रागभावस्य पक्षतावच्छेदकतया तद्विशिष्टे गन्धाभावात्। हेत्वाभासत्वञ्चानुमितितत्करणज्ञानान्यतरविरोधित्वं ज्ञानस्य यद्विषयकत्वेन, तद्वत्त्वम्। भवति हि साध्याभावव्याप्यविषयकत्वेन विरोधिपरामर्शस्यानुमितिविरोधित्वात् सत्प्रतिपक्षे साध्याभावव्याप्यहेत्वादिकं दोषः। तद्वत्ता च धूमादेरेकज्ञानविषयत्वसम्बन्धेन। एवं साध्याभाववत्पक्षविषयत्वेन ज्ञानस्यानुमितिविरोधित्वात् साध्याभाववत्पक्षादिकं बाधे दोषः। तद्वत्त्वञ्च हेतावस्तीति बाधसत्प्रतिपक्षयोर्लक्षणसंगतिः। 'धूमवान् वह्नेरि'त्यादौ

वह्न्यादौ धूमव्यभिचारज्ञाने सत्यनुमितिकरणव्याप्तिज्ञान-प्रतिबन्धाद्व्यभिचारादिर्दोषः। तद्वत्त्वञ्च वह्नावस्तीति तत्रापि लक्षणसमन्वयः। न च व्यभिचारिणि हेतावुपाधिज्ञानेऽपि अनुमितिकरणव्याप्तिज्ञानप्रतिबन्धादुपाधेरपि हेत्वाभासत्वा-पत्तिरिति वाच्यम्। लक्षणेऽनुमितितत्करणज्ञानान्यतर-विरोधित्वनियम इति विवक्षितत्वात्। उपाधिज्ञानस्य च व्यभिचारज्ञानद्वारा व्याप्तिज्ञानविरोधित्वेन तस्मिन् सत्यपि व्यभिचारज्ञानविरहे व्याप्तिज्ञानप्रतिबन्धाभावेन विरोधित्व-नियमाभावादिति दिक्।

अथ कोऽयमुपाधिर्नाम, उच्यते। साध्यव्यापकस्साधना-व्यापकोऽयमुपाधिः, यथा 'धूमवान् वह्ने'रित्यादावार्द्रेन्धनम्। तद्धि साध्यस्य धूमस्य व्यापकं, 'यत्र यत्र धूमस्तत्र तत्रार्द्रेन्धनमि'ति व्याप्तेः। साधनस्य वह्नेरव्यापकञ्च, 'यत्र यत्र वह्निस्त तत्रार्द्रेन्धनमि'ति व्याप्तेरभावात्। अयोगोलकादौ वह्नेः सत्वेऽप्यार्द्रेन्धनाभावात्। यथा वा सप्तसु मित्रातनयेषु श्यामेषु दृष्टेषु कश्चित् गर्भस्थेऽपि मित्रातनये श्यामत्वं मित्रातनयत्वे-नानुमिनोति 'स श्यामो मित्रातनयत्वादि'ति। अत्र शाकपाक-जत्वमुपाधिः। अत्र यद्यपि 'यत्र यत्र श्यामत्वं तत्र तत्र शाकपाकजत्वमि'ति नियमो नास्ति, घटादौ श्यामत्वसत्वेऽपि शाकपाकजत्वाभावात् तथापि मित्रातनयत्वविशिष्टश्यामत्वं यत्र,

---

स श्यामो मित्रातनयत्वादिति — तत्र शाकपाकजत्वमुपाधिरिति भेदधर्मवत्त्वमुपाधिः। मित्रातनयत्वश्यामत्वयोः स्वाभाविकसम्बन्धो नास्ति। किन्तु औपाधिक एव। शाकाद्यन्नपरिणामस्योपाधेर्विद्य-

तत्र शाकपाकजत्वमिति नियमोऽस्त्येव। अत एवायं साधनावच्छिन्नसाध्यव्यापक इति गीयते। एवं 'वायुः प्रत्यक्षः प्रमेयत्वादि'त्यत्र उद्भूतरूपवत्वमुपाधिः। अत्र यद्यपि 'यत्र यत्र प्रत्यक्षत्वं तत्र तत्रोद्भूतरूपवत्व'मिति नियमो नास्ति, आत्मादौ व्यभिचारात्, तथापि बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वं यत्र घटादौ तत्रोद्भूतरूपवत्त्वमस्त्येव। अत एवायं पक्षधर्मावच्छिन्नसाध्यव्यापक इति वदन्ति। ईदृशोपाधिज्ञाने सति हेतौ साध्यव्यभिचारज्ञानमुपजायते। ततो व्याप्तिज्ञानविरह इत्येषा दिक्।

॥ इत्यनुमानखण्डः ॥

मानत्वात्। तथा हि श्यामत्वे मित्रातनयत्वं प्रयोजकम्। शाकाद्यन्नपरिणतिभेद एव प्रयोजक इति भावः।

।। अथोपमानखण्डः ।।

अथोपमितिः। गवयपदार्थमजानानो नागरिकः पुरुषः कुतश्चिदारण्यपुरुषात् गोसदृशो गवयशब्दवाच्य इति श्रुत्वारण्यं गतो गोसदृशं पिण्डं पश्यति। अयं गोसदृश इति। ततो गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्यार्थज्ञानं जायते। अत्र गोसादृश्यविशिष्टपिण्डे गवयपदवाच्यताज्ञानं यदुत्पद्यते तदेवोपमितिः। अस्यां गोसादृश्यज्ञानं करणम्। एतदेवोपमितिकरणत्वादुपमानमिति वदन्ति। 'गोसदृशो गवयपदवाच्य' इत्यतिदेशवाक्यार्थस्मरणं व्यापार इति संक्षेपः।

।। इत्युपमानखण्डः ।।

अतिदेशवाक्यार्थस्मरणं व्यापारयति — संज्ञासंज्ञिसम्बन्धज्ञानं उपमितिः तस्य फलम्। प्रत्यक्षानुमानासाध्यप्रमासाधकत्वाद् उपमानं प्रमाणान्तरमेवेति भावः।

अथ शब्दखण्डः

अथ शाब्दबोधो निरूप्यते। पदज्ञानं तत्र करणम्। पदजन्यपदार्थोपस्थितिरवान्तरव्यापारः। गामानयेत्यादिशब्दात् गोकर्मकमानयनं कार्यमिति यद् ज्ञानं जायते तदेव फलम्। ननु किं पुनः पदम्? वृत्तिमत्पदम्। वृत्तिश्च शक्तिलक्षणाऽन्यतरः पद–पदार्थयोस्संबन्धः। अथ केयं शक्तिः? उच्यते–अस्मा–च्छब्दादयमर्थो बोद्धव्य इत्याकारिकेश्वरेच्छेति प्राञ्चः। नवीना–स्त्वतिरिक्तपदार्थ एव शक्तिरिति वदन्ति। नन्वेवं पामराणामर्थ–मविदुषामपि शब्दार्थप्रत्ययः स्यादिति चेन्न तेषां पदश्राविणा–मपि पदार्थोपस्थितिविरहेण वाक्यार्थबोधानुपपत्तेः। पदार्थो–पस्थितिविरह एव तेषां कुत इति चेत्, शक्तिग्रहवैधुर्यादिति गृहाण। अथ कथं शक्तिग्रहः पदानाम्। उच्यते–घटमानयेति प्रयोजकवृद्धस्य वाक्यश्रवणानन्तरं प्रयोज्यवृद्धस्य घटानयन–गोचरप्रवृत्तिन्तदीयचेष्टयोपलभमानः व्युत्पत्सुबालकस्तया प्रवृत्या तद्धेतुभूतं ज्ञानमनुमिनोति। अनन्तरं तस्य कार्यस्य कारणं

अथावसरप्राप्तं शब्दप्रमाणं प्रारभते अथ शाब्दबोधो इति। शब्दाज्जायमानः बोधः ज्ञानं शाब्दबोधः। एषः कार्यरूपः किंकारणक इत्याकांक्षायां शाब्दबोधे कारणमाह पदज्ञानमिति। ज्ञायमानस्य करणत्वे शानचः वर्तमानार्थत्वात् मौनिश्लोकादेः शाब्दबोधो न स्यात्। तत्र पदविषयकं ज्ञानमस्तीति न क्षतिः। द्वादशेऽह्नि पिता नाम कुर्यादिति विधिना पित्रोच्चरितेऽपि शक्तिरस्तीति आधुनि–कोच्चरिते शक्तिरङ्गीकर्तव्येत्याशयेनाह नवीनास्त्विति। शक्ति–ग्रहोपायेषु बहुषु व्यवहारस्य प्राधान्यात्प्रथमं निरूपणमुचितमित्य–

अन्विच्छन्[1] वाक्यश्रवणात् प्रागजातत्वात् तस्मिन् सति जातत्वाच्चान्वयव्यतिरेकाभ्यां पदसमुदायरूपवाक्यस्य कारणतामवधारयति। ततो घटादिपदानामावापोद्वापाभ्यां कम्बुग्रीवादिमच्छक्यविशेषे शक्तिं कल्पयति। अयमेव व्यवहाराच्छक्तिग्रह इत्युच्यते। एवं गृहीतशक्तिकतत्समानार्थकपदान्तरेण तदर्थकथनं विवरणम्। ततोऽपि शक्तिग्रहः। यथा घटोऽस्तीत्यस्य कलशोऽस्तीति विवरणेन घटपदशक्तिग्रहः। एवमन्येऽपि व्याकरणादयः शक्तिग्रहोपाया मूलग्रन्थेषु द्रष्टव्याः। एवं शक्त्यनुभवजन्यसंस्कारोद्बोधेन शक्तिस्मरणात् पदार्थोपस्थितिः। नन्वेवं देशान्तरस्थितस्य काश्यां गौरस्तीति वाक्याद्बोधो न स्यात्, तस्याः प्रागनुपस्थितत्वेन तत्र शक्तिग्रहाभावादिति चेदुच्यते। व्यवहारादिना शक्तिग्रहवेलायां गोत्वादिसामान्यलक्षणप्रत्यासत्त्योपस्थितसर्वगवीषु शक्तिग्रहेणोक्तदोषाभावात्। सा च शक्तिः पदानां जातिविशिष्टव्यक्ताविति प्राञ्चः। नव्यास्तु विशिष्टे न शक्तिः, गौरवात्, किन्तु व्यक्तिमात्रे। जातिस्तु शक्यतावच्छेदिकेत्याहुः। मीमांसकास्तु व्यक्तौ न शक्तिः।

शायेनाह घटमानयेति। आवापोद्वापाभ्यामन्वयव्यतिरेकाभ्याम्। घटमानय पटमानयेत्यादौ द्वितीयवाक्ये आनयपदस्यावापः घटपदस्योद्वाप इत्येवङ्क्रमेण। सन्त्यनेके शक्तिग्रहोपायाः। ते यथा—

शक्तिग्रहं व्याकरणोपमान-
कोशाप्तवाक्यात् व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति
सान्निध्यतः सिद्धपदस्य वृद्धाः॥

एषां स्वरूपोदाहरणे मुक्तावल्यां शब्दखण्डे निरूपित इति ततोऽवगन्तव्यम्।

---

[1] अन्वेषमाणो।

तासामानन्त्यादनन्तशक्तिकल्पनापत्तेः, किन्तु जातौ, तस्या एकत्वात् । न चैवं पदाद्व्यक्तिबोधो न स्यादिति वाच्यम् । जातिर्हि व्यक्तिं विनानुपपन्नेत्यनुपपत्तिरूपाक्षेपाद्व्यक्तिबोध-सम्भवादित्याहुरिति संक्षेपः ।

शक्तं पदं चतुर्विधं, यौगिकं रूढं योगरूढं यौगिकरूढञ्चेति । यत्र समुदायशक्तिं विनाऽवयवशक्त्या पदार्थोपस्थितिः तद्यौ-गिकम्, यथा पाचकादिपदम् । अत्र न प्रकृतिप्रत्ययसमुदायस्य क्वचिद्रूढिरस्ति । किन्तु प्रकृतिप्रत्ययशक्तिभ्यां पाककर्तु-रुपस्थितिः । यत्रावयवशक्तिनैरपेक्ष्येण समुदायशक्त्यैव पदार्थो-पस्थितिः तद्रूढं, यथा गवादिपदम् । अत्र प्रकृतिप्रत्ययनैरपेक्ष्येण समुदायशक्त्या सास्नादिमद्व्यक्तिविशेषस्य गवादिपदादु-पस्थितिः । यत्र तु समुदायावयवशक्तिभ्यामेकार्थोपस्थितिः तद्योगरूढम्, यथा पङ्कजादिपदम् । अत्र ह्यवयवशक्त्या पङ्कजनिकर्तृत्वस्योपस्थितिः, समुदायशक्त्या च पद्मत्वस्य । अत्रावयवशक्तिमात्राभ्युपगमे पङ्कज[१]पदात् पङ्कजनिकर्तृमण्डू-कादेरपि बोधप्रसङ्गः । समुदायशक्तिमात्राभ्युपगमे पङ्कजनि-कर्तृपद्ममिति पङ्कजनिकर्तृत्वप्रकारकबोधानुपपत्तिः । अतः

ननु पदस्य शक्तिः कुत्र गृह्यत इत्याशङ्कायां ग्रन्थं प्रारभते सा चेति । सा शक्तिः । जातौ व्यक्तौ च पृथक् शक्त्यङ्गीकारे गौरवात् अनुभव-विरोधाच्च जातिविशिष्टव्यक्तौ स्वीकुर्वन्ति प्राञ्चः नैयायिकाः । नव्यास्तु व्यक्तिमात्रे शक्तिग्रहणे न हानिः, शक्यतावच्छेदकरूपेण जाते-र्भानादिति वदन्ति । मीमांसकास्तु व्यक्तौ शक्तिग्रहेऽनन्तासु व्यक्तिषु शक्तिरङ्गीकार्येति गौरवं, गृहीतशक्तौ व्यक्तौ नष्टायामन्यत्र शक्ति-र्गृह्यत इति जातौ शक्तिरित्याहुः ।

---

१ 'जादिप'

शक्तिद्वयं पङ्कजादिपदेष्वभ्युपेयम्। यत्र योगेनान्यार्थस्य रूढ्या चान्यस्योपस्थितिः तद्यौगिकरूढम्, यथोद्भिदादिपदम्। तत्र[1] योगेनोर्ध्वविदारणकर्तुः खनित्रादेः रूढ्या च याग-विशेषस्योपस्थितिसंक्षेपः।

ननु पदज्ञानस्य पदार्थोपस्थितिजनकत्वं कथमिति चेत्, उच्यते – एकसम्बन्धिज्ञानमपरसम्बन्धिज्ञाने हेतुः। यथा हस्तिनि दृष्टे हस्तिपकस्मरणदर्शनात्। प्रकृते च पदतदर्थयोर्वाच्यवाचक-भावरूपसम्बन्धवत्त्वेन एकसम्बन्धिनः पदस्य ज्ञाने सत्यपर-सम्बन्धिनः पदार्थस्य स्मरणं भवतीति न किञ्चिदनुपपन्नम्। लक्षणा तु शक्यसम्बन्धः, यथा गङ्गायां घोष इत्यादौ गङ्गादिपदे। अत्र शक्यार्थस्य प्रवाहस्य घोषाधिकरणत्वन्न सम्भवतीति अनुपपत्तिज्ञाने सति गङ्गापदेन स्वशक्यार्थप्रवाह-सम्बन्धि तीरमुपस्थाप्यते। ततस्तीरे घोष इति वाक्यार्थबोध इत्येषा दिक्।

अथ देवदत्तस्तण्डुलं पचतीत्यादौ किं विशेष्यकः किं प्रकारको बोध इति चेत्, प्रथमान्तविशेष्यको बोध इति गृहाण। तथा हि देवदत्तपदाद् देवदत्तस्य, तण्डुलपदात्तण्डुलस्य,

---

गवादिषु पदेषु न व्युत्पित्तनिमित्तं शाब्दबोधेऽपेक्षते इत्याशयेनाह **प्रकृतिप्रत्ययेति**। अयमाशयः — शब्दानां व्युत्पत्तिनिमित्तं प्रवृत्ति-निमित्तञ्चास्ति। नानयोरैक्यं क्वचिद्गवादिष्वसंभवात्। गवादि-पदानां गमनकर्तृत्वं व्युत्पत्तिनिमित्तं अस्यैव प्रवृत्तिनिमित्तत्वेऽगच्छति गवि अव्याप्तिः गच्छत्सु गोभिन्नेषु अतिव्याप्तिः। अतः प्रवृत्तिनिमित्तत्वं गोत्वादावङ्गीक्रियते। यौगिकं रुढञ्च निरूप्याह **यत्र त्विति**। उभाभ्यां वैलक्षण्यमाह तु शब्दः। एवं योगरुढात्पङ्कजपदात् पङ्कजनिकर्तृ-पद्ममिति बोधः। तदाह शब्दशक्तिप्रकाशिकायां जगदीशः

---

[1] 'अ'

द्वितीयया कर्मत्वस्य, धातुनाधिश्रयणादेर्व्यापारस्य, लकारेण कृतेरेकवचनेनैकत्वादेश्चोपस्थितिः। अनन्तरं तण्डुलस्य द्वितीयार्थकर्मत्वे आधाराधेयभावसम्बन्धेन, कर्मत्वस्य जनकत्वसंसर्गेण धात्वर्थे, तस्य जनकत्वसंसर्गेणाख्यातार्थकृतौ, तस्याश्चैकत्वस्य च समवायसम्बन्धेन देवदत्तेऽन्वयवोधः। तण्डुलवृत्तिविक्लित्तिजनकाधिश्रयणदिव्यापारानुकूलकृतिमान् देवदत्त एक इत्याकारकोऽन्वयबोधो जायते। अन्वयबोध एव वाक्यार्थबोध इत्युच्यते। ननु क्रियाजन्यफलशालित्वं कर्मत्वं, यथा तण्डुलं पचतीत्यादौ तण्डुले। अत्र पाकक्रियाजन्यफलं विक्लित्तिरवयवानां प्रशिथिलसंयोगस्तदाश्रयस्तण्डुल इति स कर्म। तथा चेदृशकर्मत्वस्य जनकतासंसर्गेण कथं धात्वर्थेऽन्वयः। उच्यते–क्रिया तावद्धातुना लभ्यते। जन्यत्वाश्रयत्वयोः संसर्गमर्यादया लाभः। अतः फलमनन्यलभ्यत्वाद् द्वितीयार्थः। अतस्तस्य जनकतासंसर्गेण क्रियायामन्वयो युक्त एव। मीमांसकास्तु आख्यातार्थभावनाशब्दितकृतिविशेष्यकस्तण्डुलवृत्तिविक्लृत्तिजनकपाकानुकूला कृतिरेकदेवदत्ताश्रितेत्याकारको बोध इति वदन्ति। वैयाकरणास्तु सत्यं कृतिविवेष्यको बोध इति। किन्तु कृतिरपि धात्वर्थ इति धात्वर्थविशेष्यक एव बोधः। न

स्वान्तर्निविष्टशब्दार्थ - स्वार्थयोर्बोधकृन्मिथः योगरुढमिति।

स्वं–पङ्कजपदम्। तदन्तर्निविष्टशब्दार्थः पङ्कजनि कर्तृ, स्वार्थः पद्ममित्येवं व्याख्या विधीयते।

शक्ति निरूप्यावसरप्राप्तां लक्षणामाह शक्येति। शक्यः शक्तिवेद्यः मुख्योऽर्थः। मुखमिव शब्दात् प्रथमं प्रतीयत इति शक्यार्थस्य मुख्यार्थ इति नामान्तरम्। संबन्धः सामीप्यादिः।

चैवमाख्यातार्थः क इति वाच्यम् । कर्तृकर्मभावानामेव यथायथमाख्यातार्थत्वात् । तस्मिंश्चाख्यातार्थे कर्त्रादौ प्रथमान्तोपस्थाप्यस्य देवदत्तादेरभेदेनान्वयः । तथा च देवदत्ताभिन्नकर्तृकः पाकस्तण्डुलवृत्तिविक्लृत्तिजनक इति बोध इत्याहुः ।

देवदत्तेन तण्डुलाः पच्यन्त इत्यादिकर्मलकारेऽपि देवदत्तादेः प्रातिपदिकार्थस्य तृतीयार्थकृतौ, तस्याः जन्यतासम्बन्धेन पाके, तस्य चाख्यातार्थे फले जन्यत्वसंसर्गेण तस्य चाधारतासंसर्गेण प्रथमान्तपदोपस्थाप्येषु तण्डुलेष्वन्वये देवदत्ताश्रितकृतिजन्यपाकजन्यविक्लृत्तिशालिनस्तण्डुला इति बोधः । एवं मीमांसकादिमतेऽपि बोधप्रकारः प्राग्वदुन्नेयः । विस्तरस्त्वाख्यातशिरोमण्यादौ द्रष्टव्य इत्येषा दिक् ।

नन्वेवं घटः कर्मत्वमानयनं कृतिरित्यादितोऽपि घटमानयतीत्यादित इव शाब्दबोधः कुतो न भवतीति चेद्, आकाङ्क्षानिश्चयाभावादिति गृहाण । अथ केयमाकाङ्क्षा । उच्यते ।

तात्पर्यानुपपत्तिरपि लक्षणाबीजमित्येतत्सूचायितुमुपन्यस्यति **अनुपपत्तिज्ञाने सतीति** अन्यथा काकेभ्यो दधि रक्ष्यतमित्यादौ मुख्यार्थबाधाभावन्न स्याल्लक्षणा । काकमात्रतात्पर्याभावादस्ति तात्पर्यापत्तिः । अत्र काकपदं दध्युपघातके लाक्षणिकम् । मीमांसकास्तु वाक्ये लक्षणामङ्गीकुर्वन्ति । नैय्यायिकास्तु पदे लक्षणेति वदन्ति । गभीरायां नद्यां घोष इत्यादौ गभीरपदस्य तीरे लाक्षणिकत्वे नदीपदं तात्पर्यग्राहकं, इतरथा गभीरपदं तात्पर्यग्राहकमिति विवेकः ।

वाक्यार्थबोधे सामग्री मुपन्यस्थति नन्वेवमिति गोरश्वः तरुषो हस्तीति ।

यत्पदस्य यत्पदव्यतिरेकप्रयुक्तमन्वयबोधाजनकत्वं तत्पदं तत्पदेन साकाङ्क्षम् । यथा क्रियापदं कारकपदाभावे नान्वयबोधं जनयति, तथा कारकपदमपि क्रियापदव्यतिरेके । अतस्तयो परस्परमाकाङ्क्षा । एवं प्रातिपदिकं विभक्तिव्यतिरेकेण नान्वयबोधकं, तथा धातुपदमाख्यातव्यतिरेकेण । अतस्तयो-र्द्वयोः परस्परसाकाङ्क्षत्वम् । एवं च घटः कर्मत्वमित्यादौ घटपदोत्तरद्वितीयादिसमभिव्याहारस्य धातूत्तरमाख्यातसमभि-व्याहारस्य चाभावेनाकाङ्क्षाविरहान्नान्वयबोध इति । नन्वे-वमपि वह्निना सिञ्चे[१]त्यादितोऽपि वाक्यार्थबोधप्रसङ्गः, आकाङ्क्षानिश्चयसत्वादिति चेन्न, योग्यताज्ञानस्यापि तत्र कारणतया तत्र तदभावेनोक्तदोषाभावात् । योग्यता चैक-पदार्थेऽपरपदार्थसम्बन्धः । यथा घटमानयेत्यादौ घटपदार्थे द्वितीयाविभक्त्यर्थकर्मत्वस्याधाराधेयभावरूपान्वायि[२]त्वाद् घट-कर्मत्वयोराधाराधेयभावलक्षणसंसर्गबोधः । न च वह्निना सिञ्चतीत्यादावुक्तरूपयोग्यताऽस्तीति वह्निरूपपदार्थे सेककरण-त्वरूपतृतीयार्थसम्बन्धाभावादिति संक्षेपः ।

आहुरित्यस्वरसे । तद्बीजं यथा — नैयायिकैराख्यातार्थः कृतिरिति लाघवादङ्गीक्रियते । कर्तुराख्यातार्थत्वे शक्यतावच्छेदक-गौरवं दोषः । अतः कृतौ शक्तिरङ्गीकर्तव्या । नचैवं कर्त्रोऽनभि-धानाद्रामेण पचतीति रुपापत्तिः । अनभिधानत्वतात्पर्यानवगमप्रवृत्ता भ्रान्तिरियम् । विशेषस्तु मुक्तावल्यादेराकरादवगन्तव्यः । गौरश्वः पुरुषो हस्तीति न वाक्यम् । परस्पराकाङ्क्षाविरहात् । अग्निना सिञ्चेदित्यपि न वाक्यम् योग्यताविरहात् । अर्थाबाधः योग्यते-त्यभिप्रायेणाह योग्यता चेति । अग्निना सिञ्चेदित्यत्र तृतीयया करणत्वमग्नेः प्रतिपादितम् । अग्निः सेके करणीभवितुं न योग्यः ।

---

१ 'ञ्चती' २ 'न्वयत्व'

पदज़न्यपदार्थोपस्थितिरासत्तिः । अत एव प्रत्यक्षोपस्थितं कलशादिकमादाय न शब्दबोधः । सा च शब्दबोधे कारणम् । नन्विदमसङ्गतं, पदज्ञानात् पदार्थोपस्थितेरसम्भवात् । तथा हि वर्णास्तावदनित्या इत्यग्रे व्यवस्थापयिष्यते । क्रमिकवर्ण-समुदायश्च पदम् । ततश्चोत्तरोत्तरवर्णैः पूर्वपूर्ववर्णानां विनाशे-नैकदा वर्णसमुदायरूपपदस्याभावेन तद्ग्रहणन्न सम्भवति । इत्यञ्च पदज्ञानरूपकारणविरहे कथं पदार्थोपस्थितिरिति चेत् । उच्यते पूर्वपूर्ववर्णानुभवजन्यसंस्कारसहकृतेन श्रोत्रेन्द्रियेणान्त्य-वर्णांशे लौकिकस्य पूर्ववर्णांशेऽलौकिकस्य पदप्रत्यक्षस्य सम्भवेन पदार्थोपस्थितेस्सम्भवादिति संक्षेपः ।

नानार्थसैन्धवादिपदप्रयोगेऽर्थविशेषतात्पर्यनिश्चयविरहे वाक्यार्थबोधानुदयात् तात्पर्यनिश्चयोऽपि तत्र कारणम् । तात्पर्यञ्च तत्प्रतीतीच्छयोच्चरितत्वम् । इदञ्च प्रकरणादिना निर्णीयते । एवञ्च सैन्धवमानयेत्यादौ भोजनप्रकरणनिर्णये सैन्धवादिपदस्य लवणादितात्पर्यनिश्चये लवणान्वयबोधः, गमन-प्रकरणनिर्णये तुरगादिपरत्वनिश्चये तुरगान्वयवोधः । अत एव नानार्थस्थले तात्पर्यनिर्वातार्थमीश्वरः कल्प्यते । सर्गाद्यकाले तदन्यस्य वक्तुरसम्भवात् । न च प्रलये मानाभावेन सर्गा[१]दा-वेवाविच्छिन्नाध्यापकपरम्परामादायैव तात्पर्यनिर्वाहसम्भवात् किमीश्वरेणेति वाच्यम् । प्रलयस्यागमप्रतिपाद्यत्वेन सर्गा-दावध्यापकासम्भवेनेश्वरस्यैव वक्तव्यत्वादिति संक्षेपः ।

।। इति शाब्दखण्डः ।।

---

१ र्गाभावे'

एवमनुभवस्य चतुर्विधतया तत्करणानामपि चातुर्विध्याच्चत्वारि प्रमाणानि। तथा च भगवानक्षपादः प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति। नन्विदमनुपपन्नम्, अर्थापत्तेरप्यतिरिक्तप्रमाणस्य सद्भावात्। तथा हि शतवर्षजीवी देवदत्त इति ज्योतिश्शास्त्रात् शतवर्षजीवित्वनिश्चयेऽनन्तरं देवदत्तस्य गृहेऽभावनिश्चया[1]द्गृहासतो देवदत्तस्य शतवर्षजीवित्वं बहिस्सत्वं विनानुपपन्नमित्यनुपपत्तिज्ञाने सति बहिस्सत्वज्ञानं जायते। अत्र बहिस्सत्वज्ञानस्य प्रत्यक्षादिप्रामाणैरसम्भवात् तज्जनकमनुपपत्तिज्ञानमिति कल्प्यते। तदेव चार्थापत्तिरिति चेन्न। देवदत्तो बहिस्सन्, शतवर्षजीवित्वे सति गृहासत्वाद्, यो न बहिः सन् स न शतवर्षजीवित्वे सति गृहासन्, यथा गृहे विद्यमानो मृतो वा, न चायन्तथा, तस्मान्न तथेति व्यतिरेकेणैव बहिस्सत्वज्ञान[2]सम्भवेनातिरिक्तप्रमाणकल्पने गौरवान्मानाभावाच्च। अनुपलब्धेर्व्यापाराभावेन करणत्वाभावादिति प्रमाणत्वं प्रागेव निरस्तमिति संक्षेपः।

पुनश्च ज्ञानमनुभूतिरूपं प्रकारान्तरेण द्विविधं प्रमाप्रमाभेदात्। तत्र तद्वति तत्प्रकारकानुभवः प्रमा। यथेदं रजतमिति[3] ज्ञानम्। इदं हि रजतत्ववति रजतत्वप्रकारकत्वानुभावात्। स

प्रमाप्रमाभेदादिति — येन सम्बन्धेन यद्वत्ता तेन सम्बधेन तद्विशेष्यकत्वं तत्प्रकारकत्वञ्च प्रमात्वमिति वाच्यम्। तेन कपालादौ संयोगादिना घटादिज्ञाने नातिव्याप्तिः। तस्यानुभवत्वाभावादधिगतार्थविषयत्वात् तत्र घटस्मरणस्य न प्रमात्वम्। निर्विकल्पकप्रत्यक्षन्तु नाप्यप्रमा। तदभाववतीति—रजतत्वाभाववत्यां शुक्तौ रजतत्वप्रकारज्ञानं

---

१ 'श्चये गृ' २ 'नस्यसं' ३ 'ति रजतज्ञा'

घट इत्यादिस्मरणस्य घटत्ववति घटत्वप्रकारकत्वेऽपि न प्रमात्वं, तस्यानुभवत्वाभावात्। तदभाववति तत्प्रकारकं ज्ञान-मप्रमा। यथा शुक्तौ इदं रजतमिति ज्ञानम्। इदं हि रजतत्वाभाववति रजतत्वप्रकारकम्। अप्रमापि द्विविधा संशयविपर्ययभेदात्। तत्रैकधर्मिणि विरुद्धनानाधर्मसम्बन्धाव-गाहिज्ञानं संशयः। स त्रिविधः। साधारणधर्मजोऽसाधारणधर्मजो विप्रतिपत्तिजश्चेति। तत्राद्यो यथा मन्दान्धकारे इन्द्रियसन्निकृष्टे ऊर्ध्वताशालिनि पिण्डे स्थाणुपुरुषसाधारणोर्ध्व[१]धर्मदर्शनात् किमयं स्थाणुः पुरुषो वेति ज्ञानं जायते। अत्रेन्द्रियसन्निकृष्टे पुरोवर्तिनि धर्मिणि स्थाणुत्वपुरुषत्वरूपविरुद्धनानाधर्मवैशिष्ट्या-वगाहनादिदं ज्ञानं संशयः। द्वितीयो यथा नित्यादनित्याच्च व्यावृत्तस्य शब्दत्वस्यासाधारणधर्मस्य दर्शिनः[२] स्यात् शब्दो नित्यो न वेति सन्देहः। तृतीयो यथा वेदः पौरुषेय इति कस्यचिद्वादिनो वाक्यम् पौरुषेयत्वस्य चोपस्थितौ मध्यस्थस्य विदुषः[३] पौरुषेयो न वेति संशयो जायते। सर्वत्र संशये धर्मिज्ञानं कोट्युपस्थितिश्च हेतुः। विपर्ययो यथा देहादाव-हम्मतिः शुक्त्यादौ रजतादिज्ञानं वा। यद्यपि संशयविपर्यय-योर्द्वयोरप्यप्रमात्वमविशिष्टं, तथापि विपर्यये निर्णयत्वं विशेषः। निर्णयत्वञ्च तदभावाप्रकारकत्वे सति तत्प्रकारकत्वम्।

भ्रम इत्यर्थः। संशय इति — एकधर्मिविरुद्धभावाभावप्रकारकज्ञानं
भ्रम इत्यर्थः। संशय इति — एकधर्मिविरुद्धभावाभावप्रकारकज्ञानं
संशयः। उभयसाधारणो यो धर्मः तस्य ज्ञानं संशयकारणम। रात्रौ दूरेमन्दान्धकारे प्रांशुत्वं स्थाणुपुरुषसाधारणं ज्ञात्वाऽयं स्थाणुर्नेति सन्देहः। संशयविपर्यासयोरप्रमात्वं व्यक्तमेव। अप्रमां प्रति दोषः

---

१ 'ध्र्वत्वध' २ 'र्शना शत्' ३ 'वेदः'

संशये हि भावाभावयोर्द्वयोरपि प्रकारत्वेन नोक्तरूपनिर्णयत्वम्। मीमांसकास्तु अज्ञातार्थगोचरज्ञानं प्रमेत्याहुः, प्रमात्वञ्च स्वतो ग्राह्यमिति। तथा हि–येनैव ज्ञानं गृह्यते तेनैव तद्गतं प्रमात्वमपि। ज्ञानञ्च मुरारिमतेऽनुव्यवसायेन गृह्यते। इदं रजतमिति व्यवसायानन्तरमिदं रजतं जानामीत्यनुव्यवसायो मनसा जायते। अत्र ज्ञाने रजतज्ञानं विषयः। तस्मिंश्च गृह्यमाणे तद्गतं तद्वति तत्प्रकारकत्वमपि गृह्यते। भाट्टमते तु ज्ञानमतीन्द्रियं ज्ञानजन्यज्ञाततयानुमीयते। न च ज्ञाततायां मानाभावः। घटादिज्ञानानन्तरं मया घटो ज्ञात इत्याद्यनुभवस्यैव प्रमाणत्वात्। न चायमनुभवो ज्ञानविषयमवगाहते, न तु तद्व्यतिरिक्तज्ञाततामिति वाच्यम्। ज्ञानविषयत्वातिरिक्तज्ञातताऽनङ्गीकारे घटं जानामी[१]त्यादौ घटादेर्ज्ञानक्रियाजन्यफलशालित्वविरहेण कर्मत्वाभावप्रसङ्गात्। अतो ज्ञानजनितज्ञातता-रूपलिङ्गेन घटादिज्ञानेऽनुमीयमाने स्वग[२]तप्रमात्वमपि गृह्यत इति। गुरुमते ज्ञानं स्वप्रकाशम्। स्वप्रकाशत्वञ्च स्वविषयकत्वम्। सर्वं हि ज्ञानं घटमहं जानामीत्याद्याकारमुत्पद्यते। अत्र च ज्ञाने मितिरूपज्ञानस्य, मेयरूपस्य घटस्य मातुश्चाहमर्थस्य भानाद् मितिमातृमेयविषय[३]कत्वं ज्ञानस्येति तदीयो राद्धान्तः। सोऽयं त्रिपुटी प्रत्यक्षवादः। तथा च घटादिज्ञानेन

कारणं, प्रमां प्रति च गुणः। गुणस्य प्रमाजनकत्वमनुमानाद् बोध्यम्। **मीमांसकास्त्विति** ज्ञानस्य स्वप्रकाशकत्वात् तज्ज्ञानप्रामाण्यमपि स्वयं गृह्यत इति गुरुमतम्। भाट्टाः स्वतः प्रामाण्यं ज्ञानस्य नाङ्गीकुर्वन्ति। ज्ञानस्य प्रमात्वं तैरनुमीयते। तत्प्रामाण्यमनुव्यवसायेनेति मुरारिमिश्राः।

---

१ 'ती' २ 'तंप्तं' ३ 'यत्वं'

स्वस्वरूपे गृह्यमाणे स्वगतं प्रमात्वमपि गृह्यते। अतो मतत्रयेऽपि प्रमात्वस्य ज्ञानग्राहकसामग्रीग्राह्यतया स्वतस्त्वसिद्धिरिति। तदिदं मीमांसकमतमनुपपन्नम्। ज्ञाने गृह्यमाण एव तद्गत-प्रमात्वस्यापि ग्रहणेऽनभ्यासदशोत्पन्नरजतादिज्ञाने ममोत्पन्नं रजतादिज्ञानं प्रमा न वेति प्रामाण्यसंशयो न स्यात्। संशये हि धर्मिज्ञानं कारणम्। तथा च प्रकृतसंशय[१]धर्मिणो ज्ञानस्य संशयात् प्राग्ग्रहणे तद्गतप्रमात्वस्यापि निश्चितत्वेन संशयानुप-पत्तिः। निश्चयस्य संशयप्रतिबन्धकत्वात्। ज्ञानस्य प्राग्ग्रहणे धर्मिज्ञानरूपकारणाभावेन संशयानुपपत्तिरिति सर्वसाधारणो दोषः। मुरारिमतेऽनुव्यवसायस्य व्यवसायविषयकत्वेन व्यव-सायानुपनीतस्य प्रामाण्यस्य कथमनुव्यवसायो भानमित्यपरो दोषः। भाट्टमते विज्ञानजन्यज्ञाततायां मानाभावेन तया ज्ञानग्रहणानुपपत्तिः। न च घटो ज्ञात इत्यादिप्रत्यय एव तत्र मानमिति वाच्यम्। तस्य ज्ञानविषयत्वावगाहितत्वात्। घटं जाना[२]तीत्यादौ विषयत्वस्यैव द्वितीयार्थत्वात्। अतीतादौ विषयाभावेन तदाश्रितज्ञाततासम्भवेन विषयताया एव त्वया तत्र वाच्यत्वादित्यपरो दोषः। गुरुमतेऽपीन्द्रियस्य सन्निकृष्टार्थ-ग्राहकत्वेन चक्षुरादिना सममात्मज्ञानयोरसन्निकर्षेण तेन

ज्ञानस्य प्रमात्वं स्वतो वा परतो वा गृह्यत इत्यत्र महान् विवादः। प्रमात्वं स्वतोऽप्रमात्वञ्च परत इति केचित्। तत्र प्रमात्वस्य स्वतस्त्वं द्विविधमुत्पत्तौ च ज्ञप्तौ च। तत्रोत्पत्तौ स्वतस्त्वं ज्ञानकारणमात्रजन्यत्वम्। येन ज्ञानं जायते तेनैव प्रमाणं सदेव जायत इत्यर्थः। ज्ञप्तौ स्वतस्त्वं ज्ञानविरहकज्ञानग्राहकनानाग्राह्यत्वम्, येन ज्ञानं जायते तेनैव प्रमात्वं सदेव जायते। प्रमाणत्वस्योत्पत्तौ

---

१ 'ये घ' २ 'मी'

तयोर्ग्रहणानुपपत्या स्वप्रकाशत्वासम्भवादिति दोषान्तरमिति संक्षेपः। तर्हि केन प्रमात्वं गृह्यत इति चेत्, अनुमानेनेति गृहाण। तथा हि अनभ्यासदशोत्पन्नरजतादिज्ञानानन्तरं रजतार्थी पुरुषः प्रवर्तते। ततस्तत्र रजतादिप्रतिलम्भे ममोत्पन्नं रजतादिज्ञानं प्रमा, संवादिप्रवृत्तिजनकत्वात्, यन्नैव तन्नैवं यथा शुक्तिरजतादिज्ञानं, न चेदन्तथा, तस्मान्न तथेति केवल-व्यतिरेकिणा प्रमात्वं गम्यत इति संक्षेपः। गुरवस्तु प्रमालक्षणे तद्वद्विशेष्यकत्वं विशेषणं व्यर्थम्, अयथार्थज्ञानस्यैवा-भावेन व्यावर्त्यप्रसिद्धेः, सामग्र्यभावेनान्यथाख्यात्यनुपपत्तेः। द्रव्यसमवेतचाक्षुषे हि चक्षुस्संयुक्तसमवायघटिता सामग्री। न च शुक्तौ रजतत्वादिप्रत्यक्षहेतुस्संयुक्तस्समवायलक्षणः सन्नि-कर्षोऽस्ति। न चैवं शुक्तौ रजतार्थिप्रवृत्तिर्न स्यात्, प्रवर्तकस्य पुरोवर्तिविशेष्यकेष्टतावच्छेदकप्र[१]कारकज्ञानस्या-भावादिति वाच्यम्। पुरोवर्तिनीष्टभेदाग्रहस्यैव प्रवृत्तिजनक-त्वात्। न चैवं लोके भ्रमशब्दस्यापार्थकत्वप्रसङ्गः, ग्रहण-स्मरणार्थकस्य ज्ञानद्वयस्यैव भ्रमशब्दार्थत्वादित्याहुः। तन्न। प्रमास्थले हि विशिष्टज्ञानं प्रवृत्तिहेतुरिति निर्णीतम्। ततश्च क्लृप्तहेतुना तेन विना भ्रमस्थले प्रवृत्तिर्नस्यात्। न च

ज्ञप्तौ च परतस्त्वं तु तद्विपरीततया च वक्तव्यम्। जलप्रत्यक्षानन्तरं तस्य प्रामाण्यमवधार्य कश्चिज्जलादौ प्रवर्तते। कश्चित्तु सन्देहादेव प्रवृत्युत्तरकाले जलादिलाभे प्रामाण्यमवधारयति। अर्थज्ञाने प्रमा-त्वनिश्चयोऽर्थे प्रवृत्तिकारणमिति प्रथमः पक्षः। तत्र प्रमात्वज्ञानमात्रं क्वचित्प्रवृत्तौ हेतुरित्याश्रित्य द्वितीयः पक्षः। अप्रमात्वे संशयशून्यार्थ-निश्चयः प्रवृत्तिकारणमिति तृतीयः पक्षः। तेन ज्ञानग्राहकातिरिक्ता-

---

१ 'रज्ञा'

भेदाग्रहस्य प्रवृत्तिहेतुत्वम् । लाघवेन पुरोवर्तिनीष्टाभेदग्रहस्यैव जनकत्वात् । न च सन्निकर्षविरहेणान्यथाख्यात्यसम्भवः । स्मर्यमाणारोपे ज्ञानस्य सन्निकर्षस्य [1]सम्भवे न सन्निकर्षविरहा-सिद्धेः दोषबलादसन्निकृष्टभानसम्भवाच्च । वेदान्तिनस्तु पुरोदेशे रजतं साक्षात्करोमीत्यनुभवबलेन दोषसहकृतज्ञानसामग्र्या पुरोदेशे तात्कालिकं रजतमुत्पद्यत इत्याहुः । तदपि न । क्लृप्तरजतावयवतत्संयोगादिरूपकारणविरहेण तत्र रजतोत्पादा-योगात्, प्रतिपुरुषं भिन्नाभिन्नरजतादेस्तद्ध्वंसादेश्च कल्पने गौरवात्, ज्ञानसामग्र्याऽर्थजनकत्वापत्तेश्चेति संक्षेपः । माध्व-बौद्धादयस्तु असदेव रजतं दोषबलाद्भासत इत्याहुः । तदप्य-शुद्धम् । असतो भानासम्भवात् । न च दोष एव तत्र नियामक इति वाच्यम् । दोषो हि सादृश्यादिरूपः । न चासतस्सादृश्या-दिकमस्ति । तस्य निरुपाख्यत्वेनाधारत्वानुपपत्तेरिति दिक् । आन्तरमेव रजतं बाह्यतया भातीत्यात्मख्यातिवादिनः । तदप्यनुभवपथन्नारोहति । रजतादेर्बाह्यत्वानुभवविरोधात् । न च दोषात्तथा भानमिति वाच्यम् । दोषाभावे कदाचिदान्त[2]-रस्यानुभवप्रसङ्गादिति सिद्धान्यथाख्यातिरिति कृतं पल्लवेन ।

नपेक्षत्वमेव स्वतस्त्वं प्रामाण्यस्य । ज्ञानञ्च प्रवृत्तेः पूर्वमेव गृहीतम्, कथमन्यथा प्रामाण्याप्रामाण्यवतोः सन्देहोऽपि स्यात् । अनधिगते धर्मिणि सन्देहस्यानुदयात् तस्मात् । प्रवृत्तेः पूर्वमेव ज्ञाततान्यथानुप-पत्तिप्रसृतयाऽर्थापत्त्या ज्ञाने गृहीते सति ज्ञानगतं प्रामाण्यमपि अर्थापत्त्यैव गृह्यते । ततः परं पुरुषस्य प्रवृत्तिः । न तु प्रथमं ज्ञानमात्रं गृह्यते । ततः प्रवृत्त्युत्तरकाले फलदर्शनेन ज्ञानस्य प्रामाण्यमवधार्यते ।

---

१ अनुभूयमानारोपस्थले लौकिकसन्निकर्षस्य च २ 'रत्वानु'

अस्याश्चान्यथाख्यातावसाधारणकारणं दोषः। स चाननुगतः। क्वचित् पित्तं, यथा शङ्के पीतताभ्रमे वंशोरगभ्रमे मण्डूकवसाञ्चनमित्यादि। प्रमायाश्चासाधारणकारणं गुणः। तत्र प्रत्यक्षे विशेषणवद्विशेष्येन्द्रियसन्निकर्षो गुणः। अनुमितौ साध्यवति पक्षे परमर्शः, उपमितौ सादृश्यप्रमा, शाब्दबोधे योग्यताप्रमा तात्पर्यप्रमा वेति। अत एव प्रमायां ज्ञान–सामान्यसामग्र्यतिरिक्तगुणजन्यतयोत्पत्तावपि तस्याः परत्वमिति संक्षेपः।

॥ इति प्रामाण्यवादः ॥

अयमाशयः — इदं किल परस्याभिमतम्। मया घटो ज्ञात इत्यत्र घटस्य ज्ञातता प्रतिसन्धीयते घटे ज्ञातता नाम कश्चिद्धर्मो जात इत्यनुमीयते। ज्ञानजन्या एषा ज्ञातता ज्ञानमन्तरेण नोपपद्यते, कारणाभावे कार्यानुदयात्।

नेदमुचितम्। ज्ञानविषयातिरिक्तायाः ज्ञाततायाः अभावात्ः ज्ञानस्य स्वभावादेव विषयविषयितोपपत्तिः। अर्थज्ञानयोरेतादृशो विशेषः दुर्वार एव। इतरथाऽतीतानागतयोः विषयत्वमेव न स्यात्। एवञ्च ज्ञानाप्रामाण्ये परतः यथा गृह्यते प्रामाण्यमपि परत एव ग्राह्यम् ज्ञानं हि मानसप्रत्यक्षेण प्रामाण्यं पुनरनुमानेन। ज्ञानस्यानभ्या–सदशापन्नस्य प्रामाण्यमनुमीयते तस्मात् परत एव प्रामाण्यमित्यास्तां विस्तरः।

सुखत्वजातिमत्सुखव्यवहारासाधारणकारणं वा गुण-स्सुखम्। तच्च सर्वेषामभिलषितम्। अत एव तस्य स्वतः पुरुषार्थत्वम्। तत्र च धर्मोऽसाधारणकारणम्।

दुःखत्वजातिमद् दुःखव्यवहारासाधारणकारणं वा गुणो दुःखम्। तच्च सर्वेषां प्रतिकूलवेदनीयम्। अत एव बलवद्द्वेष-विषयः। तत्र चाधर्मो निमित्तम्।

इच्छात्वजाति[१]मानिच्छाव्यवहारासाधारणकारणं वा गुण इच्छा। सा च द्विविधा – उपायेच्छा फलेच्छा चेति। तत्रौ-दनाद्युपाये पाकादाविच्छा उपायेच्छा। अस्याश्च फलेच्छा इष्टसाधनताज्ञानं बलवदनिष्टाजनकत्वज्ञानञ्चेति त्रयं कारणम्। अत एव फले वीतरागस्य सत्यपीष्टसाधनताज्ञाने सत्यपि च बलवदनिष्टाजनकत्वज्ञाने न पाकादाविच्छा। एवं सत्यामपि फलेच्छायामिष्टसाधनताज्ञानाभावे बलवदनिष्टाजनकत्वज्ञान-सत्वेऽपि नेच्छा। मधुविषसंपृक्तान्नभोजनादौ फलेच्छेष्टसाधन-ताज्ञानयोस्सत्वेऽपि नेच्छा, तत्र बलवदनिष्टजनकत्वज्ञानात्। फलेच्छायां फलज्ञानं कारणम्। फलञ्च सुखं दुःखाभावस्तत् साधनञ्चेति।

पाकादाविच्छा उपायेच्छेति। उपायेच्छां प्रति इष्टसाधनताज्ञानं करणम्। अन्यस्यामितिफलेच्छां प्रति इत्यर्थः। सुखत्वप्रकारकत्वानु-रूपितोद्देश्यतासम्बन्धेनेच्छां प्रति इष्टसाधनताज्ञानं करणमिति बोध्यम्। तेन सुखत्वभ्रमेण पाकादाविच्छोत्पादेन तत्रेष्टसाधनताज्ञानाभावेऽपि न क्षतिः।

---

१ 'मभी इ'

द्वेषत्वजातिमान् द्वेषव्यवहारासाधारणकारणं वा द्वेषः। सोऽपि दुःखतदुपायगोचरत्वेन द्विविधः। तत्राद्ये दुःखज्ञानं हेतुः द्वितीये दुःखजनकताधीरिति।

यत्नत्वजातिमान् यत्नव्यवहारासाधारणकारणं वा यत्नः। स त्रिविधः – प्रवृत्तिनिवृत्तिजीवनयोनिभेदात्। तत्र प्रवृत्तौ चिकीर्षा हेतुः। चिकीर्षा च कृतिसाध्यविषयिणी कृति–साध्यत्वप्रकारिकेच्छा, पाकं कृत्या साधयामीति तदनुभवात्। अस्याश्च कृतिसाध्यत्वज्ञानमिष्टसाधनत्वज्ञानं बलवदनिष्टा–जनकत्वज्ञानं च हेतुः। ततश्च एतत्त्रितयज्ञानं चिकीर्षाद्वारा प्रवृत्तौ जनकम्। अत एव चन्द्रमण्डलाहरणादाविष्टसाधनताज्ञान बलवदनिष्टाजनकत्वज्ञानसत्वेऽपि न प्रवृत्तिः, तत्र कृतिसाध्यता–ज्ञानाभावात्। अत एव च मण्डलीकरणादौ कृतिसाध्यत्व–बलवदनिष्टाजनकत्वज्ञानसत्वेऽपि न प्रवृत्तिः, तत्रेष्टसाधनता–ज्ञानाभावात्। न वा मधुविषसंपृक्तान्नभोजने कृतिसाध्यत्वेष्ट–साधनत्वज्ञानसत्वेऽपि प्रवृत्तिः। तस्य मरणरूपबलवदनिष्ट–जनकतया तदजनकत्वज्ञानाभावात्। प्राभाकरास्तु इच्छायाः स्वसमानप्रकारकज्ञानसाध्यत्वेन कृतिसाध्यत्वप्रकारकेच्छारूपा–याश्चिकीर्षायां कृतिसाध्यत्वप्रकारकमेव ज्ञानं जनकम्।

द्वेषत्वजातिमानिति। प्रवर्तनालक्षणदोषाः इति सूत्रकाराः। प्रवर्तनालक्षणं येषां ते प्रवर्तनालक्षणा इति व्युत्पत्तिः। **यत्नः त्रिविध इति।** प्रवृत्तित्वं रागजन्यतावच्छेदकजातिविशेषः। द्वेषजन्यतावच्छेदकं निवृतित्वम्।

अतस्तदेव प्रवर्तकं, न त्विष्टसाधनादिज्ञानं, तस्य भिन्नप्रकारकत्वाद्, नित्ये सान्ध्यावन्दनादौ फलाभावेनेष्टसाधनताज्ञानसम्भवाच्च। नित्यनैमित्तिकयोर्हि ब्रह्मलोकप्राप्त्यादि[१]फलश्रवणं स्तुतिमात्रम्। अन्यथा काम्य इव नित्यादावपि कामनाधीनकर्तव्यतापत्तेः। नित्यस्थले हि पण्डापूर्वं फलम्। अतो न निष्फलत्वात् सन्ध्ययावन्दनादौ प्रवृत्यनुपपत्तिरिति। तन्न। कृतिसाध्यत्वप्रकारकज्ञानमात्रस्य प्रवर्तकत्वे निष्फले चैत्यवन्दनादौ प्रवृत्तिप्रसङ्गाद् मधुविषसम्पृक्तान्नभोजनादौ प्रवृत्यापत्तेश्च। अतः प्रवृत्तौ तदपि द्वयं हेतुः। न च नित्यस्थले तदसम्भवः। तत्रापि फलश्रवणात्। न च तस्य कामनाधीनकर्तव्यतापत्तिः इष्टत्वात्। न च कामनाभावेऽकरणापत्तिरिति वाच्यम्। अकरणे प्रत्यवायश्रवणेन कामनावश्यकत्वकल्पनात्। सुखदुःखाभावतत्साधनान्यतरत्वाभावेनापुरुषार्थतया पण्डापूर्वस्य फलत्वानुपपत्तेश्च। तस्य फलत्वे कामनाधीनकर्तव्यतापत्तेस्तौल्याच्चेति संक्षेपः। प्रवर्तकज्ञानविषय एव[२] लिङ्देशशक्तिरिति लिङ्गादिः प्रवर्तकज्ञानजनक इति गीयते। कौमारिलास्तु लिङादिनिष्ठाभिधानामेको व्यापारः। स एव शब्दभावना प्रवर्तनेति चोच्यते। तज्ज्ञनादेव प्रवृत्तिरित्याहुः। आचार्यास्तु लोके पाकं कुर्यादित्यादावाज्ञादिरूपेच्छा लिङादिना

लिङादिः प्रवर्तकज्ञानजनक इति। तत्रेदं बोध्यम्। प्रवृत्तिः द्वेधा। स्वेच्छादिना परप्रेरणाजन्या च। तत्राद्यायां प्रवर्तनाया अनुपयोगेऽपि द्वितीयप्रवृत्तौ सा प्रयोजिका। आचार्यप्रेरणयेदं करोमीति व्यवहारात्। प्रवर्तना च पुरुषगतप्रवृत्यनुकूलव्यापारविशेषः। स च चेतनस्याभिप्राय एव। अचेतनस्य वेदस्य त्वभिधानामकः शब्द-

---

१ 'दि श्र' २ 'विषये च'

प्रतिपाद्यते। सैवाज्ञाभिप्रायशब्देनोच्यते। तज्ज्ञानादेव प्रवृत्तिरिति क्लृप्तत्वाद्वेदेऽपि लिङादिना सैव प्रतिपाद्यते। न च तत्रेश्वरातिरिक्तस्याज्ञा सम्भवतीति विध्यन्यथानुपपत्त्याऽपीश्वरसिद्धिरिति वदन्ति। निवृत्तिरूपयत्ने तु बलवदनिष्टसाधनताज्ञानं कारणम्। अत एवाग्निकण्टकादिसम्पर्कान्निवर्तते। नव्यास्तु – प्रवृत्यभावेनैव निवृत्तिव्यवहारोपपत्तेः निवृत्याख्ययत्ने मानाभाव इत्याहुः। एतौ द्वावपि योग्यौ, अहं प्रवृत्तोऽहन्निवृत्त इत्याद्यनुभवात्। जीवनयोनियत्नस्तु प्राणपञ्चकसञ्चारानुमेयो जीवनादृष्टजन्य इति प्राञ्चः। अर्वांचीनास्तु जीवनयोनियत्न एव नास्ति। न चैवं प्राणपञ्चकसञ्चारानुपपत्तिः। जीवनादृष्टेनैव तस्योपपत्तेरित्याहुः।

गुरुत्वव्यवहारासाधारणकारणं गुरुत्वम्। तच्च पतनासमवायिकारणम्। अवयवगुरुत्वमवयविगुरुत्वेऽसमवायि। नित्यगतगुरुत्वन्नित्यम्। अनित्येऽनित्यम्। सर्वञ्च गुरुत्वमतीन्द्रियं पतनानुमेयमिति सम्प्रदायः। लीलावतीकृतस्तु–पाषाणादावधोऽवच्छेदेन गुरुत्वं प्रत्यक्षमित्याहुः।

द्रवत्वव्यवहारासाधारणकारणं द्रवत्वम्। तद्द्विविधम्, नैमित्तिकसांसिद्धिकद्रवत्वभेदात्। तत्र नैमित्तिकद्रवत्वं क्वचि–

समवेतः। तथा चाऽऽचार्याभिज्ञानाद्यथा शिष्यः प्रवर्तते। तथाऽभिधानज्ञानाद् विधिस्थले प्रवृत्तिरिति सैव लिङर्थः। सैव शाब्दी भावना लिङ्त्वांशेनोच्यते। अर्थभावनापि आख्यातत्वांशेन। यागादिगोचराऽऽत्माश्रितप्रवृत्तिरर्थभावना। अत्र शब्दभावनया अर्थबावनैव भाव्या। अर्थभावनायाः फलं स्वर्गादिरिति बोध्यम्।

दग्निसंयोगासमवायिकारणकं क्वचिदवयवद्रवत्वासमवायिकारणकम् । तच्च पृथिवीतेजसोरित्युक्तम् । सांसिद्धि'कद्रवत्वं ज'लमात्रवृत्ति । जलपरमाणुगतन्नित्यम् । द्व्यणुकादिगतमनित्यमवयवद्रवत्वासमवायिकारणकं यावद्द्रव्यभावि च । सर्वञ्च द्रवत्वं संग्रहसाधनम् ।

स्नेहत्वजातिमान् गुणः स्नेहः । स च जलमात्रवृत्तिः । नित्यगतो नित्यः, अनित्यगतोऽनित्यः । अवयवस्नेहजन्यश्च ।

संस्कारस्त्रिविधः—वेगो भावना स्थितस्थापकश्चेति । तत्र वेगो मूर्तमात्रसमवेत इत्युक्तम् । तस्मिंश्च वेगे नोदनजन्या क्रिया कारणम् । तथा हि प्रथमं शरादौ नोदनात्क्रिया जायते । ततस्तया क्रियया शरादौ वेगोत्पत्तिः । ततस्तत्कर्मनाशे सति तेन वेगेन शरे कर्मान्तरोत्पत्तिः । एवमुत्तरदेशप्राप्त्यन्तं स एवोत्तरोत्तरं कर्मारभते । शरादेरुत्तरदेशसंयोगाच्च तस्य वेगस्य नाशः । तथा च पारमर्षसूत्रं 'नोदनादाद्यमिषोः कर्म, तत्कर्मकारिताच्च संस्कारात्तथा तथोत्तरमुत्तरञ्च' (वैशेषिकदर्शनं आ. ५. १७ इति । ततश्चाद्यं कर्मजन्यो वेग एक एवोत्तर-

---

द्रवत्वव्यवहार इति । तच्च पृथिवीतेजसोरिति । नैमित्तिकद्रवत्वं पृथिव्यां घृतजतुप्रभृतिषु तेजसि सुवर्णेऽग्निसंयोगजन्यम् । जलान्तर्गतस्य करकस्य हिमशकलस्य चाग्निसंयोगेन द्रवत्वं कुत नैमित्तिकं नेति वाच्यम् । करकादीनां विलयनानन्तरं करकत्वेन प्रत्यभिज्ञानाभावात् । जलमित्येवावधारणादिति भावः । घृतादि विलयनेऽपि इदं घृतमिति प्रतीत्याऽघृतत्वजातिबोधो दुर्वार एव स्नेहत्वजातिमानिति — पृथिव्यामपि तैले स्नेह उपलभ्यते नचासौ

संयोगपर्यन्तं तिष्ठतीति। नैयायिकास्तु नोदनादिना शरादौ कर्मोत्पत्तिः। तेन कर्मणा शरे वेगः। तेन तत्कर्मनाशे सति वेगान्तरं जन्यते, तेन वेगेन वेगान्तरं, तेन वेगान्तरमिति चरमवेगस्यैवोत्तरसंयोगान्नाशः। आन्तरालिकवेगानां वेगजन्य-कर्मणैव नाशः। न चैवमनेकवेगकल्पने गौरवमिति शङ्क्यम्। विहायसि विहङ्गमो द्रुततरं गच्छतीति प्रत्ययेन पूर्ववेगविलक्षण-वेगोत्पत्तेः प्रामाणिकत्वादित्याहुः। मीमांसकास्तु निरन्तरं गतिसन्तानस्यैववेगव्यवहारविषयतया वेगाख्यसंस्कारे मानाभाव इति वदन्ति। भावनाख्यसंस्कारस्त्वाऽऽत्ममात्रवृत्तिः। स च स्मृतिहेतुः। तत्र च पूर्वानुभवत्वेन कारणता। स चोद्बुद्ध एव स्मृतिहेतुः। उद्बोधकश्च सदृशदर्शनादिरननुगतः। यथोक्तं सदृशादृष्टचिन्ताद्याः स्मृतिबीजस्य बोधका इति प्राञ्चः। दीधितिकारादयस्तु—पुनः पुनः स्मरणादपि दृढतरसंस्कारो-त्पाद'नानुभवा'न्नानुभवत्वेन तत्र जनकता। अपि तु स्मृति-साधारणेन निर्णयत्वेन जनकतेत्याहुः। तन्नाशे क्वचित् फलं क्वचित्कालं क्वचिद्रोग इति दिक्। स्थितस्थापकसंस्कारः क्षितिवृत्तिः। स चाकृ'ष्टकस्य' शाखादेः स्वस्थानप्राप्त्यनुकूलः।

जलीयः। तथा सति दहनप्रातिकूल्यप्रसङ्गादिति चेन्न। तैले विद्यमानस्नेहः जलीय एव। तस्य प्रकृष्टत्वात् दाहानुकूलता। इत्थं स्नेहो नाम चिक्कणता जलमात्रवृत्तिः कारणगुणपूर्वकः गुरुत्वा-दिवत् यावद्द्रव्यभावीति बोध्यम्।

दीधितिकारेति। उपेक्षात्मकज्ञानात् संस्कारानुपपत्तिः। काशीदर्शनलालसस्य मार्गपार्श्वस्थवृक्षादीनां दर्शनमेवोपेक्षाज्ञानम्। तादृशं उदासीनज्ञानं संस्कारं न जनयतीत्यर्थः। स्मरणं प्रति

नित्यगतो नित्योऽनित्यगतोऽनित्यः। केचिच्चतुर्ष्वपि क्षित्यादिषु स्थितस्थापकसंस्कारमिच्छन्ति।

धर्मत्वजातिमान् धर्मः। स च सुखासाधारणकारणम्। यागादिविहितक्रियाजन्यस्तद्व्यापारः। तथा हि यागादेः स्वर्गादिसाधनत्वं श्रूयते। न चाशुविनाशिनः कर्मणः कालान्तर-भाविस्वर्गादिजनकत्वं सम्भवति, तस्य चिरध्वस्तस्य कार्याव्यव-हितपूर्ववर्तित्वाभावात्। अतस्तत्साधनत्वोपपादनार्थं व्यापार आवश्यकः। न चैवमपि यागादेः स्वर्गाद्यव्यवहितपूर्ववर्तित्वं नोपपादितमेवेति वाच्यम्। कार्याव्यवहितपूर्वसमये हि स्वस्व-व्यापारान्यतरसत्वं कारणत्वप्रयोजकम्। तथा च प्रकृते स्वस्यासत्वेऽपि स्वव्यापारस्य सत्वाद्यागादेः कारणत्वोपपत्तिः। अयमेव धर्मशब्देनोच्यते। तन्नाशे च कर्मनाशाजलस्पर्शादि कारणम्। मीमांसकास्तु विहितक्रियैव धर्मः। न चैवं विहितक्रियायास्तत्कालमेव नाशात् कालान्तरे स्वर्गाद्यनुत्पाद-प्रसङ्गः। तस्यास्सूक्ष्मरूपेण तावत्कालमवस्थानात्। एतेन कर्मनाशाजलस्पर्शादिनाश्यतापि धर्मस्य व्याख्याता। एव-मधर्मोऽपि निषिद्धक्रियायास्सूक्ष्मावस्थेति वदन्ति।

उपेक्षाज्ञानान्यनिश्चयत्वेन हेतुत्वम्। यतः संस्कारः स्मरणं प्रत्यभि-ज्ञानञ्च जनयति। अनुभवः संस्कारद्वारा स्मरणं जनयति। स्मरणमेव प्रत्यभिज्ञायाः कारणमिति मणिकाराः।

प्रथमं अनुभवः। अनन्तरं संस्कारः। ततः स्मृतिः। पुनः प्रत्यभिज्ञा इत्यास्तां विस्तरः।

अधर्मत्वजातिमानधर्मः। स च निषिद्धक्रियाजन्यो दुःखासाधारणकारणम्। तत्र प्रमाणञ्च प्रायश्चित्तशास्त्रम्। तेन हि प्रायश्चित्तनाश्यता पापस्य प्रत्याय्यते। न च निषिद्धक्रियारूपत्वे पापस्य सा युज्यते, तस्याः प्रायश्चित्तं विनैव नाशादित्यतिरिक्तं नरकानुकूलं पापं कल्प्यत इति दिक्।

शब्दत्वजातिमान् शब्दः। स द्विविधो ध्वन्यात्मको वर्णात्मकश्चेति। तत्र ध्वन्यात्मकशब्दे भेरीमृदङ्गादिनिमित्तकारणम्। भेर्याकाशसंयोगादिरसमवायिकारणम्। एवं वंशदलादौ पाट्यमाने पटपटाशब्दोत्पत्तौ वंशदलादिकं निमित्तम्। इदञ्च संयोगविभागयोरसमवायित्वमाद्यशब्दं प्रत्येव। द्वितीयादिशब्दानान्तु पूर्वपूर्वशब्दोऽसमवायिकारणम्। अनुकूलपवनादिनिमित्तम्। वर्णात्मकस्तु शब्दोऽकारादिः। तदुत्पत्तौ कण्ठादिनिमित्तम्। कण्ठाकाशसंयोगोऽसमवायिकारणम्। तस्य च शब्दस्य वीचीतरङ्गन्यायेनोत्पत्तिरिति केचित्। कदम्बगोलकन्यायेनोत्पत्तिरित्यापरे। आद्यादिशब्दानामुत्तरोत्तरशब्दैर्नाशः, अन्त्यस्य तूपान्त्येन सुन्दोपसुन्दन्यायेन नाश इति केचित्। अन्ये तूपान्त्यनाशादन्त्यनाश इति प्राहुः। मीमांसकास्तु—स एवायं गकार इति प्रत्यभिज्ञाबलाद् वर्णात्मकः शब्दो नित्य

अधर्मत्वजातिमानिति—सुखस्यासाधारणं कारणं धर्मः। दुःखस्यासाधारणं कारणमधर्मः। द्वावपि आगमगम्योऽनुमानगम्यश्च। धर्माधर्मौ शरीरादिजनकावात्मविशेषगुणौ भवतः। प्रयत्नादीनां शरीराद्यजनकत्वं व्यक्तम्। वासनाजन्यावेतौ धर्मधर्मौ परमज्ञानेन नाशं प्राप्नुतश्च। तथा हि क्षीयन्ते चास्यकर्माणि तस्मिन् दृष्टे परावरे इति श्रुतिवचनं तत्र प्रमाणमित्यास्तां विस्तरः।

इत्याहुः । तन्न । उत्पन्नो गकारो विनष्टो गकार इति प्रत्यय–बलेन वर्णानामुत्पादविनाशसिद्धेः । न च प्रत्यभिज्ञानुपपत्तिः। तस्यास्तज्जातीयविषयकत्वात् । तदेवौषधं मया भुक्तमित्यादौ प्रत्यभिज्ञायास्तज्जातीयत्वदर्शनादिति संक्षेपः ।

।। इति गुणपदार्थनिरूपणम् ।।

अथ कर्मपदार्थनिरूपणम्

अथ कर्मपदार्थो निरूप्यते । कर्मत्वजातिमत् कर्म । यद्वा संयोगविभागोभयासमवयिकारणत्वं तल्लक्षणम् । तथा हि प्रथमद्रव्ये कर्म, ततो विभागः विभागात् पूर्वसंयोगनाशः, तत उत्तरदेशसंयोग इति संयोगविभागयोः कर्मैवासमवायिकारणमिति लक्ष्ये लक्षणसमन्वयः । अत्रैवैकैकासमवायिकारणत्वस्य तल्लक्षणत्वे संयोगविभागयोरतिव्याप्तिः, तयोरपि संयोगजविभागजसंयोगविभागौ प्रति असमवायिकारणत्वात् । अतस्समुदितमुपात्तम् । यद्वा विभागासमवयिकारणत्वे सति संयोगकारणत्वं तत् । न च विभागेऽतिव्याप्तिः, तस्य विभागजविभागं प्रत्यसमवायिकारणत्वात् पूर्वसंयोगनशद्वारा संयोगनाशत्वाच्चेति वाच्यम् । तस्य पूर्वसंयोगध्वंसेनान्यथासिद्धतया संयोगजनकत्वाभावात् । न चाजनितसंयोगविभागे कर्मण्यतिव्याप्तिः । तत्रापि स्वरूपयोग्यतालक्षणकारणत्वसत्वात् । न च तादृशकर्मणि मानाभाव इति शङ्क्यम् । तस्यापि क्वचित्सम्भवात् । तथा हि चलत्यवयविनि नावयवा निश्चला उपलभ्यन्ते । अतोऽवयविनि कर्मोत्पत्तिकलेऽवयवेष्वपि कर्मो-

---

कर्मादौ मत्सतीर्थ्यैः पण्डितराजैः गोविन्दन् नम्ब्यार् महोदयैस्तत्र तत्र व्याख्याऽकारीति मूलं सारल्याद् व्याख्यां नापेक्षत इति च प्रयासो न विधीयते ।

।। इति हरप्रियव्याख्या समाप्ता ।।

*15

त्पत्तिरावश्यकी। अवयविकर्मणो यावदवयवकर्मोत्पत्तिनियतत्वादिति वैशेषिकवृद्धाः। यावदवयवकर्मव्याप्यतेति तदेकदेशिनः। इदमेव भाष्यकारादीनां सम्मतम्। अत एव विभागग्रन्थे 'तेनांशेन कर्मोत्पत्यनन्तरं तदारब्धे तन्तौ कर्मोत्पद्यत' इत्यभिहितम्। तन्तुकर्मनाशक्षणे सामग्रीबलादागतायाः पटे कर्मोत्पत्तेर्वारयितुमशक्यतया मतद्वयमप्यसङ्गतम्। न च तदापि तन्तौ कर्मोत्पादस्सम्भवति। तत्प्रतिबन्धकस्य कर्मणस्सत्वादिति नैयायिकाः। तथा च तत्राद्यमते यत्रावयविनि क्रिया तत्र स्वसमानकालोत्पन्नावयवक्रियययावयविनाशानुकूलया विभागादिक्रमेणोत्तरदेशसंयोगकाले आश्रयस्यावयविनो नाशान्नावयविक्रियया संयोगो जनयितुं शक्यते। अतः सा क्रियाजनितसंयोगेति युक्तम्। अन्तिममतद्वये त्ववयविनाशसामग्रीकाले जातस्यावयविकर्मणो द्विक्षणस्थायिनोऽजनितसंयोगविभागत्वं स्फुटम्। एवं द्रव्यनाशसामग्रीपूर्वकलोत्पन्नावयविकर्मणः क्षणस्थायिनो द्रव्यनाशसामग्रीकाले जनितविभागत्वेऽपि तदुत्तरकालं द्रव्यनाशेन संयोगजननासम्भवादजनितसंयोगत्वं द्रष्टव्यम्। एतादृशस्थलाभिप्रायः प्राचां कर्मणः क्षणत्रयस्थायित्वप्रवादः। प्रायशः कर्मणः क्षणचतुष्टयस्थायित्वमेव, उत्तरसंयोगेन तन्नाशाभ्युपगमात्। पञ्चक्षणस्थायित्वमप्यनुपदमेव व्युदपादि। आरम्भकसंयोगप्रतिद्वन्द्विविभागजनकस्य तु पञ्चक्षणस्थायित्वं विभागजविभागावसरे व्यक्तीकृतम्। दीधितिकृतस्तु-प्रकारान्तरेणापि पञ्चादिक्षणस्थायित्वं वर्णयन्ति। तदतिदुरूहं व्युत्पत्सूनामिति नात्रोच्यत इति संक्षेपः। नैयायिकास्तु आरम्भकसंयोगप्रतिद्वन्द्विविभागजनकस्यापि कर्मणः कर्मान्तरवच्चतुःक्षणस्थायित्वमेव। यत्र कपाले घटनाशानुकूला क्रिया,

तया कपालद्वयविभागः, ततः कपालाकाशविभागः, ततः कपालाकाशसंयोगनाशः, ततः कपालोत्तरदेशसंयोगः, ततः कर्मनाश इति पञ्चक्षणस्थायित्वं प्रागुक्तं तदयुक्तम्। तया कपालक्रियया कपालद्वयविभागकाले कपालाऽऽकाशविभाग-स्याप्युत्पादसम्भवात्, एकस्य कर्मण आरम्भकसंयोगविरोध्य-विरोधिविभागजनकत्वे विरोधाभावात्। न चैवं विकसत्कमल-मुकुलभङ्गापत्तिरिति वाच्यम्। संयोगस्याव्याप्यवृत्तितया यद-वच्छेदेन कमल[1]घटकसंयोगः तदवच्छेदेनैककर्मण एव तद्वि-रोधिविभागजनकत्वेनोक्तस्थले तदभावेन मुकुलभङ्गाप्रस-क्तिर[2]रिति वदन्तीति दिक्। तच्च कर्म व्याप्यवृत्तीति प्राञ्चः। नवीनास्तु कर्माद्यव्याप्यवृत्ति, शाखायां वृक्षश्चलति न मूल इति प्रतीतेरिति संक्षेपः।

॥ इति कर्मपदार्थनिरूपणम् ॥

---

१ 'लारम्भक' २ 'क्ते'

अथ सामान्यनिरूपणम्

सामान्यविशेषसमवायाभावानां विभागावसर एव प्रतिपादनेन तत्रात्यन्तवक्तव्याभावान्न तेषामिह पुनः प्रतिपादनमिति सिद्धं सप्तैव पदार्था इति । नन्विदमनुपपन्नं, शक्तिसादृश्यादीनामपि पदार्थान्तिराणां सत्वात् । तथा हि यादृशादेव करतलानलसंयोगाद्दाहो दृष्टस्तादृशादेव मणिमन्त्रादिसमवहिताद्दाहो न जन्यत इति निर्विवादम् । ततस्तत्र वह्नौ दाहानुकूला शक्तिर्मणिमन्त्रादिसमवधाननाश्या । तदसमवधानेन च जन्यत इति कल्प्यते। सा च न द्रव्यादिषडन्तर्गतं, सामान्यवृत्तित्वादभाववत् । न च हेतोरसिद्धिः । यथा घटत्वन्नित्यं तथा पटत्वमपीति प्रतीत्या तस्य सामान्येऽपि सत्त्वात् । नाप्यभावः। विधिमुखेन प्रतीयमानत्वात्। मैवम् । मणिमन्त्राद्यभावस्योभयसम्प्रतिपन्नस्यैव दाहजनकत्वाङ्गीकारेण तत्र दाहवारणोपपत्तावतिरिक्तानन्तशक्तितत्प्रागभावध्वंसकल्पनाया गौरवत्वादित्यास्तां विस्तरः । एवं सादृश्यमपि न पदार्थान्तरम् । तत्र प्रमाणाभावात् । उक्तहेतोर्वस्तुत्वप्रमेयत्वादौ व्यभिचारात् । किन्तु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्। यथा चन्द्रभिन्नत्वे सति चन्द्रगतकान्त्यादिमत्त्वमेव मुखे चन्द्रसादृश्यमिति । स च धर्मो द्रव्यगुणादिरूप इति दिक् । दीधितिकारास्तु शक्तिसंख्याक्षणकारणत्वकार्यत्वविषयत्वविशेषणत्वादीनतिरिक्तानेव पदार्थानभ्युपगच्छन्ति । यथा चैतत्तथा पदार्थखण्डनादौ सुव्यक्तमिति विस्तरभीतेर्नेह प्रतन्यत इति सर्वमनवद्यम् ।

।। इति सामान्यनिरूपणम् ।।

वटस्य पत्रे मूले च स्थितिर्येषां विकल्प्यते ।
सूरिभिस्तान् गुरून् वन्दे विश्वरूपेन्द्रयोगिनः ।। १

तत्कृपापाङ्गनिर्धूतजडिमाखिलशास्त्रवित् ।
सिद्धान्तचन्द्रिकामेतां गङ्गाधरसुधीर्व्यधात् ।। २

अनया विशदीभूते न्यायवैशेषिकाध्वनि ।
निर्विशङ्कं सञ्चरन्तु बाला व्युत्पत्तिकांक्षिणः ।। ३

वन्दारुजनमन्दारं वारिजासनपूरितम् ।
गङ्गाधरं ललाटाक्षं भजे मध्यार्जुनेश्वरम् ।। ४

गङ्गाधराख्यमखिना बालव्युत्पत्तये कृता ।
समाप्तिमधुना याता तर्कसिद्धान्तचन्द्रिका ।। ५

इति श्रीसकलविद्यानिधानगङ्गाधरसूरिविरचिता
काणादसिद्धान्तचन्द्रिका समाप्ता ।

।। शुभमस्तु ।।

शुद्धिपत्रम्

अशुद्धम्	शुद्धम्	पृष्ठम्	पङ्क्तिः
निरासिष्यमाणतया	निरसिष्यमाणतया	5	4
लक्षणां	लक्षणं		18
विशेषे	विशेष	,,	
भेदनुमिति	भेदानुमिति	8	26
भेदनुमापकं	भेदानुमापकं	9	11
		9	12
प्रतियोगिताकभावत्वं	प्रतियोगिताकाभावत्वं	11	16
	सामान्यादीनाञ्चतुर्णान्तु जातिशून्यत्वम् ।	15	23
बहिरिन्द्रियैग्रहीतुं	बहिरिन्द्रियैर्ग्रहीतुं	21	3
स्वभाव	स्वाभाव	23	5
आप्रयोगिक	अप्रायोगिक	27	26
	योनिजं जरायुजाण्डजभेदेन द्विविधम्	29	5
समन्यवः.	समन्वयः	29	15
द्व्यणुके	द्व्यणुकादिति	30	9
	शीतस्पर्शानुपलम्भात् तत्राव्याप्तिः, सरयूतरङ्गवाहिनि समीरणे शीतस्पर्शोपलम्भात्	31	9
पार्थिवत्वं	पार्थिवं	33	12
नाश प्रति	नाशं प्रति	35	10
अनुष्णशीत	अनुष्णाशीत	36	8
एकैकं	एकं	37	1
अव्याप्ति	अतिव्याप्ति	37	18
शब्दाश्रयत्वस्तु	शब्दाश्रयत्वमस्तु	38	14
सत्तोपकक्षितः	सत्तोपलक्षितः	40	3
वाच्यादि	प्राच्यादि	42	14
	करणद्रव्यविभाजकधर्मात्यन्ताभावसमानाधिकरण	49	2
गन्धे	रूपे	,,	11
सयोग	संयोग	,,	17

चक्षुर्जत्य	चक्षुर्जन्य	50	15
तद्वतरूपस्थ	तद्गतरूपस्य	52	11
रूपदि	रूपादि	55	12
गतमेकत्व	गतमेकत्वं	60	19
सम्बन्धावाच्छिन्न	सम्बन्धावच्छिन्न	,,	27
,,	,,	,,	28
मात्रेणवयवगत	मात्रेणावयवगत	61	1
न्द्रिय यजन्य	न्द्रियजन्य	64	13
अथः	अतः	66	14
संयागज	संयोगज	67	15
कारण	कारणं	,,	16
यत्संयोगोः	यत्संयोगः	68	15
योतर्युसिध्यापत्तिः	योर्युतसिध्यापत्तिः	69	16
	विभागः–तस्मात् कपालद्वय-विभागात् कपालाकाशविभागः ततो	70	7
तथर्थं	तदर्थं	72	20
प्रवृत्तौर्दुरूह	प्रवृत्तेर्दुरूह	74	21
योगचधंम	योगजधर्मं	77	15
तरयापि	तस्यापि	78	7
निर्णते	निर्णीते	81	19
प्रतिज्ञादया	प्रतिज्ञादय	83	12
मित्य	मित्या	89	23
सूचायितु	सूचयितु	94	15
तात्पर्यापत्ति	तात्पर्यानुपपत्तिः	,,	17
शब्दबोधः	शाब्दबोधः	96	2
इत्यञ्च	इत्थञ्च	,,	7
शाब्दखण्डः	शब्दखण्डः	,,	22
द्वंरपि	द्वयोरपि	99	1
तात्कालिकं	तात्कालिकं	102	6
शङ्के	शङ्खे	103	2
परमर्श	परामर्शः	103	5
रेताद्दर्शो	रेतादृशो	103	15
ज्ञानाप्रामाण्ये	ज्ञानाप्रामाण्यं	103	17